74. C. कूलेऽपि for तटेऽपि. D. Fr. स्वनं for रवं. D. वृंहितनाद° for बृंहितनाद°. C. तस्मिन् for बाले.

75. C. बालः for पुत्रः. C. बाणविभिन्नदेहः for पत्रिविभिन्नमर्मा. C. शरानुयातेन, D. बाणानुसारेण for शरानुसारेण. C. प्रभुं for नृपं. D. नेत्राम्बुलिप्तेन for नेत्राम्बुदिग्धेन. D. ततृंह for जघान. Corrected to this in the margin of D.

76. D. ह्यनाथस्य for त्वनाथस्य. D. भिन्नः for भग्नः. D. एकोऽरण्ये for एको वने. Corrected to this in the margin of D.

77. B. Fr. लक्षं for लक्ष्यं. [D. मद्दृष्टितः for मच्चक्षुषा. D. कल्पितनेत्रकृत्यौ for कल्पितदृष्टिकृत्यौ. D. जीनौ, Fr. जीर्णौ for वृद्धौ.

वनेषु वासो मृगयूथमध्ये
क्रिया च वृद्धान्धजनस्य पोषः ।
वृत्तिश्च वन्यं फलमेषु दोषः
संभावितः को मयि घातहेतुः ॥ ७८ ॥

व्रती विनाथो विगतापराधः
स्मर्तव्यदृष्टेः पितुरन्धयष्टिः ।
इत्येषु किं निष्करुणेन कश्चि-
द्वध्यभावे गणितो न हेतुः ॥ ७९ ॥

तरुत्वचोऽयं कठिना वसानो
वनेषु शीतोष्णनिपीतसारः ।
अस्वादुवन्याशनजीर्णशक्तिः
पात्रं कृपायास्तव वध्यभूतः ॥ ८० ॥

जीर्णो जतुन्यासनिरुद्धरन्ध्रः
कुम्भश्च मौञ्जी तरुवल्कलश्च ।
एतेषु यन्मां विनिहत्य गम्यं
तद्गृह्यतामस्तु भवान्कृतार्थः ॥ ८१ ॥

---

78. C. जन्मान्धजनस्य for वृद्धान्धजनस्य. D. प्राणघातः for घातहेतुः. Corrected to प्राणघातः in the margin of D.; it is impossible to make out the original reading of the Ms.

79. C. व्यपेतदृष्टेः, D. प्रध्वस्तदृष्टेः for स्मर्तव्यदृष्टेः.

80. B. अयं वसानः कठिनास्तरुत्वचः, D. अयं वसानः कठिनं तरुत्वचं for तरुत्वचोऽयं कठिना वसानो. D. with Dharmârâma; but that reading is grammatically incorrect. C. वसानोऽरण्येषु for वसानो वनेषु. D. शीतोष्णनिगीर्णसारः for शीतोष्णनिपीतसारः. D. क्षीणशक्तिः for जीर्णशक्तिः. D. पदं कृपायाः for पात्रं कृपायाः.

81. D. जीर्णं जतुन्यासनिरुद्धरन्ध्रं भाण्डं च, Fr. जीर्णो जतुन्यासपिनद्धछिद्रः कुंभश्च for जीर्णो जतुन्यासनिरुद्धरंध्रः कुंभश्च. C. तरुवल्कलं च for तरुवल्कलश्च.

साधुः कृपामन्थरमक्षि शत्रौ
प्रीत्यर्थसंमीलितमादधाति ।
नीचस्तु निष्कारणवैरशील-
स्तत्पूर्वसंपादितदर्शनेऽपि ॥ ८२ ॥

स्वं हेतवे हेतिबलोपनीत-
स्मयः किमप्युन्नतवृत्ति कस्मै ।
नीचस्य निष्ठामधिकर्म गच्छन्
कुलं कलङ्कैः कलुषीकरोषि ॥ ८३ ॥

मैवं भवानेनमदुष्टभावं
जुगुप्सतां स्माक्षतसाधुवृत्तम् ।
इतीव वाचो निगृहीतकण्ठैः
प्राणैररुध्यन्त महर्षिसूनोः ॥ ८४ ॥

भोज्याः सुतश्चारुभुजद्वयेन
घटं गृहीत्वा घटितारिनाशः ।
बाष्पायमाणो बहुमानपात्रं
यमप्रभावो यमिनं ददर्श ॥ ८५ ॥

---

82. D. दुष्टः, Fr. पापः for नीचः.

83. D. त्वं हेतवे हेतिबलोपनीतो, Fr. स्वं हेतवे हेतिबलोपनीतो for स्वं हेतवे हेतिबलोपनीत°. D. गर्वः for °स्मयः. D. निष्ठस्य for नीचस्य. C. reads the following for the third line:—निष्ठस्य गच्छन्नधिकर्मनिष्ठा. C. agreeing with the Sinhalese edition.

84. C. reads the first two lines thus:- जुगुप्सत स्मैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्तं. Agre-ing with the Sinhalese edition. D. जुगुप्सति स्म. Fr. जुगुप्सत स्म For जुगुप्सतां स्म. The readings of these Mss. appear to us corrupt.

85. A. B. भोज्यास्सुतः for भोज्याः सुतः. C. रम्यभुजद्वयेन, D. कान्तभुजद्वयेन, Fr. काम्यभुजद्वयेन for चारुभुजद्वयेन. D. कुंभं गृहीत्वा कुभटारिकेतुः for घटं गृहीत्वा घटितारिनाशः. D. वाष्पायमाणः for बाष्पायमाणः. D. यमिनां for यमिनम्.

पापं विधायापि विधातृतुल्ये
सत्यापयामास सतां पुरोगः ।
ततो यतिं घातयतो न सद्यः
क्रोधानलेनास्य ददाह देहम् ॥ ८६ ॥

दयानुयातस्तनयस्य नाशं
श्रुत्वा महर्षिर्मुहुरात्तशोकः ।
दिदेश देशस्तुतसद्गुणाय
विशं वशी विश्वभुजं स शापम् ॥ ८७ ॥

वनजकुसुमधारिणीमलङ्घ्यां
हरिनखपातविपाटितोरुगण्डाम् ।
श्रियमिव नृपतिर्मृगव्यभूमिं
चिरमनुभूय गृहोन्मुखो बभूव ॥ ८८ ॥

अथ स विषमपादगोपितार्थं
जगदुपयोगवियुक्तभरिधातुम् ।
बहुतुहिननिपातदोषदुष्टं
गिरिमरहत्कुकवेरिव प्रबन्धम् ॥ ८९ ॥

---

86. D. मुनिं for यतिं. D. कोपानलेन, Fr. रोषानलेन for क्रोधानलेन. D. ततापं कायम् for ददाह देहम्.

87. Fr. कृपोपनीतः for दयानुयातः. D. मृत्युं for नाशं. D. Fr. भृशदुःखितः सन् for मुहुरात्तशोकः. C. विशन्वशी for विशं वशी.

88. C. °वाहिनीं, D. °पोषिणीं for °धारिणीं. C. °घातविदारितोरुगण्डां. D. °पातविचूर्णितोरुगण्डां, Fr. °पातविदारितोरुगण्डां for °पातविपाटितोरुगण्डाम्.

89. B. गिरिमसृजत्, C. धरमरहत्, D. नगममुचत्, Fr. नगमसृजत् for गिरिमरहत्. Our Ms. B. agrees with the Sinhalese edition.

सपदि दिशि निबद्धभूरिघोषं
परमविनीतमनोज्ञनागवृन्दम् ।
जलधिमिव नृपः पुरं स्वकीयं
मणिगणमण्डितकान्तमाससाद ॥ ९० ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ दशरथोत्पत्तिर्नाम प्रथमः सर्गः ॥

---

90. D. झटिति for सपदि. C. निशि for दिशि. D. Fr. आजगाम for आससाद.

द्वितीयः सर्गः ।

———:o:———

रावणेन रणे भग्ना देवा दावाग्नितेजसा ।
द्रष्टुं जगत्पतिं जग्मुः पुरस्कृतपुरन्दराः ॥ १ ॥

निजदेहभराक्रान्तनागनिश्वासरंहसा ।
गतागतपयोराशिपातालतलमास्थितम् ॥ २ ॥

आसीनं भोगिनि स्रस्तमौलिमाल्यविभूषणम् ।
तत्क्षणत्यक्तनिद्रार्तिवद्धरागायतेक्षणम् ॥ ३ ॥

भुजङ्गपृथुकारूढमातङ्गमकराश्रयम् ।
युद्धमम्भोनिधिच्छेदे पश्यन्तं नृपलीलया ॥ ४ ॥

भोगिभोगासनक्षोभो माभूदिति सुदूरतः ।
भक्त्यानतशरीरेण सेव्यमानं गरुत्मता ॥ ५ ॥

अर्करश्मिभयेनेव पातालतलमास्थितम् ।
लक्ष्मीमुखतुषारांशौ प्रीत्या व्यापारितेक्षणम् ॥ ६ ॥

स्वमुखे संचरद्दृष्टेरङ्कविन्यस्तपार्ष्णिना ।
स्पृशन्तं पादपद्मेन पद्मया नाभिमण्डलम् ॥ ७ ॥

---

1. C. भिन्नाः, D. छिन्नाः for भग्नाः. D. लेखाः for देवाः. D. सस्रुः for जग्मुः.

2. D. °कायभराक्रान्तभोगि° for °देहभराक्रान्तनाग°. C. गतागतपयोराशिम् for गतागतपयोराशि°. D. °तलसुस्थितं for °तलमास्थितं.

3. D. चक्रिणि for भोगिनि. D. °मालाविभूषणं for °माल्यविभूषणं. D. तत्क्षणोत्सृष्ट° for तत्क्षणत्यक्त°.

4. D. °मातङ्गमकरालयं for °मातङ्गमकराश्रयं. D. अम्भोनिधिखण्डे for अम्भोनिधिच्छेदे. C. हेलया स्वयम्, D. लीलया स्वयम्, Fr. राजलीलया for नृपलीलया.

5. D. °क्रोधः for °क्षोभः. D. भक्त्यावर्जितदेहेन for भक्त्यानतशरीरेण. Fr. भुज्यमानं for सेव्यमानं.

6. C. मित्ररश्मि°, D. सूर्यरश्मि° for अर्करश्मि°. A. C. °तलसुस्थितम् for °तलमास्थितम्. Fr. पद्मामुख° for लक्ष्मीमुख°. D. प्रेम्णा for प्रीत्या.

7. C. विक्षिपद्दृष्टेः for संचरद्दृष्टेः. C. अंकनिक्षिप्त° for अंकविन्यस्त°. D. स्पृशन्तं for स्पृशन्तं. C. वलिमण्डलं, D. वलिवर्तुलं for नाभिमण्डलं.

सव्यापसव्यभागस्थपाञ्चजन्यसुदर्शनम् ।
तद्द्वयस्थचन्द्रार्कविन्ध्यशैलमिवोच्छ्रितम् ॥ ८ ॥
पुरुषं पुरुहूताद्या नत्वा गीर्वाणसंहतिः ।
सनातनं स्कन्नशक्तिरूचे नुतियुतां गिरम् ॥ ९ ॥
समुद्रमथने यस्य भ्रमन्मन्दरखण्डिताः ।
तारा इव दिशो बभ्रुः प्रदीप्ताङ्गदकोटयः ॥ १० ॥
येन दुर्वारवीर्येण सागराम्बरचन्द्रमाः ।
शङ्खः पातालपालानां यशःपिण्डमिवोद्धृतम् ॥ ११ ॥
यमंसद्वयसंसक्तचन्द्रादित्याङ्गदश्रियम् ।
नेमुस्त्रिविक्रमे देवास्ताराहाराङ्कवक्षसम् ॥ १२ ॥
मन्थवातभ्रमन्मेघनक्षत्रादित्यमण्डलम् ।
पुरा निमथितं येन व्योमापि सह सिन्धुना ॥ १३ ॥

---

8. D. पार्श्वस्थ° for भागस्थ°. C. चन्द्रार्कं, D. सोमार्कं° for चन्द्रार्क°. C. Agreeing with Dharmârâma. D. उन्नतं for उच्छ्रितं.

9. B. reads the following for our text, नत्वा नुतियुतां स्कन्नशक्तिरूचे सनातनं पुरुषं पुरुहूताद्या गिरं गीर्वाणसंहतिः ॥ Agreeing with the Sinhalese edition. Fr. नत्वा नुतियुतामूचे स्कन्नशक्तिः सनातनं. D. गीर्वाणसंहतिः for गीर्वाणसंहति C. सन्नशक्तिः for स्कन्नशक्तिः. C. स्तुतियुतां, D. नुतिप्लुतां for नुतियुतां. Corrected to नुतिप्लुतां in the margin of D.

10. D. समुद्रमंथने for समुद्रमथने. C. भ्रम्यन्मन्दरपण्डिताः, D. भ्राम्यन्मन्दर खण्डिताः for भ्रमन्मन्दरखण्डिताः. C. दिशाः for दिशः. Corrected to this in the margin of C.; D. भासुराङ्गदकोटयः for प्रदीप्ताङ्गदकोटयः.

11. D. Fr. सागराम्बरचन्द्रमः for सागराम्बरचन्द्रमाः. The Mss. D. Fr. agree with K. Dharmârâma and H. Sumangala. C. शंखः for शंखं B. यशःपिण्ड इव, D. यशःपुञ्जमिव for यशःपिण्डमिव.

12. D. यमंशद्वय° for यमंसद्वय°. B. C. ताराहारांकवक्षस्कं देवा नेमुस्त्रिविक्रमं for नेमुस्त्रिविक्रमे देवास्ताराहाराङ्कवक्षसम्. The reading of our Mss. B. C. is also supported by H. Sumangala.

13. D. चक्रवात° for मंथवात°. Fr. सिन्धुना समं for सह सिन्धुना.

नाभिपद्मस्पृशौ भीमौ येन मायाशयालुना।
पाणिभिः पाटितौ कामं कीटवन्मधुकैटभौ ॥ १४ ॥

सर्वं लोकत्रयं यश्च संहृत्य शयनं गतः।
दृश्यते सलिलस्कन्धः सान्द्रीभूत इवोदधौ ॥ १५ ॥

तस्मै स्मरणमात्रेण तुभ्यं सद्यस्तमोनुदे।
नमः सत्त्वमधिश्रित्य त्रैलोक्यं परिरक्षते ॥ १६ ॥

स्थितिनिर्माणसंहारभेदयोगेन भेदितः।
त्रिधा ते समभूद्योगः स्पृष्टसत्वरजस्तमाः ॥ १७ ॥

कुक्षौ तव परिभ्रम्य पश्यन्विश्वं विशाम्पतिः।
विवेद त्वां विदामग्र्यस्त्रैलोक्यभरसासहिम् ॥ १८ ॥

एवं भक्त्या जगन्नेता नुतो नाकस्य भोक्तृभिः।
हरिर्हारि हितं वाक्यं जगाद गदनाशनः ॥ १९ ॥

---

14. D. Fr. घोरौ for भीमौ. D. पशुवन्मधुकैटभौ for कीटवन्मधुकैटभौ. Corrected to पशुवन्मधुकैटभौ in the margin of D.

15. D. सर्वंलोकत्रयं for सर्वं लोकत्रयं. Fr. सान्द्रिभूत इवोदधेः for सान्द्रीभूत इवोदधौ.

16. A. reads the following for our text:—तस्मै सत्त्वमधिश्रित्य त्रैलोक्यपरिरक्षिणे। सद्यः स्मरणमात्रेण नमस्तुभ्यं तमोनुदे॥ Agreeing with the Sinhalese edition. D. तमोभिदे for तमोनुदे. C. त्रैलोक्यपरिरक्षिणे, D. त्रिलोकीपरिरक्षिणे for त्रैलोक्यं परिरक्षते.

17. Fr. °निर्वाण° for °निर्माण°. C. त्रिधा समभवद्योगः, D. त्रेधा ते समभूद्योगः for त्रिधा ते समभूद्योगः.

18 D. Fr. read तव कुक्षौ परिभ्रम्य विदामग्र्यो विशां पतिः। क्षमापयन्नवेद त्वां विश्वं पश्यन्भृशं भरं for our text. But the verse, appears to us, incorrect and corrupt.

19. For the first line A. reads the following:—जगन्नेता नुतोऽथैवं भक्त्या नाकस्य भोक्तृभिः Agreeing with the Sinhalese edition. C. भक्त्याथैवं जगन्नेता for एवं भक्त्या जगन्नेता. D. जगत्कर्ता for जगन्नेता. C. D. स्तुतः स्वर्गस्य भोक्तृभिः for नुतो नाकस्य भोक्तृभिः. C. D. बभाण भगनन्दनः for जगाद गदनाशनः.

प्रबलारिबलप्राणविक्रियाहेतुहेतयः ।
किं नु स्कन्नौजसो जाता देवा दैवक्षता इव ॥ २० ॥
हरेर्ध्यानारुणा शोकक्षामा नेत्रपरम्परा ।
बिभर्ति किं परिम्लानरक्तोत्पलवनश्रियम् ॥ २१ ॥
पाशपाणिरसाविष्टविग्रहो वनगोचरः ।
वीरोऽपि वरुणः केन क्षुद्रः पाशीव पीडितः ॥ २२ ॥
किमयं शोकसंतापैर्मातरिश्वा कृशोऽपि सन् ।
भूरिभिर्निजनिःश्वासैः पुनरेवोपचीयते ॥ २३ ॥
संपद्ध्रुवपरावृत्तिरेवं विधिनिबन्धना ।
शोकविश्वभुजा सोऽयं दह्यते दहनोऽपि सन् ॥ २४ ॥
संप्राप्तजडिमा भानुस्तीव्रतापश्च चन्द्रमाः ।
किमेतौ वहतो देवौ धामव्यत्ययविप्लवम् ॥ २५ ॥

---

20 D. Fr. प्रबलारिचमूप्राण° for प्रबलारिबलप्राण°. Fr. हतौजसः for स्कन्नौजसः.

21. D. दुःखक्षामा for शोकक्षामा. D. Fr. चक्षुःपरम्परा for नेत्रपरम्परा. B. C. धत्ते किं नु for बिभर्ति किं. Corrected to धत्ते किं नु in the margin of D. but the original reading is distinct in the text and the correction is therefore unnecessary.

22. Fr. has:—वीरोऽपि वरुणः केन क्षुद्रः पाशीव पीडितः । पाशपाणिरसाविष्टविग्रहो वनगोचरः. Agreeing with the Sinhalese edition. B. C. क्षुद्रपाशीव पीडितः, D. क्षुद्रः पाशीव क्लेशितः for क्षुद्रः पाशीव पीडितः.

23. D. दुःखसंतापैः for शोकसंतापैः. C. भूरिभिर्दीर्घनिःश्वासैः, D. Fr. बहुभिर्दीर्घनिःश्वासैः for भूरिभिर्निजनिःश्वासैः.

24. D. इत्थं for एवं. D. Fr. विधिनियोजना for विधिनिबंधना. Fr. मन्युविश्वभुजा for शोकविश्वभुजा. Corrected to मन्युविश्वभुजा in the margin of Fr.

25. C. संप्राप्तजडिमा मित्रः, D. संलब्धजलिमा सूर्यः for संप्राप्तजडिमा भानुः. C. तीक्ष्णतापः, D. Fr. चण्डतापः for तीव्रतापः. B. बिभृतः for वहतः. Agreeing with the Sinhalese edition.

शुचैव सगदः सोऽहं भयः किं धतयानया ।
इति त्यक्ता गदा नूनं मित्रेण गिरिधन्वनः ॥ २६ ॥

लाघवं केन कीनाशे कृतं सायुधवाहने ।
रक्षके महिषस्यैवं दण्डहस्ते शिशाविव ॥ २७ ॥

कल्पानिल इवावार्यः स्कन्दो दैन्यं किमास्थितः ।
प्रेरकः शिखिनो भीमः शक्त्या पातिततारकः ॥ २८ ॥

आहत्य हृतसर्वास्त्रा भ्रूधनुर्मात्रधारिणी ।
कटाक्षशरशेषेयं चण्डी केन कृता रणे ॥ २९ ॥

प्रमथानामधीशस्य माथकस्यासुरद्विषाम् ।
कूटस्थोऽपि मदः शोषवैकृतं किं नु सेवते ॥ ३० ॥

वक्त्रश्वासाग्निपिङ्गाङ्गकर्कोटाबद्धकन्धरः
नागशोणितदिग्धास्यस्तार्क्ष्यो राजशुकायते ॥ ३१ ॥

---

26. B. C. Fr. भानुना नगधन्वनः for मित्रेण गिरिधन्वनः. Corrected to this in the margain of C. It is difficult to make out the original reading of this Ms.

27. D. Fr. लघुत्वं for लाघवं. Corrected to लघुत्वं in the margin of Fr.; D. दण्डपाणौ for दण्डहस्ते.

28. B. कल्पानिलमिवावार्यः for कल्पानिल इवावार्यः. Agreeing with the Sinhalese edition. C. गुहः किं दैन्यमास्थितः, D. गुहो दैन्यं किमास्थितः for स्कन्दो दैन्यं किमास्थितः. C. शुष्मणो भीमः, D. शुष्मणश्चण्डः for शिखिनो भीमः. D. Fr. प्रभावहततारकः for शक्त्या पातिततारकः.

29. C. प्रहत्य for आहत्य. C. केन काली कृता मृधे, D. केन गौरी कृता रणे, Fr. काली केन कृता मृधे for चण्डी केन कृता रणे.

30. D. Fr. मथानस्य for माथकस्य. D. शोषविकृतं for शोषवैकृतं. Corrected to this in the margin of D.

31. C. मुखोच्छ्वासाग्नि°, D. तुण्डश्वासाग्नि° for वक्त्रश्वासाग्नि° D. °कर्कोटानद्ध° for °कर्कोटाबद्ध°. D. Fr. सर्पशोणित° for नागशोणित°. Corrected to सर्पशोणित° in the margin of D.

साग्निजिह्वातडिज्जालनद्धा चास्य फणावली ।
किं नु म्लायति वर्षान्ते घनश्रेणीव वासुकेः ॥ ३२ ॥

पृष्टवन्तमिति प्रष्ठः प्राज्ञः प्राञ्जलिरव्ययम् ।
धिषणो धिषणागम्यं जगाद जगदीश्वरम् ॥ ३३ ॥

त्वया विज्ञातमेवेदं सर्वज्ञ पुनरुच्यते ।
असौहित्यं हि भृत्यानां स्वामिनि स्वार्तिजल्पने ॥ ३४ ॥

मानिनामग्रणीरस्ति पुलस्त्यसुतसंभवः ।
दर्पोद्धतजगद्रक्षो रक्षोनाथो दशाननः ॥ ३५ ॥

स महौजा जगन्नाशफलाय फलसाधनः ।
निर्विकारश्चिरं चीरी चचार च महत्तपः ॥ ३६ ॥

मातङ्गमकरक्रूरदन्तोल्लिखितवक्षसा ।
तेन व्रतयताहारं तपस्तप्तमुदन्वति ॥ ३७ ॥

तत्तपस्तोषितस्तस्मै चतुराय चतुर्मुखः
वरं वीराय विश्वेशः प्रादाज्जेतुं जगद्द्वयम् ॥ ३८ ॥

---

32. C. D. सार्चिर्जिह्वातडिज्जालवद्धा for साग्निजिह्वातडिज्जालनद्धा. B. C. फणावलिः for फणावली. Fr. मेघराजीव for घनश्रेणीव.

33. B. प्रज्ञानां प्राञ्जलिस्तदा, D. प्राज्ञानां प्राञ्जलिस्तदा for प्राज्ञः प्राञ्जलिरव्ययम्. We with A. C. Fr. supported by the Cal. edi.

34. C. has:–विज्ञातमेव सर्वज्ञ त्वयेदं पुनरुच्यते for the first line and agreeing with the Sinhalese edition. C. प्रेष्याणां, D. Fr. दासानां for भृत्यानां. D. ईश्वरे for स्वामिनि.

35. C. D. Fr. अग्रणीर्मानिनामस्ति पुलस्तिसुतसंभवः for मानिनामग्रणीरस्ति पुलस्त्यसुतसंभवः. These Mss. agree with the Sinhalese edition.

36. D. reads चचार सुचिरं चीरी निर्विकारो महत्तपः । महौजाः स जगन्नाथफलाय फलसाधकः for our text. Agreeing with the Sinhalese edition. C. चकार for चचार. Fr. निर्विकारः सुचिरं चिरी चकार महत्तपः for निर्विकारश्चिरं चीरी चचार च महत्तपः. Fr. breaks the metre.

37. B. °दंष्ट्रोत्कीर्णेन वक्षसा, C. °दंष्ट्रोल्लिखितवक्षसा for °दन्तोल्लिखितवक्षसा. D. Fr. अपांपतौ for उदन्वति.

38. D. तत्तपोहर्षितस्तस्मै for तत्तपस्तोषितस्तस्मै. B. C. जेतुं जगद्द्वयं प्रादाद्वरं वीराय विश्वगः for वरं वीराय विश्वेशः प्रादाज्जेतुं जगद्द्वयम्. [C. वीरस्य for वीराय].

स कदाचिद्रटन्नागं नगं नाकौकसामरिः
हारगौरं हरस्थानं पटुनादं व्यपाटयत् ॥ ३९ ॥
स्फुरन्नगशिरस्त्यक्तैरुन्नदन्नदनिर्झरैः ।
स्पृष्टे पूषणि झंकारं घोरमातन्वति क्षणात् ॥ ४० ॥
वाजिनः प्रग्रहाकृष्टखलीनावक्रकन्धरान् ।
एकतो जवयत्यद्रिपातभीत्यार्कसारथौ ॥ ४१ ॥
घूर्णमानमहाशैलतटभ्रष्टे मुहुर्मुहुः ।
मत्तस्येवोत्तरीये स्वस्थानं त्यजति निर्झरे ॥ ४२ ॥
गौरीभयपरिष्वङ्गस्पर्शलब्धमहोत्सवे ।
संक्रुद्धधूर्जटिक्रोधप्रतिलोमप्रवर्तिनि ॥ ४३ ॥
कपालनयनच्छिद्रं जटाबद्धफणावति ।
संकोचितफणाचक्रं विशत्युत्त्रासविह्वले ॥ ४४ ॥
परित्रस्ते गोपयति कृकवाकुध्वजे सति । कृकवाकुध्वजः कार्तिके[ya]
कार्तस्वरमयं मेषं मातुरुत्सङ्गसङ्गिनि ॥ ४५ ॥
उत्पश्यति चिरं धीरं क्रोधरोधार्त्तचेतसि ।
भर्तुर्भ्रूभागभङ्गस्य प्रादुर्भावं ककुद्मनि ॥ ४६ ॥

---

39. D. कदाचिद्रवन्नागं for कदाचिद्रटन्नागं. D.Fr. स्वर्गौकसां for नाकौकसां. Corrected to स्वर्गौकसां in the margin of Fr.

40. D. Fr. भास्वति for पूषणि. Corrected to भास्वति in the margin of D.

41. C. अर्वतः for वाजिनः D. Fr. एकतस्त्वरयत्यद्रि° for एकतो जवयत्यद्रि°.

42. C. मत्तस्येवोत्तरीये च स्थानं, D. Fr. मत्तस्येवोत्तरीयं च स्थानं for मत्तस्येवोत्तरीये स्वस्थानं.

43. C. उमाभयपरिष्वंगस्पर्शप्राप्त°, D. दुर्गाभयपरिरंभस्पर्शप्राप्त° for गौरीभयपरिष्वंगस्पर्शलब्ध°. D. संक्षुब्धधूर्जटिकोप° for संक्रुद्धधूर्जटिक्रोध°.

44. C. D. कपाललोचनच्छिद्रं for कपालनयनच्छिद्रं.

45. C. उत्संगसंगिनि. D. Fr. उत्संगवर्तिनि for उत्संगसंगिनि. Corrected to उत्संगशायिनि in the margin of D.

46. C. ककुद्मिनि, D. Fr. ककुद्मति for ककुद्मनि.

रूढमूलमिव श्वेतैरधोलग्नैर्भुजङ्गमैः ।
प्रौढपुष्पमिवाग्रस्थस्फुरन्नक्षत्रमण्डलैः ॥ ४७ ॥

चरणेन रणत्सिंहकुलाकुलगुहामुखं ।
गिरिं गौरीपतिः कुञ्जगुञ्जत्सिन्धुं न्यपीडयत् ॥ ४८ ॥

धराधरभराक्रान्ते बाहौ बहुभिराननैः ।
दिक्षु दीर्घप्रतिक्रोशो रावणेन कृतो रवः ॥ ४९ ॥

तं देवं स शिरश्छेदव्रणचक्रैरपूजयत् ।
नीलकुट्टिमविन्यस्तैर्मण्डलैरिव कौङ्कुमैः ॥ ५० ॥

आज्ञापयितुमेतस्य राक्षसस्य दिशो दश ।
वक्त्राणि पंक्तिसंख्यानि पुनः सृष्टानि शूलिना ॥ ५१ ॥

तमःस्थानं तमासाद्य बालिशं कुलिशं रणे ।
अजहादज धाम स्वं वैकुण्ठस्य विकुण्ठितम् ॥ ५२ ॥

तमत्राप्यनवद्येन वसुना वासवः स्वयम् ।
अजय्यं पूजयत्येकवीरं वैरस्य शान्तये ॥ ५३ ॥

---

47. C. शुभ्रैः, D. शुक्लैः for श्वेतैः. B. अधोलंबैः for अधोलग्नैः. Corrected to अधोलम्बैः in the margin of B.

48. C. रणत्सिंहकुलाकुलदरीमुखं, D. Fr. रटत्सिंहकुलाकुलदरीमुखं for रणत्सिंहकुलाकुलगुहामुखं. B. C. कुञ्जगुंजत्स्रोतं for कुञ्जगुंजत्सिन्धुं. D. Fr. व्यपीडयन् for न्यपीडयत्.

49. D. Fr. भुजे भूरिभिराननैः for बाहौ बहुभिराननैः.

50. B. देवं तं स for तं देवं स. D. Fr. °चक्राण्ययाजयत् for चक्रैरपूजयत्. C. शामकुट्टिमविन्यस्तैः, D. कृष्णकुट्टिमविक्षिप्तैः for नीलकुट्टिमविन्यस्तैः.

51. B. दानवस्य, C. दैतेयस्य, D. दनुजस्य, Fr. रावणस्य for राक्षसस्य. We with A. supported by the Calcutta as well as the Sinhalese editions. C. भूयः सृतानि, D. भूयः सृष्टानि, Fr. पुनः सृतानि for पुनः सृष्टानि.

52. D. Fr. have the following for our text:—स्वं धामाजय्यमजह-[हा] द्वैकुण्ठस्य विकुण्ठितम् । तमासाद्य तमःस्थानं बालिशं कुलिशं रणे. Agreeing with K. Dharmàràma and H. Sumangala.

53. D. अजेयं, Fr. दुर्जयं for अजय्यं.

*। हरौ विष्णुर्वृषाकपिरित्यमरः। अग्निरित्ये स्वामी।

वालं वज्राय पौलोमी सस्मितं विगतादरा ।
कुर्वती कुरुते शक्रं व्रीडासन्नमितानन्नम् ॥ ५४ ॥

यक्षनाथो दिशंस्तस्मै केवलं धनदो धनम् ।
सर्वस्वहरणभीतो रावणस्तु धनेश्वरः ॥ ५५ ॥

धर्म्यं कर्म परित्यज्य प्रीणाति पिशितप्रियम् ।
प्रेतराजोऽप्यभिप्रेतभक्ष्यदानेन दानवम् ॥ ५६ ॥

दूरतः सेवते भानुरादित्यमणितोरणात् ।
च्युते तन्मन्दिरद्वारदाहभीतो हुताशने ॥ ५७ ॥

निवृत्ततत्सरःपद्मस्वापकारणतेजसा ।
बोधनीयं किलाशेषमिन्दुना कौमुदं वनम् ॥ ५८ ॥

यथा न कज्जलस्पर्शचित्रवैवर्ण्यसंभवः ।
तथा ज्वलितुमादिष्टो दीपकृत्यो वृषाकपिः* ॥ ५९ ॥

लब्धसेवावकाशः सन् सेवते तं समीरणः ।
रतिक्लमथुमदेहं तरङ्गान्तरगोचरः ॥ ६० ॥

पातालहृदयान्तःस्थं पद्मरागं पयोनिधिः ।
अग्रमांसमिवोद्धृत्य ददाति पिशिताशिने ॥ ६१ ॥

---

54. B. C. पौलोम्नी for पौलोमी.

55. D. Fr. यक्षराजः for यक्षनाथः. C. सर्वस्वहरणात्प्रीतः for सर्वस्वहरणप्रीतः. D. Fr. रावणो द्रविणेश्वरः for रावणस्तु धनेश्वरः.

56 C. कम धर्म्यं परित्यज्य for धर्म्यं कर्म परित्यज्यं. D. Fr. प्रेतनाथः for प्रेतराजः. C. राक्षसं for दानवं.

57. D. Fr. विभावसौ for हुताशने. Corrected to विभावसौ in the margin of D.

58. Fr. बायनीयं for बोधनीयं. C. विधुना, D. Fr. अब्जेन for इन्दुना.

59. B. न यथा धूमस्पर्शेन, C. न यथा धूमिकास्पर्शे° for यथा न कज्जलस्पर्श°. D. विभावसुः, Fr. हुताशनः for वृषाकपिः.

60. D. प्राप्तसेवा° for लब्धसेवा°. D. Fr. रतिक्लमथमदेहं for रतिक्लमथुमदेहं.

61. D. Fr. पुष्परागं for पद्मरागं. C. अपांपतिः for पयोनिधिः. C. अग्र्यमांसमिवादाय for अग्रमांसमिवोद्धृत्य, C. दितिनन्दिने for पिशिताशिने.

काले कालाभ्रगर्भेऽपि निर्मदा नर्मदादयः ।
नन्दयन्ति सदा नद्यो वज्रैर्वज्रायुधद्विषम् ॥ ६२ ॥

प्रियाजनपरिष्वङ्गप्रीतिं कर्तुं निरंतराम् ।
निशि ज्ञातमनोवृत्तिस्तमुपैति हिमागमः ॥ ६३ ॥

तस्योद्यानवनं विश्वं दिवः प्रवसता सता ।
सर्वर्तुषु निजैः पुष्पैर्भूष्यते मधुनाऽधुना ॥ ६४ ॥

दुराराध्यस्वभावस्य समालम्ब्य सिषेविषाम्
जलक्रीडादिनं तस्य ग्रीष्मश्चिरमुदीक्षते ॥ ६५ ॥

त्रासकण्ठग्रहव्यग्रांस्तस्मिन्निच्छति मानिनः ।
धीरं गर्जन्ति लङ्कायामकाले वारिदा अपि ॥ ६६ ॥

अश्रान्ता वीजयत्यष्टहस्तपर्यायसंपदा ।
इति चण्डीमभिप्रेप्सुः कर्तुं चामरधारिणीम् ॥ ६७ ॥

स्तब्धकर्णो नमत्येनं श्रवणाक्षोभमारुतैः ।
भूभक्तिकुसुमक्षेपदोषभीतो गणाधिपः ॥ ६८ ॥

---

62. D. नर्मदाद्याश्च निर्मदाः for निर्मदा नर्मदादयः.

63. D. Fr. निरंतरम् for निरंतराम्.

64. D. यत्प्रवस्तायता दिवः for दिवः प्रवसता सता. The reading of D. appears to us incorrect and corrupt. D. निजैः सूनैर्भूष्यते, Fr. निजैः श्नैर्भूष्यते for निजैः पुष्पैर्भूष्यते.

65. B. has the following for our text:—दुराराध्यस्वभावस्य ग्रीष्मस्तस्य सिषेविषाम् । समालम्ब्य जलक्रीडादिनं चिरमुदीक्षते. Agreeing with the Sinhalese edition. C. जलकेलीदिनं, D. Fr. अंबुकेलिदिनं for जलक्रीडादिनं. Corrected to अंबुकेलिदिनं in the margin of D.

66. D. Fr. स्थिरं for धीरं. Corrected to स्थिरं in the margin of D. D. Fr. तोयदाः for वारिदः.

67. C. अश्रान्तं, D. Fr. सततं for अश्रान्ता. Corrected to सततं in the margin of Fr. D °वाहिनीम् for °धारिणीम्.

68. D. Fr. स्थिरकर्णः for स्तब्धकर्णः. C. D. श्रवणाक्षेप°, Fr. श्रवणक्षोभ° for श्रवणाक्षोभ. C. °कुसुमाक्षेप° for °कुसुमक्षेप°. B. Fr. गजाननः for गणाधिपः.

स्मरश्च संसदं तस्य विशति स्त्रस्तवाससा ।
प्रतीहार्या स्मिताकूतविभ्रमैः कथितागमः ॥ ६९ ॥

शुद्धान्तमन्ततः शुद्धः स्त्रीजनस्य तदाज्ञया ।
लीलोपदेशदानैकव्यग्रो विशति मन्मथः ॥ ७० ॥

त्वयि रक्षाकृति स्वर्गसद्मनामपि दैवते ।
कथं नक्तंचरेणैवं दिवस्त्रासो वितन्यते ॥ ७१ ॥

भ्रातरि द्विषतो बाहुभग्नौजासि बिडौजसि ।
भोगिभोगे चिरं तावत्केयं देवस्य शायिका ॥ ७२ ॥

आत्मस्वनुगुणं दैवं दृष्ट्या मन्यामहे तव ।
न हि त्वं दैवहीनस्य जनस्य तु सुदर्शनः ॥ ७३ ॥

इत्थं वाचस्पतौ वाचं व्याहृत्य विरते क्षणम् ।
स्वर्गे च स्वप्रतिजल्पस्पृहानिःस्पन्दवर्तिनि ॥ ७४ ॥

---

69. B. प्रतिहार्या for प्रतीहार्या. C. स्मितव्यक्त°, D. स्मितादिष्ट°, Fr स्मितोद्दिष्ट° for स्मिताकूत°.

70. D. शुद्धान्तमन्तःशुद्धः सन्, Fr. शुद्धान्तमन्यतः शुद्धः for शुद्धान्तमन्ततः शुद्धः. D. agrees with the Calcutta edition.

71. A. C. देवते for दैवते. C. रात्रिंचरेणैवं for नक्तंचरेणैवं. D. Fr. वितायते for वितन्यते. We prefer देवते for दैवते.

72. B. C. सुखा for चिरं. Corrected to सुखा in the margin of C.

73. B. reads the following for our text:—दैवं मन्यामहे दृष्ट्या तवानुगुणमात्मसु । जनस्य दैवहीनस्य न हि त्वं सुखदर्शनः. Agreeing with the Sinhalese edition. C. लोकस्य सुखदर्शनः, Fr. जनस्य सुखदर्शनः for जनस्य तु सुदर्शनः. Corrected to सुखदर्शनः in the margin of Fr.

74. B. C. एवं वाचस्पतौ वाचं संघुष्य विरते क्षणं for इत्थं वाचस्पतौ वाचं व्याहृत्य विरते क्षणम्. Corrected to संघुष्य in the margins of B. C. [C. क्षणात् for क्षणं].

कुक्षिस्थनिःशेषलोकत्रयभारोद्वहोऽप्यहम् ।
विधाय मानुषीकुक्षौ वासं शोकक्षयाय वः ॥ ७५ ॥
भूत्वा राम इति ख्यातः कर्ता भर्तुः सुरद्विषाम् ।
एकबाणकृताशेषशिरश्छेदपराभवम् ॥ ७६ ॥
इत्युदारमुदाहृत्य वचो वाचामगोचरः ।
तत्याज वेदविद्वेद्यो वर्षातल्पं वृषानुजः ॥ ७७ ॥
चिरशयनगुरुं स्वभोगभारं
भुजगपतिः शनकैर्वितत्य खेदात् ।
शिथिलितफणपंक्तिमुक्तदीर्घ-
श्वसितविधूतमहार्णवोऽवतस्थे ॥ ७८ ॥
भूमिस्पर्शभयादुपेत्य तरसा लक्ष्म्या करेणोद्धृतं
व्यालम्बैकपटान्तमंसशिखरे क्षिप्त्वोत्तरीयं ततः ।
निद्रामन्थरताम्रलोचनयुगो लीलालसन्यासया
गत्या निर्जितवारणेन्द्रगमनः क्वापि प्रतस्थे हरिः ॥ ७९ ॥

इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ जगत्पत्यभिगमनो नाम द्वितीयः सर्गः ।

---

75. C. reads the following for the first line of our text:— अपि कुक्षिस्थनिःशेषलोकत्रयभरोद्वहः. Agreeing with the Sinhalese edition. D. Fr. प्रपद्य for विधाय. D. Fr. मर्त्यस्त्रीकुक्षिवासं for मानुषीकुक्षौ वासं. C. मन्युक्षयाय for शोकक्षयाय.

76. B. C. दाशरथिर्ज्येष्ठः for राम इति ख्यातः. D. has the following for the first line:—कुर्यां राम इति ख्यातो भूत्वा भर्तुः सुरद्विषाम्. Agreeing with the Sinhalese edition. C. शीर्षच्छेदपराजयम् for शिरश्छेदपराभवम्.

77. C. उदीर्यासौ for उदाहृत्य. D. Fr. मुमोच for तत्याज.

78. D. Fr. उरगपतिः for भुजगपतिः. D. Fr. ग्लानेः for खेदात्.

79. B. नीरस्पर्श°, C. वारिस्पर्श° for भूमिस्पर्श°. B. सहसा for तरसा. D. देव्या, for लक्ष्म्या. C. अंशशिखरे, D. अंगशिखरे for अंसशिखरे. D. Fr. रक्तलोचनयुगः for ताम्रलोचनयुगः. D. प्रभुः for हरिः.

तृतीयः सर्गः ।

अथ श्रियः प्राणसमस्य तस्य
 ज्ञात्वा विविक्षामिव मर्त्यधाम ।
पूर्वावतीर्णः सुमनःसमृद्ध्या
 सम्यग्वसन्तो भुवनं ततान ॥ १ ॥

भ्रान्त्वा विवस्वानथ दक्षिणाशा-
 मालम्ब्य सर्वत्र करप्रसारी ।
ऋत्विक् ततो निःस्व इव प्रतस्थे
 वसूपलब्ध्यै धनदस्य वासम् ॥ २ ॥

वृक्षा मनोज्ञद्युति चम्पकाख्या
 रूपं वितेनुर्नवकुड्मलाढ्याः ।
न्यस्ता वसन्तस्य वनस्थलीभिः
 सहस्रदीपा इव दीपवृक्षाः ॥ ३ ॥

सम्पिण्डितात्मावयवा उदीयुः
 पद्मा नवाः कण्टकितोर्ध्वदण्डाः ।
अन्तर्जलावासविरूढशीत-
 त्रस्ता वसन्तातपकाम्ययेव ॥ ४ ॥

---

1. A. reads the following for our text:—अथो वसन्तः सुमनः समृद्धा पूर्वावतीर्णा भुवनं ततान । तस्य श्रियः प्राणसमस्य सम्यग् ज्ञात्वा विविक्षामिव मर्त्यधाम. Agreeing with the Sinhalese edition. D. Fr. अथो for अथ. C. मत्वा for ज्ञात्वा. D. Fr. मर्त्यसद्म. for मर्त्यधाम. Fr पूर्वावरूढः for पूर्वावतीर्णः.

2. C. क्रान्त्वा, D. क्रन्त्वा for भ्रान्त्वा. D. Fr. यत्रोपलब्धः for वसूपलब्ध्यै. D. Fr. वासः for वासं. D. Fr. agree with the सुभाषितावली.

3. B. reads the first two lines thus:-रूपं वितेनुर्नवकुड्मलाढ्या वृक्षा मनोज्ञद्युति चम्पकाख्याः. Agreeing with the Sinhalese edition. C. द्रुमाः for वृक्षाः. D. चम्पकाख्यरूपं, Fr. चम्पकाक्षरूपं for चम्पकाख्यारूपं. D. Fr. °कुड्मलाढ्याः for °कुड्मलाढ्याः.

4. D. Fr. °विरूढशैत्यक्लिष्टाः for °विरूढशीतत्रस्ताः. Corrected to this in the margin of Fr.

कर्णे कृतो दीर्घविलोचनाना-
मालोलदृष्टिद्युतिभिन्नरागः ।
बालोऽप्यशोकप्रभवः प्रवालः
कान्तिं प्रपेदे परिणामगम्याम् ॥ ५ ॥

प्रादुर्बभूवुर्नवकुड्मलानि
स्फुरन्ति कान्त्या करवीरजानि ।
प्रवासिनां शोणितपाटलानि
तीरीफलानीव मनोभवस्य ॥ ६ ॥

वन्ध्योऽपि सालक्तकपादघातं
लब्ध्वा रणन्नूपुरमङ्गनानाम् ।
उद्भूतरोमांच इवातिहर्षात्
पुष्पांकुरैरास नवैरशोकः ॥ ७ ॥

महीध्रमूर्ध्नि भ्रमरेन्द्रनीलै-
र्विभक्तशोभः शिखिकण्ठनीलैः ।
गृहीतभास्वन्मुकुटानुकार-
स्ततान कान्तिं नवकर्णिकारः ॥ ८ ॥

---

5. B. वृतः for कृतः. C. ह्यायतलोचनानां for दीर्घविलोचनानां. D. वालः for बालः. D. Fr. प्रबालः for प्रवालः. C. प्रभां, D. Fr. दीप्तिं for कान्तिं. D. Fr. °रम्याम् for °गम्याम्.

6. D. Fr. आविर्बभूवुर्नवकुड्मलानि for प्रादुर्बभूवुर्नवकुड्मलानि. D. Fr. मनोभुवस्य for मनोभवस्य.

7. D. बन्ध्योऽपि for वन्ध्योऽपि. D. Fr. रटन्नूपुरं for रणन्नूपुरं. D. Fr. इव प्रहर्षात् for इवातिहर्षात्.

8. D. Fr. °काले [लैः] for °नीलैः. D. Fr. दीप्तिं for कान्तिं. Fr. °कर्णिकोरः for °कर्णिकारः.

वासन्तिकस्यांशुचयेन भानो-
हेंमन्तमालोक्य हतप्रभावम् ।
सरोरुहामुद्धृतकंटकेन
प्रीत्येव रम्यं जहसे वनेन ॥ ९ ॥

समीरणानर्तितमंजरीके
चूते निसर्गेण निषक्तभावाः ।
पुष्पावतंसेषु पदं न चक्रु-
र्दीप्तेष्विवाशोकवनेषु भृंगाः ॥ १० ॥

विनिद्रपुष्पाभरणः पलाशः
समुल्लसत्कुन्दलतावनद्धः ।
उद्धूतभस्मा मधुनेव रेजे
राशीकृतो मन्मथदाहवह्निः ॥ ११ ॥

वसन्तदीप्तातपखेदितानां
महीरुहां वातचलाः प्रवालाः ।
जिह्वा यथा विद्रुमभङ्गताम्रा
निष्कासिता रेजुरतिश्रमेण ॥ १२ ॥

---

9. D. Fr. अंशुगणेन for अंशुचयेन. Corrected to अंशुगणेन in the margin of D. रम्यं जहासे धृतकण्टकेन प्रीत्या वनेनेव सरोरुहाणाम्, Fr. वनेन प्रीत्या प्रचुरं जहासे for प्रीत्येव रम्यं जहसे वनेन. D. agrees with the Sinhalese edition. these readings appear to us ungrammatical and incorrect.

10. D. प्रभंजनानर्तित° for समीरणानर्तित°. Corrected प्रभंजनानर्तित° in the margin of Fr. But the original reading is distinctly clear.

11. C. विभिन्न°, D. प्रफुल्ल°, Fr. प्रफुल्त° for विनिद्र°. D. Fr. °लतानिबद्धः for °लतावनद्धः. D. Fr. पुंजीकृतः for राशीकृतः.

12. D. वायुचलाः for वातचलाः D. प्रवालाः for प्रवालाः.

प्रालेयकालप्रियविप्रयोग-
ग्लानेव रात्रिः क्षयमाससाद ।
जगाम मन्दं दिवसो वसन्त-
क्रूरातपश्रान्त इव क्रमेण ॥ १३ ॥

ततः स्मरस्याहवधामकल्पं
क्षोणीपतिर्भ्रान्तशिलीमुखाङ्कम् ।
उद्यानमासेवत रक्तदीप्ति-
संतानभास्वत्करवीरकीर्णम् ॥ १४ ॥

रम्याणि रामानुगतो विहङ्ग-
पक्षानिलानर्तितपल्लवानि ।
उद्भ्रान्तभृङ्गाणि लतागृहाणि
संभावयामास रहोविहारैः ॥ १५ ॥

त्वमप्रमादं कुरु नूपुराङ्घ्रौ
भर क्षणं कांचि नितम्बभारम् ।
इतीव तस्मिन्विहरन्नृपस्त्री-
कक्ष्यातुलाकोटिपुटैर्निनेदे ॥ १६ ॥

---

13. C. °म्लानेव, D. Fr. °ग्लानश्च for °ग्लानेव. D. Fr. नक्तं for रात्रिः. Fr. इयाय for जगाम. D. °क्लान्तः for °श्रान्तः.

14. C. °सद्मकल्पं, D. °भूम [मि]-कल्पं for °धामकल्पं.

15. C. बालानुगतः, D. रामानुसृतः for रामानुगतः. C. पतंगपत्रानिलाकम्पितपल्लवानि, D. शकुन्तपक्षानिलाकम्पितपल्लवानि, Fr. पतंगपत्रानिलानर्तितपल्लवानि for विहंगपक्षानिलानर्तितपल्लवानि. D. संमानयामास, Fr. संपूजयामास for संभावयामास.

16. D. Fr. नन्वप्रमादं for त्वमप्रमादं. C. भरस्व त्वं कांचि, D. धरस्व त्वं कांचि for भर क्षणं कांचि. D. नृपस्त्रीकक्षा° for नृपस्त्रीकक्ष्या°.

चिक्षेप बाला मुहुरर्धदृष्टिं
पत्यावनङ्गक्षतधैर्यवृत्तिः ।
दूरस्थपुष्पस्तबकावभङ्ग-
व्याजेन संदर्शितबाहुमूला ॥ १७ ॥

पत्या परस्या नु विधीयमाने
विलासवत्याश्चरणान्तरागे ।
अन्यत्र युक्तोऽपि बबन्ध रागं
लाक्षारसस्तत्प्रतिपक्षनेत्रे ॥ १८ ॥

पातुं सुदत्या वदनारविन्द-
मादाय दृष्टो ललनाभिरीशः ।
अपुष्परेणुव्यथितेऽपि तस्या-
श्चिक्षेप नेत्रे मुखगन्धवाहम् ॥ १९ ॥

पुष्पावभङ्गे निजहस्तकान्त्या
विन्यस्तरागं कठिनं पलाशं ।
प्रवालकृत्ये विनियोजयन्ती
भर्त्रा परा सस्मितमालिलिङ्गे ॥ २० ॥

---

17. C. ददौ हि बाला मुहुरर्धचक्षुः, D. ददौ हि रामा मुहुरर्धदृष्टिं, Fr. चिक्षेप बाला मुहुरर्धचक्षुः for चिक्षेप बाला मुहुर्धदृष्टिं. B. भर्तर्यनंगक्षित°, Fr. पतावनंगक्षित° for पत्यावनंगक्षत°. D. स्तवकावभंग°. for स्तबकावभंग°.

18. B. परस्याः प्रविधीयमाने, C. परस्याश्च, D. परस्यास्तु, Fr. परस्या हि for परस्या नु. Corrected परस्या हि in the margin of Fr. B. agreeing with the Sinhalese edition.

19. C. सुतन्व्याः, D. सुमुख्याः for सुदत्याः. D. Fr. प्रमदाभिः for ललनाभिः. C. °गन्धवातम् for °गन्धवाहम्.

20 Fr. प्रबालकृत्ये for प्रवालकृत्ये. D राज्ञा for भर्त्रा. C. सस्पृहं for सस्मितं. Corrected to सस्पृहं in the margin of C. The original reading is blotted with yellow fluid.

स्निग्धद्विजालीरुचिरं प्रियङ्गु-
श्यामद्युतिश्चारुतमालकान्ता ।
बिभर्षि गन्धाहृतभृङ्गचक्रं
सन्माधवीमण्डपमेतदास्यम् ॥ २१ ॥

मध्येललाटं तिलकस्य वृत्ति-
रोष्ठद्युतिर्भाति च पाटलेयम् ।
पुन्नागसंयोगविभूषिताया-
श्चेतश्च ते यातमशोकभावम् ॥ २२ ॥

किं कौतुकेन श्रमकारिणा ते
सृज त्वमुद्यानविहाररागम् ।
बाले त्वमस्योपवनस्य लक्ष्मी-
रित्येवमूचे ललना सखीभिः ॥ २३ ॥

प्रियेण कर्णे विनिवेशितस्य
तन्व्या नवाशोकदलस्य रागः ।
आनीलया नेत्ररुचा निरस्त-
स्तस्या जगामेव विपक्षचक्षुः ॥ २४ ॥

---

21. D. Fr. °सुभगं for °रुचिरं. C °भृंगवृन्दम् for °भृंगचक्रम्.

22. C. मध्येकपोलं for मध्येललाटं. D. Fr. चेतः समायातमशोकतान्तें for चेनश्च ते यातमशोकभावम्. D. Fr. agree with the Sinhalese edition.

23. C. मुञ्चस्व तूद्यानविहाररागं, D. त्यजत्वमुद्यानविलासरागं, Fr. सृजस्व तूद्यानविहाररागं for मृजत्वमुद्यानविहाररागं. C. तन्वि for बाले. D. प्रमदा for ललना.

24. B. reads the first two lines thus:-प्रियेण तन्व्या विनिवेशितस्य कर्णे नवाशोकदलस्य रागः. Agreeing with the Sinhalese edition. C. कान्तेन कर्णे विनिवेशितस्य, D. प्रियेण श्रोत्रे विनिवेशितस्य for प्रियेण कर्ण विनिवेशितस्य. The reading of D. is Corrupt. D. दृष्टिरुचा for नेत्ररुचा.

हारिप्रलापोऽथ निधिर्गुणानां
  निधाय चक्षुर्मदमन्दपातम् ।
पर्यन्तभूमौ निकटोपयाता-
  मुवाच वाचं प्रतिहाररक्षीम् ॥ २५ ॥

कुर्वन्ति लोभेन विलोकयन्त्यः
  कुरङ्गनेत्रा विलसत्प्रसूनम् ।
शुभाभिरेनं नयनप्रभाभिः
  शारत्विषं पुष्पतरुं तरुण्यः ॥ २६ ॥

विभाति भृङ्गीसरणी सरन्ती
  गन्धाहृता चम्पककुड्मलाग्रे ।
अन्तं प्रदीपस्य निषेवमाणा
  धूमावली कज्जलरेखिणीव ॥ २७ ॥

विलोकयाक्ष्णोः शितिकान्तिजालै-
  रुदन्यया वारिविगाहितायाः ।
रक्तोत्पलं तन्निकटप्ररूढ-
  मिन्दीवरत्वं गमितं हरिण्याः ॥ २८ ॥

---

25. C. हारिप्रवादोऽथ for हारिप्रलापोऽथ. D. आधाय, Fr. निक्षिप्य for निधाय. C. नेत्रं, D. नेत्रे for चक्षुः. D मदमन्दपाते for मदमन्दपातम्. D. प्रतिहार-रक्षां for प्रतिहाररक्षीं.

26. B. शुभाभिरेनं नयनप्रभाभिर्विलोकयन्त्यो विलसत्प्रसूनम् । कुर्वन्ति लोभेन कुरङ्गनेत्राः, C. कुरंगनेत्रा विलसत्प्रसूनम् । कुर्वन्ति लोभेन विलोकयन्त्यः for कुर्वन्ति लोभेन विलोकयन्त्यः । कुरंगनेत्रा विलसत्प्रसूनम्. C. पुण्याभिः, Fr. शिवाभिः for शुभाभिः. D. Fr. युवत्यः for तरुण्यः. B. agrees with the Sinhalese edition.

27. D. Fr. °कुड्मलाग्रे for °कुड्मलाग्रे. D. Fr. धूमावलिः for धूमावली. C. कज्जललेखिनीव for कज्जलरेखिणीव.

28. D. Fr. °कान्तिपुञ्जैः for °कान्तिजालैः. Fr. पिपासया for उदन्यया. C. नीर°, Fr. तोय° for वारि°. Corrected to तोय° in the margin of Fr.

संच्छादिते पद्मरजोवितानैः
परिभ्रमन्वारिणि राजहंसः ।
स्ववर्त्मरेखाभिरसौ विभज्य
प्रयच्छतीवाब्जवनं खगेभ्यः ॥ २९ ॥

इयत्प्रमाणोऽपि सरःप्रदेश-
स्तव प्रसादेन ममास्तु भोग्यः ।
इत्येष संदर्शयतीव मद्गु-
र्हंसाय शोषाय विसारितांसः ॥ ३० ॥

पद्मः सितोऽयं पवनावधूतै-
र्निर्धौतरागो नु तरङ्गलेशैः ।
संभावितो नु द्रुहिणेन तावत्
कृतादिकर्मापि न यावकेन ॥ ३१ ॥

ततः सलीलं सलिलं विभिन्द-
न्नेवं वदन्नेव वराङ्गनाभिः ।
वृतो वृषेन्द्रोपमखेलगामी
स दीर्घिकां दीर्घभुजो जगाहे ॥ ३२ ॥

---

29. D. प्रच्छादिते, Fr. आच्छादिते for संछादिते. D. पद्मरजःपिधानैः for पद्मरजोवितानैः. C. D. परिक्रमन् for परिभ्रमन्. A. B. स्वमार्गलेखाभिः for स्ववर्त्मरेखाभिः. C. D. द्विजेभ्यः for खगेभ्यः.

30. D. प्रसारितांशः, Fr. प्रसारितांसः for विसारितांसः. Corrected to प्रसारितांसः in the margin of Fr.

31. D. सितोऽथ पद्मः पवनावधूतैः for पद्मः सितोऽयं पवनावधूतैः. C. निर्णिक्तरंगो नु तरंगलेशैः, D. निर्णिक्तरागो नु तरंगलेशैः for निधौतरागो नु तरंगलेशैः. D. संमानितो नु द्रुहणेन तावत् for संभावितो नु द्रुहिणेन तावत्.

32. C. तदा for ततः. C. Fr. विभंजन् for विभिन्दन्.

तस्योरसि क्षत्रकुलैककेतो-
स्तरङ्गदोषा कमलाकरेण ।
न्यस्ता मुहुः पङ्कजरेणुपंक्तिः
सौवर्णसूत्रश्रियमाततान ॥ ३३ ॥

पद्माकरो वारि विगाहमानं
कामीव रामाजनमूरुदघ्नम् ।
वीचीकराग्रेण नितम्बभागे
व्यास्फालयामास शनैः सशब्दम् ॥ ३४ ॥

तस्यावगाहे वनिताजनस्य
दूरीकृतः पीननितम्बचक्रैः ।
लब्धप्रवेशस्तनुपूदरेषु
स्तनैरुदासेऽथ सरस्तरङ्गः ॥ ३५ ॥

क्रीडापरिक्षोभरयेण तासा-
मुत्सारिते पङ्कजरेणुजाले ।
कुसुम्भरक्तादिव कञ्चुकात्तत् ।
कृष्टं बभासेऽम्बुरुहाकराम्भः ॥ ३६ ॥

---

33. D. क्षात्र° for क्षत्र°. D. Fr. °पांसुपंक्तिः for °रेणुपंक्तिः. D. हैरण्य° for सौवर्ण°.

34. C. वामाजनं, D. बालाजनं, Fr. योषाजनं for रामाजनं. D. भंगीचयाग्रेण for वीचीकराग्रेण. C. नितम्बदेशे for नितंबभागे.

35. C. ललना°, D. महिला°, Fr. रमणी° for वनिता°. D. Fr. प्रोत्सारितः for दूरीकृतः. C. °बिम्बैः, D. °वारैः, Fr. °वृन्दैः for °चक्रैः.

36. C. केली°, D. खेला° for क्रीडा°. D. Fr. दूरीकृते for उत्सारिते. D. °पांशुपाशे, Fr. °पांसुजाले for °रेणुजाले. B. कुसुंभरक्तात, C. कुसुंभशोणात्, D. कौसुंभताम्रात्, Fr. कुसुंभताम्रात् for कुसुंभरक्तात्.

रामाभिरुत्कण्टकदण्डमग्रे
संभावितं न च्छिदया सरोजम्
इन्दीवराणामुदहारि पंक्ति-
र्दीप्ता मृदुष्वेव जनस्य शक्तिः ॥ ३७ ॥

बालापरिष्वंगसुखाय पत्यु-
रन्तर्जलावारितमूर्ति यातुः
विघ्राय वैमल्यमपां बभूव
व्यर्थः प्रसादो हि जलाशयानाम् ॥ ३८ ॥

भृंगा निलीनेन सरोजखण्डे
योषिद्द्वितीयेन नराधिपेन
उत्सारिता वक्तुमिवापरासां
कर्णान्तमीयुर्निहितावतंसम् ॥ ३९ ॥

नृपेण केलीकलहेऽपरस्या-
श्छिन्नच्युतस्याम्बुजिनीपलाशे
हारस्य वीचीकणिकाः समीपे
पूर्वस्थिताः संवरणान्यभूवन् ॥ ४० ॥

---

37. D. कान्ताभिः for रामाभिः. Fr. °नालं for °दण्डं D. संमानितं for संभावितं. C. राजिः for पंक्तिः.

38. A. अन्तर्जलावारितमूर्ति यातुर्बालापरिष्वंगसुखाय पत्युः, B. अन्तर्जलावारितमूर्तिघाता° [second line is conpletely blotted], D. रामापरिष्वंगसुखस्य कन्धेरन्तर्जलावारितमूर्ति यातुः, Fr. बालापरिष्वंगसुखस्य हेतोरन्तर्जलावारितमूर्ति यातुः for the first two lines of our text. A. B. agree with सूक्तिमुक्तावली. D. Fr. नैर्मल्यं for वैमल्यं. A. व्यर्थः प्रयासो हि जलाशयानां, B. वृथा प्रयासो हि जडाशयानां, D. सुधा प्रसादो हि जडाशयानां for व्यर्थः प्रसादो हि जलाशयानां. A. agrees with the सूक्तिमुक्तावली.

39. B. C. सरोजषण्डे for सरोजखण्डे. D. योषाद्द्वितीयेन, Fr. कान्ताद्द्वितीयेन for योषिद्द्वितीयेन. Fr. जनाधिपेन for नराधिपेन. D. प्रोत्सारिताः for उत्सारिताः.

40. C. भूपेन for नृपेण. D. अंबुजिनीप्रपण for अंबुजिनीपलाशे.

क्रीडाविमर्दे वलयस्य भिन्न-
भ्रष्टस्य चिक्षेप विकृष्य खण्डम्
स्वच्छे जले बालमृणालभङ्ग-
शंकाहृतः शंखमयस्य हंसः ॥ ४१ ॥

रोधोलतामण्डपयातकान्ता-
संभोगतः सर्पति कांचिनादे
ररक्ष राजानमथ व्यलीका-
दुत्त्रासमुक्तः कलहंसनादः ॥ ४२ ॥

निरुद्धहासस्फुरिताधरोष्ठः
सद्यःसमाविष्कृतरोमहर्षः ।
जलावमग्नप्रमदोपगूढे-
रुद्भासकस्तस्य बभूव गण्डः ॥ ४३ ॥

फुल्लं यदीदं कमलं किमेव-
मत्रैव नीलोत्पलयोर्विकाशः
इत्यात्तशंको वदनं सुदत्या
हंसः सिषेवे न सरस्तरन्त्याः ॥ ४४ ॥

---

41. B. लीलाप्रमाथे, C. लीलाविमर्दे, D केलीविमर्दे for क्रीडाविमर्दे. D. बलयस्य for वलयस्य. D. अच्छे जले, Fr. अच्छोदके for स्वच्छे जले.

42. A. B. रोधोलताकुञ्जवनेतबालासंभोगतः for रोधोलतामण्डपयातकान्तासंभोगतः. C. D. इति for अथ.

43. D. संरुद्ध° for निरुद्ध°. D. °स्फुरिताधरौष्ठः for स्फुरिताधरोष्ठः. C. °लोमहर्षः for °रोमहर्षः. Fr. नीरावमग्न° for जलावमग्न°. D. Fr. गल्लः for गण्डः.

44. C. नलिनं for कमलं. D. विकासः for विकाशः. Fr. लपनं for वदनं. Corrected to लपनं in the margin of Fr.; D. सुमुख्याः for सुदत्याः.

सुगन्धिनिश्वासगुणावकृष्टं
मुखे पतन्तं करपल्लवेन ।
दुर्वारमन्तःसलिलप्रवेशात्
तत्याज काचिद्भ्रमरीसमूहम् ॥ ४५ ॥

मत्स्येन चीनांशुकपृष्ठलक्ष्य-
कांचीमणिग्रासकुतूहलेन ।
आघ्राय मुक्तोपनितम्बमेका
संत्रासभुग्नभ्रु चिरं चकम्पे ॥ ४६ ॥

तत्याज नो सव्यपदेशमन्या
व्युदस्तव्रात्साः सलिलं नृपेण ।
स्थानप्रयुक्तः कपटप्रयोगः
क्वचिद्विपत्तोर्हि जनं भुनक्ति ॥ ४७ ॥

हृतान्तरीया हृदयेश्वरेण
व्रीडोपतप्ता पयसः प्रसादात् ।
व्यर्थप्रणामाश्रुनिपातवृत्तिः
काचिज्जलं संभ्रमयाश्चकार ॥ ४८ ॥

---

45. C. °गुणोपकृष्टं for °गुणावकृष्टं. C. मुखे भ्रमन्तं, D. आस्ये भ्रमन्तं, Fr. आस्ये पतन्तं for मुखे पतन्तं. D. मुमोच for तत्याज.

46. C. D. °दृश्य° for °लक्ष्य°. Corrected to °दृश्य° in the margin of D.; C. D. चाघ्राय for आघ्राय. C. reads this verse after the 44th stanza of our text.

47. C. has the following for the last two lines:—स्थानप्रयुक्तो हि जनं भुनक्ति क्वचिद्विपत्तेः कपटप्रयोगः. Agre-ing with the Sinhalese edition. D. स्थाने प्रयुक्तः for स्थानप्रयुक्तः. Fr. बिभर्ति for भुनक्ति.

48. Fr. हृतोत्तरीया for हृतान्तरीया. D. लज्जोपतप्ता for व्रीडोपतप्ता. D. Fr. संभ्रमयाम्बभूव for संभ्रमयाश्चकार. Corrected to °चकार in the margin of D. The original reading though blotted by yellow colour appears to be °बभूव.

साभि प्रबुद्धस्य कुशेशयस्य
　　कोशे मुखन्यासनिरुद्धदृष्टिम् ।
स्प्रष्टुं प्रयेते कलहंसशावं
　　निःशब्दमुत्खण्डितवीचि काचित् ॥ ४९ ॥

संक्षोभितोद्दामसरस्तरङ्ग-
　　क्षिप्ता किलैका नृपतिं कुचाभ्याम् ।
आहत्य धृष्टत्वकृतापवाद-
　　व्यपायरम्यं मुहुराललम्बे ॥ ५० ॥

अन्या पुराणं निजमेव वीचि-
　　विक्षालिताङ्गेऽधिपतेः पृथिव्याः
पदं नखस्य स्फुटकुङ्कुमाङ्कं
　　दृष्ट्वा परं संशयमाललम्बे ॥ ५१ ॥

किं राजहंसस्य शशाङ्कबिम्ब-
　　च्छायामुषश्चञ्चुरियं प्रवालैः
बद्धा गन्धोज्ज्वलकेशराग्र-
　　च्छेदेषु दिग्धा नु सरोजकान्त्या ॥ ५२ ॥

---

49. D. ईषत्प्रबुद्धस्य, Fr. किञ्चित्प्रबुद्धस्य for साभि प्रबुद्धस्य. C. मुखाधान निरुद्ध° for मुखन्यासनिरुद्ध°. C. D. धर्तुं for स्प्रष्टुं B. स्प्रष्टुं व्ययासीत्कलहंसशावम् for स्पष्टुं प्रयेते कलहंसशावम्. Agreeing with the Sinhalese edition. C. D. उत्खण्डितवीचिरन्या for उत्खण्डितवीचि काचित्.

50. C. क्लिकैकाऽवनिपं, D. क्लिकैकाऽर्थपातिं for किलैका नृपातिं. C. agreeing with the Sinhalese edition. D. स्तनाभ्याम् for कुचाभ्याम्. Fr. व्याहत्य for आहत्य.

51. D. Fr. have the following for the first three lines:—नखस्य मार्गं निजमेव वीचिविक्षालितांगे स्फुटकुंकुमांकम् । पुराणमन्याऽधिपतेः पृथिव्याः. D. काचित् for अन्या. C. धरायाः for पृथिव्याः. C. नखानाम् for नखस्य. D. आजगाहे for आललम्बे.

52. C. मृगांक° for शशांक°. D. प्रवालैः for प्रवालैः. C. नद्धा for बद्धा. D. Fr. °दीप्त्या for °कान्त्या.

भृङ्गोऽयमिन्दीवरमध्यपात-
सञ्चारितैस्तद्युतिरञ्जितो नु ।
निधाय वायं निजपक्षशोभा-
मादत्त नु स्वाङ्गुमतः परागम् ॥ ५३ ॥

पद्मा पदं पद्मवने विभिन्न-
वीचीकणार्द्रदतयावकाङ्कम् ।
चक्रे चिरं चारुतया नु लोभा-
दित्यास कासामपि तत्र तर्कः ॥ ५४ ॥

यातो नु भृङ्गः पतितः पुरास्मिन्
वीजत्वमेवं नु विरिञ्चिसृष्टिः ।
विपाकनीलद्युति पद्मबीजं
कोशादुदस्येति कयाचिदूचे ॥ ५५ ॥

प्रियोऽपरस्या गलितान्तरीये
व्यापारयामास दृशौ नितम्बे
तद्धस्तयंत्रच्युतवारिधारा
नालं बभूवास्य मुखारविन्दे ॥ ५६ ॥

सायं समादाय निकामपीत-
सुप्तद्विरेफं मुकुलं सरोजम् ।

---

53. C. स्वपक्षशोभाप्लुत सन्निधाय, D. Fr. निधाय व[वा]यं निजपक्षशोभा for निधाय वायं निजपक्षशोभां. C. agreeing with the Sinhalese edition. A. B. पिधाय for निधाय.

54. D. Fr. अनुभिन्नभंगी° for विभिन्नवीची°. C. D. चारुतमा for चारुतया. D. Fr. चात्र for अत्र.

55. D. Fr. वीजत्वं for वीजत्वं. D. Fr. पद्मवीजं for पद्मवीजं.

56. C. निसृत° for गलित°. C. सम्प्रेरयामास, D. आपातयामास for व्यापारयामास. C. °नीरधारा, D. °तोयधारा for °वारिधारा. C. D. नालः for नालं.

57. D. नक्तं for सायं. D. Fr. समालभ्य for समादाय. C. D. °दीर्घदण्डं

काचित्करास्फालितदीर्घदण्डा
भर्तुर्भुवः कूजयति स्म कर्णे ॥ ५७ ॥

सा पद्मिनी पद्मविलोचनेभ्यो
याते पतङ्गे विससर्ज भृङ्गान् ।
समुच्छ्वसत्कामुदगन्धलुब्धान्
स्थूलानिवोढाञ्जनबाष्पबिन्दून् ॥ ५८ ॥

नूनं पती स्थावरजङ्गमानां
पर्यायविश्रामपरार्थतन्त्रौ ।
एकत्र मज्जत्यधिवारि सिन्धो-
रन्यो जहौ तत्कमलाकराम्भः ॥ ५९ ॥

सरोजिनी तत्परिभुक्तमुक्ता
मूर्च्छातुरेव स्तिमिता विरेजे ।
निद्राहृताम्भोजनिमीलिताक्षी
रुग्णं मृणालीवलयं दधाना ॥ ६० ॥

कृतोपकारस्य निधाय जग्मु-
र्द्वयं द्वयोरम्बुरुहाकरस्य ।
भृङ्गावलीष्वञ्जनमायताक्ष्यः
पद्मेषु दन्तच्छदयावकं च ॥ ६१ ॥

---

for °दीर्घदण्डा. A. C. पत्युः पृथिव्याः लगति स्म कर्णे for भर्तुर्भुवः कूजयति स्म कर्णे.

58. D. Fr. वाष्पविन्दून् for बाष्पबिन्दून.

59. C. D. वासरजंगमानाम् for स्थावरजंगमानाम्. Agreeing with the Calcutta and Sinhalese editions.

60. A. B. read this verse in the following way:—सरोजिनी तत्परिभुक्तमुक्ता निद्राहृताम्भोजनिमीलिताक्षी । रुग्णं मृणालीवलयं दधाना मूर्च्छातुरेव स्तिमिता विरेजे.

61. D. Fr. भृंगावलिषु for भृंगावलीषु.

सरः सहंसं सह कामिनीभि-
विहाय तुल्यो वृषवाहनस्य ।
विभूषितो लंबितभषजानि-
रध्यास्त सौधं वसुधाधिनाथः ॥ ६२ ॥

आकृष्टदृष्टिर्गगनस्य लक्ष्म्या
लक्ष्मीभुजा वासरसन्धिभाजः ।
काचित्कुचानम्रतनुर्वभाषे
बाला सवालव्यजनैकपाणिः ॥ ६३ ॥

सकुङ्कुमस्त्रीकुचमण्डलद्युतिः
प्रवासिनां चेतसि चिन्तयातुरे ।
निधाय तापं तपनः पतत्यसौ
विलोलवीचावपरान्तसागरे ॥ ६४ ॥

इयं तनुर्वासरसन्धिचारिणी
जगत्सृजो विद्रुमभङ्गलोहिनी ।
समं विधत्ते मुकुलं सरोरुहै-
र्हिरण्यबाहोरपि हस्तपङ्कजम् ॥ ६५ ॥

अयं प्रमाणं पयसः पयोनिधौ
निमज्ज्य संदर्शयतीव भानुमान्

---

62. B. सुन्दरीभिः, D. भामिनीभिः for कामिनीभिः. Fr. विसृज्य for विहाय.

63. D. Fr. आकृष्टचक्षुः for आकृष्टदृष्टिः. B. C. गगणस्य for गगनस्य. D. Fr. पद्माभुजा for लक्ष्मीभुजा.

64. D. Fr. °स्तनवर्तुल° for °कुचमण्डल°. A. B. प्रवासिनीचेतसि for प्रवासिनां चेतसि. D. Fr. विधाय for निधाय. D. Fr. °भंगावपरान्त° for °वीचवपरान्त°. A. B. agreeing with the Sinhalese edition.

65. D. Fr. °कारिणी for °चारिणी. D. Fr. जगत्कृतः for जगत्सृजः. Fr. मकुलं for मुकुलं.

66. C. D. वीचीबलयस्य for वीचिवलयस्य. B. C. read this verse after the 67th stanza of our text.

करेण वीचीवलयस्य मस्तके
विभाव्यमानस्फुरिताग्रकोटिना ॥ ६६ ॥

विकीर्णसन्ध्यारुणितं शतक्रतो-
र्दिशः प्रदेशादभिनिष्पतत्तमः ।
पतङ्गतेजःपरितापलोहितं
जगत्क्रमेण व्रजतीव निर्वृतिम् ॥ ६७ ॥

हिमांशुविम्बे पुरुहूतदिङ्मुख-
स्मितश्रियं बिभ्रति कोमलद्युतौ ।
विसृज्यमानं तमसा नभस्तलं
जहाति निर्मोकमिवाञ्जनत्विषा ॥ ६८ ॥

अथैवमस्यावसरे वचःश्रियः
समीक्ष्य निष्ठामुपनीतमास्थया ।
अपाययन्त प्रमदा मदालसाः
स्खलद्गिरास्तं मधु लम्भितादराः ॥ ६९ ॥

प्रियोपनीतं पिबतोऽधिवासितं
नपस्य गण्डूषमध प्रकामतः ।
बभूव दन्तच्छदपल्लवस्तदा
निपीतपानावसरोपदंशकः ॥ ७० ॥

---

67. C. प्रकीर्ण°, D. प्रमृप्त°, Fr. विसृप्त° for विकीर्ण°. C. D. मरुत्वतः for शतक्रतोः.

68. D. Fr. हिमांशुविम्बे for हिमांशुबिम्बे. B. C. विहीयमानं for विसृज्यमानं.

69. D. Fr. विलोक्य पानामुपनीतमास्थया for समीक्ष्य निष्ठामुपनीतमास्थया. The marginal note on Fr. says:—पानामापानभूमिमित्येके. But not in the same ink as that of its text.

70. C. °सरोपदशकः, D. Fr. °सरावदंशकः for °सरोपदंशकः.

प्रियेण वध्वा मधुलासितोत्पलं
विपक्षगोत्रेण निगद्य लम्भितम् ।
अपीतमप्याक्षि विधाय रागवत्
ततान सद्यः श्रमवारि गण्डयोः ॥ ७१ ॥

त्विषा मुखेन्दोर्मुकुलत्वमम्बुजे
करेण नीते सति शर्वरीकृतः ।
प्रियेक्षणस्य प्रतिविम्बमाचरत्
सरोजकृत्यं मधुभाजि भाजने ॥ ७२ ॥

यियासुना पङ्कजगर्भसौरभं
मुखं तदीयं प्रतिबिम्बमूर्तिना
समन्मथेनेव तरङ्गितासवे
मुहुश्चकम्पे चषके हिमांशुना ॥ ७३ ॥

विलासवत्यो मदघूर्णलोचना
निरूपयन्त्यः शचिरूप्यभाजने ।
स्थितस्य मुग्धा मधुनो न जज्ञिरे
स्वरूपमिन्दुप्रतिरूपगोपितम् ॥ ७४ ॥

विधय मानादपि पूर्वमासवः
प्रवृद्धवामत्वमनन्यसाधितम् ।

---

71. D. नृपेण for प्रियेण. D. पत्न्याः for वध्वाः. C. गल्लयोः for गण्डयोः. A. B. विपक्षगोत्रेण नृपेण लंभितं निगद्य वध्वा मधुलासितोत्पलं for प्रियेण वध्वा मधुलासितोत्पलं विपक्षगोत्रेण निगद्य लंभितं.

72. D. Fr. प्रतिविम्बं for प्रतिबिम्बं.

73. D. समीरितासवे for तरंगितासवे. D. भृशं for मुहुः. Corrected to भृशं in the margin of D.

74. B. C. मदघूर्णितेक्षणा for मदघूर्णलोचना. D. विलोकयन्त्यः for निरूपयन्त्यः. B. शुचिरौप्य°, C. शुचिश्वेत° for शुचिरूप्य°. C. Breaks the metre.

स्मरं नु तासां हृदये विलोचने
ववन्ध रागं नु मुखे नु सौरभम् ॥ ७५ ॥

इति प्रवन्धाहितपानकातरं
प्रियाङ्कतल्पे शयितं निशात्यये ।
व्यबोधयन्मङ्गलवन्ति वन्दिनो
विधाय वाक्यानि विधातृतेजसम् ॥ ७६ ॥

जहिहि शयनमुद्गमस्य कालः
समुपनमत्यनुरक्तमण्डलस्य ।
भवनशिरसि कीर्णपादधाम्नो
भवत इव क्षततामसस्य भानोः ॥ ७७ ॥

विरामः शर्वर्या हिमरुचिरवाप्तोऽस्तशिखरं
किमद्यापि स्वापस्तव मुकुलिताम्भोरुहदृशः ।
इतीवायं भानुः प्रमदवनपर्यन्तसरसीं
करेणाताम्रेण प्रहरति विबोधाय तरुणः ॥ ७८ ॥

समुत्तिष्ठन्त्येते निगडकृतझङ्कारमपरं
शनैराकषन्तः करटतटलीनालिविततीः ।
निरस्यन्त्यो हेलाविधुतपृथुकर्णान्तपवनै-
र्द्विपास्ते दन्ताग्रस्थितकरमुदस्याननतटम् ॥ ७९ ॥

पादेनैकेन तिष्ठन् पटुपटहरवैर्बोधितस्ते मयूरः
पश्चात्पक्षेण सार्धं चिरशयनगुरुं पादमन्यं वितत्य ।

---

76. D. अबोधयन् for व्यबोधयन्. D. बन्दिनः for वन्दिनः.

78. C. यामिन्याः, D. शार्वर्याः for शर्वर्याः. D. स्वप्नस्तव for स्वापस्तव. C. मित्रः, D. सूर्यः for भानुः.

79. D. लीला° for हेला°. C. मरुतैः for पवनैः. C. इभाः, D. गजाः for द्विपाः.

80. C. कलापी for मयूरः. D. पश्चात्पुच्छेन साकं for पश्चात्पक्षेण सार्धं. D. प्रमृत्य for वितत्य. D. °यष्टौ for °यष्ट्यां.

उत्फुल्लोध्दूतपक्षच्युतहिमकणिकावृष्टिरावासयष्ट्यां
दृष्ट्वा मार्तण्डधामोदयमुदितमुदोज्जृम्भते ताण्डवार्थी ॥ ८० ॥

पूर्वाद्रौ सूर्यपादे चरति विसृजता चन्द्रपादावदातं
तल्पं तेनानुचक्रे मलयतरुरसामोदितांसद्वयेन ।
उन्निद्रश्वेतपद्मप्रकरपरिकरच्छन्नवीचीविताना-
दुद्यन्मन्दं सरस्तः सलिलगुरुबृहत्पक्षतिर्मल्लिकाक्षः ॥ ८१ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ उद्यानक्रीडावर्णनो नाम तृतीयः सर्गः ॥

——:o:——

81. D. °मोदितांश° for °मोदितांस.° D. °बृहत्पक्षतिः for °बृहत्पक्षतिः. C मल्लिकाख्यः for मल्लिकाक्षः.

चतुर्थः सर्गः ।

अथ स प्रविजृम्भिते शुचौ
विधुरश्चेतसि पुत्रकाम्यया ।
सुबहुद्विजसात्कृताखिल-
द्रविणः स्तोममयष्ट भूपतिः ॥ १ ॥

बहुशो विफले तदध्वरे
सति पुत्रीयमनन्तरं क्रतुम् ।
निरवर्तयदृष्यशृंग इ-
त्यभिधानप्रथितस्तपोनिधिः ॥ २ ॥

उदियाय ततोऽस्य कश्चन
श्रितचामीकरभाजनं चरुम् ।
परिगृह्य रुचा परिज्वलन्
ज्वलतो रोहितवाजिनः पुमान् ॥ ३ ॥

प्रविवेश विशाम्पतिश्चरुं
चतुरंशीकृततेजसात्मना ।
प्रविधातुमरातितापित-
त्रिदशाश्रुस्रववृष्ट्यवग्रहम् ॥ ४ ॥

---

1. D. व्यथितः for विधुरः. C. °द्रविणो यागं for °द्रविणः स्तोमं.

2. D. बहुधा for बहुशः.

3. C. D. लोहितवाजिनः for रोहितवाजिनः.

4. C. चतुरंशीकृतबाहुतेजसा for चतुरंशीकृततेजसात्मना. C. D. अरातिराजित° for अरातितापित°.

दयिताभिरनन्ततेजसा
मुनिनासौ परिकल्प्य लम्भितः ।
अशितः प्रविभज्य भूपते-
स्तिसृभिर्गर्भमबीभवच्चरुः ॥ ५ ॥

सुतयोर्भवतः स्म वालिजिद्-
भरतौ कोसलकेकयेन्द्रयोः ।
यमजौ यमतुल्यतेजसौ
सुषुवाते समये सुमित्रया ॥ ६ ॥

अथ दिव्यमुनिप्रवर्तित-
प्रसवानन्तरजातकर्मणां ।
रुरुचे चरुजन्मनां दशा
तनुसंदर्शितदन्तकुड्मला ॥ ७ ॥

न स राम इह क्व यात इ-
त्यनुयुक्तो वनिताभिरग्रतः ।
निजहस्तपुटावृताननो
विदधेऽलीकनिलीनमर्भकः ॥ ८ ॥

---

5. D. अपारतेजसा for अनन्ततेजसा. C. D. परिकल्पलंभितः for परिकल्प्य-लंभितः. D. अजीजनत् for अबीभवत्. Fr. reads the verse in the following way:—अशितः परिकल्पलम्भितो मुनिनासौ प्रविभज्य भूपतेः । दयिताभिरबीभवच्चरुस्तिसृभिर्गर्भमनन्ततेजसा. Agreeing with the Sinhalese edition.

6. D. बालिजिद् for वालिजिद्. C. D. कोशल° for कोसल°. C. D. agreeing with the Sinhalese editson.

7. C, D. °दन्तकुट्मला for °दन्तकुड्मला.

8. C. दाशरथिः, D. दाशरथः for राम इह. C. रमणीभिः for वनिताभिः. D. ववृते for विदधे.

मुखमाहृतधूलि गण्डयोः
 करघृष्टाञ्जनदानमस्य तत् ।
विबभौ सुरदन्तिनो यथा
 वदनं दन्तचतुष्टयोज्ज्वलम् ॥ ९ ॥

कतरस्तव तात उच्यता-
 मिति धात्रीवचनप्रचोदितः ।
रुचिरेण करेण निर्दिशन्
 जगदीशं प्रमदेन संदधौ ॥ १० ॥

अयि दर्शय तत्किमुन्दुराद्-
 भवतोपात्तमिति प्रचोदितः ।
प्रविदर्शयति स्म शिक्षया
 नवकं दन्तचतुष्टयं शिशुः ॥ ११ ॥

इतरेऽपि सरोजशीतल-
 र्मृदुभिः साञ्जनराजिभिः करैः ।
शयने समवाहयन् पितु-
 श्चरणौ मातृजनेन चोदिताः ॥ १२ ॥

शयनीयगतस्य भूपतेः
 शिशवः क्रोडनिवेशवाञ्छया ।
निशि वर्धितमातृसंपदं
 कलहं कोमलजल्पितं दधुः ॥ १३ ॥

---

9. C. D. आहृतधूलि for आहृतधूलि. D. गल्लयोः for गण्डयोः. C. शुशुभे. D. प्रबभौ for विबभौ. D. हस्तिनः for दन्तिनः.

10. D. Fr. कतमः for कतरः. D. Fr. °वचनेन चोदितः for °वचनप्रचोदितः. D. Fr. जग्रहे for सन्दधौ.

11. C. उन्दराद् for उन्दुराद्. D. Fr. प्रणोदितः for प्रचोदितः.

12. C. D. मसृणैः for मृदुभिः. C. D. Fr. नोदिताः for चोदिताः.

13. C. D. °संमदं for °संपदं. Agreeing with the Sinhalese edition. C. D. मञ्जुलजल्पितं for कोमलजल्पितं.

क्रमशश्चरुजन्मनो वपुः-
परिवृद्धिर्महिता महीयसः ।
प्रतिवासरमायुषः क्षय-
स्त्रिदशारेरपि तुल्यमासतुः ॥ १४ ॥

धनुषि प्रतिलब्धपाटवे
नृपतेरन्यतरे रघुरात्मजे ।
भवनं भुवनस्य शासितुः
प्रतिपेदे मुषितक्रतुर्मुनिः ॥ १५ ॥

स्वकिरीटमणिप्रभाम्बुभिः
प्रथमक्षालितपादपङ्कजम् ।
नृपतिः समवीभवन्मुनिं
पुनरुक्तैरिव पाद्यवारिभिः ॥ १६ ॥

कुशलं परिपृच्छ्य सर्वगं
मुनिरध्यासितरत्नविष्टरः ।
उपविष्टमसौ भुवस्तले
विरतं राजमुनिं जगौ गिरम् ॥ १७ ॥

स्वजनादपि लब्धवैशसे
नृपतित्वे शठभृत्यसंपदि ।
प्रियवादिरिपावपि स्थितो
नृप दिष्ट्या कुशलेन वर्तसे ॥ १८ ॥

---

15. D. Fr. °कौशले for °पाटवे.

16. C. D. प्रथमं for प्रथम°. Agreeing with the Sinhalese edition.

17. D. ऋषि° for मुनिः. C. °वज्रविष्टरः for °रत्नविष्टरः C. D. Fr. राजवरं for राजमुनिं. C. D. Fr. गिरं जगौ for जगौ गिरम्.

18. C. °कन्दने, D. Fr. °घातने for वैशसे. Corrected to घातने in the margin of D. The original reading is blotted with lac ink. A. B. वर्धसे for वर्तसे.

द्विषतो भवबन्धभेदिना
दहतश्चेतसि योगवह्निना ।
न जहाति विपत्तिरद्य नः
परसंपत्तिषु निःस्पृहानपि ॥ १९ ॥

अनुयान्ति समन्ततो मखे
निपतच्छोणितवृष्टयो दिशः ।
पवनाहतवृंतविच्युत-
प्रसवाः किंशुककाननश्रियः ॥ २० ॥

मृषतामपि नस्तपस्यतां
घृतवैकङ्कतसाधनस्रुचाम् ।
स्फुरदर्चिषि देवतामुखे
हुतमद्यश्च उदस्यतेऽरिभिः ॥ २१ ॥

सदसः समयेषु वृत्तये
विधिनाहूतहुतांशभाजिनः ।
युधि तं जहि पश्यतोहरं
गुरुणा रामशरेण राक्षसं ॥ २२ ॥

---

19. B. Adds the first line in margin. The fourth line in C. lacks two syllables at the end [निःस्पृहा°]. D. Fr. निस्पृहान् for निःस्पृहान्.

20. D. अनुयन्ति for अनुयान्ति. C. D. सवे for मखे. B. C. निपतल्लोहित° for निपतच्छोणित°.

21. C reads the verse thus:—स्फुरदर्चिषि देवतामुखे घृतवैकंकतसाधनस्रुचां मृषतामपि नस्तपस्यतां हुतमद्यश्च उदस्यते रिपुः. Agreeing with the Sinhalese edition.

22. D. Fr. महता for गुरुणा. D. Fr. नैर्ऋतं for राक्षसं.

क्षमते न जनं त्वदर्पितं
यमिनामिन्द्ररिपुस्तु हिंसितुम् ।
शशिनं मृगशत्रुराश्रितं
न मृगं प्रार्थयते हि जातुचित् ॥ २३ ॥

उरगा इव घर्मपीडिताः
क्रतुशत्रुव्यथितास्तपस्विनः ।
उपयान्त्युपतापनाशनं
विपुलं त्वद्भुजचन्दनद्रुमम् ॥ २४ ॥

वयमर्ककुलैककाश्रया
न परं भूपतिमाश्रयामहे ।
न हि जातु पतन्ति पल्वले
जलदा वारिधिपानलम्पटाः ॥ २५ ॥

त्वदणु प्रियमाश्रयामहे
न परस्मादतिविस्तराण्यपि ।
पयसः कणमेव चातको
जलदादत्ति बहूनि नान्यतः ॥ २६ ॥

---

23. A. has the following for the first two lines:—यमिनामधिहिंसितुं जनं क्षमते नेन्द्ररिपुस्त्वदर्पितं. Agreeing with the Sinhalese edition. C. क्रमते for क्षमते. C. D. पुरुषं for न जनं. C. D. इन्द्ररिपुर्न for इन्द्ररिपुस्तु.

24. C. ताप°, D. Fr. दाह° for घर्म°. D. सवशत्रु°, Fr. मखशत्रु° for क्रतुशत्रु°. C. Fr. महितं for विपुलं.

25. C. D. लोलुपाः for लम्पटाः. C. seems originally to have had लोलुपाः which has been altered and लम्पटाः inserted in the margin.

26. Fr. त्वदणुप्रियमाश्रयामहे for त्वदणु प्रियमाश्रयामहे. Wrongly worded in Fr. and in the Calcutta and Sinhalese editions. Our text is supported by four Mss. D. Fr. अतिविस्तरं त्वपि for अतिविस्तराण्यपि.

नृपताविति वेदितापदा
मुनिना जोषमभूयत क्षणम् ।
महतां न कदाचिदर्थना
गुरुनिर्बन्धविनष्टसौष्ठवा ॥ २७ ॥

परिपूततनुर्द्विजाशिषा
शुभया त्वत्प्रियतावृतः स्वयम् ।
पृथुकः पृथुकीर्तिरर्पितो
भवति श्वः समराय यास्यति ॥ २८ ॥

इति वस्तुमवस्तुकाङ्क्षिणे
स मुदास्मै समुदाहृतप्रियः ।
शरणं शरणार्थिने ददा-
वृषये विश्वभुजो नरेश्वरः ॥ २९ ॥

चलिते च सुतं तपस्यति
प्रथमाहूतमृषेर्नमस्यया ।
उपनीय चिराय वर्जितं
स्वयमङ्कं प्रियमाददे वचः ॥ ३० ॥

समवेदि यतस्त्वदर्थिना
कथितं यद्गुरतिक्रमं त्वया ।
अवधूय ततस्तदापदं
चिनु बाणेन कुलोचितं यशः ॥ ३१ ॥

---

27. C. D. अर्थिता for अर्थना.

28. C. D. परिपूतवपुः for परिपूततनुः. D. Fr. गच्छति for यास्यति.

29. D. Fr. मुनये for ऋषये.

30. D. Fr. तपस्विनि for तपस्यति.

31. Fr. गदितं for कथितं. Fr. कुलागतं for कुलोचितं.

अविजित्य जयैषिणां सदा
न भुवः शक्यतयानुरक्षितुम् ।
ननु दिग्जयसंभृतो महा-
विभवोऽयं भवतः प्रसंगतः ॥ ३२ ॥

भुवनानि बिभर्ति कश्चन
स्वजनानेव परः प्रयत्नतः ।
इतरस्तनुमेव केवलं
प्रभुरन्यो भरणेऽपि नात्मनः ॥ ३३ ॥

इति पक्षचतुष्टये स्थिते
रघवः पूर्वमुदस्य मानिनः ।
क्षपयन्ति यशः क्रमागतं
न हि पक्षान्तरसंपरिग्रहात् ॥ ३४ ॥

जनमन्यहितप्रवर्तनं
स्वयमेवाभिसरन्ति सम्पदः ।
नियतं निजकृत्यलम्पटः
पुरुषः स्वार्थत एव हीयते ॥ ३५ ॥

पुरुषस्य कृतं भुजद्वयं
प्रविधातुं द्वयमेव वेधसा ।
सुहृदामुदयं च विद्विषा-
मवलेपप्रतिघातमेव च ॥ ३६ ॥

---

33. B. C. इतरो वपुरेव for इतरस्तनुमेव. C. D. केवलां for केवलं.

34. B. C. क्षययन्ति for क्षपयन्ति.

35. B. C. अन्यहितप्रवर्तकं for अन्यहितप्रवर्तनं. D. Fr. °कार्यलोलुपः for °कृत्यलंपटः.

36. C. च दुर्हृदाम्. D. प्रतिघ्नताम्. Fr. विनिघ्नताम् for च विद्विषाम्.

शरणोपगतं न पाति यो
  न भिनत्ति द्विषतां समुन्नतिम् ।
न स बाहुरसाधनक्षमो
  नरवृक्षप्रभवः प्ररोहकः ॥ ३७ ॥

परकृत्यजडो यशोर्जने
  जठरैकप्रवणो निरुत्सुकः ।
पशुरेव बुधैर्निगद्यते
  यवसग्रासनिवृत्तमानसः ॥ ३८ ॥

न पशुः पुरुषाकृतिर्यतो
  नृगुणभ्रष्टतया न पूरुषः ।
विरतव्रतपौरुषस्पृहः
  किमु कोऽपि द्रुहिणेन निर्मितः ॥ ३९ ॥

अकृतद्विषदुन्नतिच्छिदः
  श्रितसंरक्षणवन्ध्यकर्मणः ।
पुरुषस्य निरर्थकः करः
  किल कण्डूयनमात्रसार्थकः ॥ ४० ॥

अशने रसनानि देहिनां
  कृतयोगानि मुखेषु भूरिशः ।
न न सन्ति तदेषु दुर्लभं
  प्रभ यत्स्यादभयं प्रजल्पितुम् ॥ ४१ ॥

---

37. B. C. शरणोपनतं for शरणोपगतं. D. Fr. छिनत्ति for भिनत्ति. C. D. असाधनप्रभुः for असाधनक्षमः.

38. B. reads this verse after the 39th stanza of our text. Fr. जनैः for बुधैः.

39. D. Fr. विगत° for विरत°. C. द्रुहणेन, D. द्रुघणेन for द्रुहिणेन.

40. A. °साधकः, C. °साधनः for °सार्थकः.

तव जीवितसंशयेष्वपि
न परित्याज्यमिदं कुलव्रतम् ।
सुलभं प्रतिजन्म जीवितं
हृदयं धर्मरतं हि दुर्लभम् ॥ ४२ ॥

विरते शवतामभिव्रज-
त्यभिषेकोत्सवदुन्दुभौ क्षणाद् ।
इति पातिनि जीविते कथं
सुखमालम्ब्य सृजन्ति सत्पथम् ॥ ४३ ॥

यशसि व्रज यत्नमुज्झित-
स्त्रसुखप्रीतिरुपैहि वा तपः ।
अधिगम्यमसारमास्थिरं
विषयास्वादसुखं पशोरपि ॥ ४४ ॥

यशसा सुकृतेर्न संग्रहो
नियतं धर्ममुपार्जितो यशः ।
अनुगच्छ तदेकसंग्रहा-
दुभयं लभ्यमितीह सत्पथम् ॥ ४५ ॥

---

42. C. °संशये यदि for °संशयेष्वपि. B. C. तु for हि.

43. A. B. the Tala-leaf Mss. omit this stanza. But the codex B. leaves a blank space with the figure marking the number of the verse. C. विरतः शवतामभिव्रजत्यभिषेकोत्सवदुन्दुभिः क्षणाद्. Agreeing with the Calcutta edition. D. समिधत्वमभिव्रजत्यसावभिषेकोत्सवदुन्दुभिः क्षणाद्. Agreeing with the Sinhalese edition. Fr. शम[मि] तां for शवतां. In other respects it agrees wite C. Dr. R. G. Bhandarkar, the greatest orientalist on this side of India, has proposed a preferable reading for these obsure lines. And we have adopted this reading for our text.

45. D. प्राप्यं far लभ्यं.

ननु तावदिहैव सज्जन-
प्रतिरक्षाविधिगम्यमक्षयम् ।
फलमिन्दुकरोपरञ्जित-
प्रहसत्कौमुदकोमलं यशः ॥ ४६ ॥

प्रयतः प्रतिपद्य तत्तपो-
वनमुग्रं त्वमुदग्रविक्रमः ।
सहसा सह कौशिकेन तं
यमिनां क्रन्त निबर्हकं युधि ॥ ४७ ॥

पितुरित्थमनाकुलं वच-
स्तदुपश्रुत्य ननाम पादयोः
सह सिद्धवनं यियासुना
समरायावरजेन राघवः ॥ ४८ ॥

तमसि स्फुरदंशुमद्द्युति-
प्रहृते संसदि सौखरात्रिकः ।
यतये निरयीयतत्सुतौ
नृपतिर्मन्त्रपवित्रदर्शितौ ॥ ४९ ॥

अनुजग्मतुरश्रुवर्षिणो
हृदयैः पौरजनस्य राघवौ ।
मुनिमेनमनाकुलातुरै-
रनुयातावशिवैकचिन्तया ॥ ५० ॥

---

46. D. °प्रहसत्पुष्कर° for° प्रहसत्कौमुद°.

47. C. Fr. प्रतिपद्य तपोवनं युधि प्रयतस्त्वं सह कौशिकेन तत । जहि संग्रमिनां निवर्हकं सहसोग्रं तमुदग्रविक्रमः for our text. C. Fr. agreeing with the Sinhalese edition. C. D. Fr. निवर्हकं for निबर्हकं.

यमिनः पथि चैतिहासिका-
दुपशृण्वन् विविधाश्रयाः कथाः ।
क्रमथं न विवेद राघवो
बलयानीतबलः स विघ्नया ॥ ५१ ॥

अथ वज्रभृतः सुहृद्द्रुहो
विषयो यः स्नपनेन विश्रुतः ।
नृवरो निजगाद तत्पुरं
पिशिताशीनिहतं निरीक्ष्य सः ॥ ५२ ॥

न भुनक्ति पुरा पुरश्रियं
परितः कीर्णकरङ्कसङ्करा ।
अवमग्नशिरःकपालदृग्-
विवरप्रोद्गतशाद्वला मही ॥ ५३ ॥

फणिभिः प्रतिविम्बमातरः
शितिभिर्भान्ति शिरोऽवलम्बिभिः ।
रचितैरिव वेणिवन्धनै-
र्विरहादस्य पुरस्य शासितुः ॥ ५४ ॥

भुवि भोगिनिभं विलोकयं-
स्तुटुमो हारमहार्यवेपथुः ।
हरिहस्तहतस्य दन्तिनः
कररन्ध्रे निभृतं निलीयते ॥ ५५ ॥

---

51. B. अनुशृण्वन्, C. अभिशृण्वन् for उपशृण्वन्. C. D. क्रमथुं for क्रमथं. C. D. अनीतबलः for आनीतबलः.

53. C. D. पुरश्रियः for पुरश्रियं.

54. D. Fr. प्रतिविम्बमातरः for प्रतिबिम्बमातरः.

55. B. C. हस्तिनः for दन्तिनः.

प्रतिमा विशदेन लूतिका-
　पटलेनावृतदृष्टिरीक्ष्यते ।
रुदितैरिव पुष्पितेक्षणा
　विपुलत्रासकृतैरनेकशः ॥ ५६ ॥

श्लथभित्तिविरूढभूरुह-
　स्थिरमूलाग्रविनिर्गमक्षतम् ।
स्फुटतीव भृशं शुचातुर
　हृदयं तद्गृहचित्रयोषिताम् ॥ ५७ ॥

नकुलः परिजीर्णवबुध-
　प्रतिबिम्बाननमध्यरन्ध्रतः ।
परिकर्षयति क्रुधा यथा
　स्फुरितं तद्रसनं सरीसृपम् ॥ ५८ ॥

इति जल्पति तत्र राक्षसी
　पुरतः प्रादुरभूद्भिदेलिमा ।
मकराकरपायिधामभिः
　क्षतयक्षाकृतिरुग्रविग्रहा ॥ ५९ ॥

नवकृत्तविलासिनीकर-
　प्रसवोत्तंसविभूषितानना ।
नृशिरस्ततिमेखलागुण-
　स्फरणक्रूरकटुक्वणत्कटिः ॥ ६० ॥

---

57. B. C. शुचाऽऽतुरं for शुचातुरं.

58. D. Fr. °प्रतिविम्ब° for °प्रतिबिम्ब°.

59. B. C. यक्षिणी for राक्षसी.

परितः स्फुरदन्त्रपाश्यया
परिणद्धाकुलकेशसंततिः ।
घनशोणितपङ्ककुङ्कुम-
प्रविलिप्तस्तनकुम्भभीषणा ॥ ६१ ॥

इति तामतिभीमदर्शना-
मभिवीक्ष्योभयतस्तपोधनम् ।
धनुषोरवनीभुजः सुतौ
सपदि न्यस्तशरावतिष्ठताम् ॥ ६२ ॥

स वसिष्ठतनूजपातित-
क्षितिपस्वर्वसतिप्रदो मुनिः ।
घृणिनो नृपतेः कृतस्मय-
स्तनयं वीक्ष्य जगाविदं वचः ॥ ६३ ॥

इति सार्वजनीनसम्पदः
प्रलयं देशवरस्य कुर्वतीम् ।
न निहत्य शरेण सूरिभि-
स्त्वमधर्मी ध्रुवमेष गीयसे ॥ ६४ ॥

शतमन्युरवर्णवृत्तये
न वधः स्त्रैण इति प्रचिन्तयन् ।
निजघान विरोचनात्मजां
कुलिशेन त्रिदिवस्य शान्तये ॥ ६५ ॥

---

61. D. Fr. परिनद्ध° for परिणद्ध°. C. D. संहतिः for सन्ततिः.

62. B. C. तपोनिधिम् for तपोधनम्.

63. D. Fr. घृणिनो नृपतेर्जगाविदं तनयं वीक्ष्य कृतस्मयो वचः for घृणिनो नृपतेः कृतस्मयस्तनयं वीक्ष्य जगाविदं वचः. The Mss. D. Fr. agree with the Sinhalese edition. D. Fr. वशिष्ठ° for वसिष्ठ°.

64. D. Fr. सर्वजनीन° for सार्वजनीन°. A. B. कुर्वंतीमनिहत्य for कुर्वंतीं न निहत्य.

वनितावपुषि द्विषज्जने
    पुरुषाकारविशेषितेऽपि वा ।
न हि भद्रकरं शरीरिणां
    प्रहृतार्हे करुणावलम्बनम् ॥ ६६ ॥

युवतेरपि साधवः सुखे
    जगतो लुप्तवतश्चिरस्थितिम् ।
तुलयन्ति न राम विक्रमं
    द्विषतीतापमगुण्यवृत्तिभिः ॥ ६७ ॥

अपि वित्थ इदं धनुर्भृतो-
    र्भवतोः पौरुषरोषवित्तयोः
न भजन्ति यशःश्रियं रणेऽ-
    भ्युदिते हन्त तपोधनद्विषः ॥ ६८ ॥

न विरोचनजन्मनोरिदं
    युवयोरायुधयुद्धतन्त्रयोः ।
द्विजवृद्धनिषेवणक्षमं
    महतोः श्रौत्रमलं विराजते ॥ ६९ ॥

---

66. Fr. प्रकृते स्यात् for प्रहृतार्हे. Fr. agreeing with the Sinhalese edition.

67. C. reads the following for our text:—तुलयन्ति न साधवः सुखे जगतो लुप्तवतश्चिरस्थितिम् । युवतेरपि राम साधवो द्विषतीतापमगुण्यवृत्तिभिः. Agreeing with the Sinhalese edition. D. लोपयितुम्, Fr. लुप्तवताः for लुप्तवतः. The reading of the Ms. Fr. seems to be corrupt.

68. Fr. reads the following for our text:—रण अभ्युदिते धनुर्भृतोर्भवतोः पौरुषरोषवित्तयोः । अपि वित्थ इदं यशःश्रियं न भजन्तीति तपोधनाधिपा ? Agreeing with the Sinhalese edition.

69. D. Fr. with the Sinhalese edition read the following for our text. द्विजवृद्धनिषेवणक्षमं युवयोरायुधयुद्धतन्त्रयोः । न विरोचनवंशजन्मनोर्महतोः श्रोत्रमिदं विराजते.

इति मुनिचोदितो हृदि सुकेतुसुतामिषुणा
रघुपतिरक्षिणोद्दशनिपातपटुध्वनिना
स्फटितकुचान्तरस्रवदसृक्स्रुतिनः करणात्
प्रथममपाययुस्तदसवो नु शरो नु बहिः ॥ ७० ॥

ऋषिरिति विघ्नघातविधिसञ्चितसद्यशसं
तनुजमयोजयद्दशरथस्य सुरास्त्रगणैः
असुरनिशाचरक्षतजपानपरैर्विकस-
ल्लसितहुताशनद्युतिपिशङ्गितदिग्वदनैः ॥ ७१ ॥

वदनविनिर्गतज्वलितवह्निशिखावितते-
रुपगतवन्ति राममथ तानि ततानि रुचा
शशधरखण्डकोणकुटिलस्फुटकोटिखरं
दशनचतुष्टयं पृथु दधन्ति बहिः प्रसृतम् ॥ ७२ ॥

रक्षोहव्यहविर्भुजं स हि तथा संधूप्य शस्त्रेन्धनैः
प्रत्युद्गम्य सुदूरमेव हरिणैरन्वीयमानो वहिः
छेदाय प्रसृतैरसेक्तिमलताजालप्रवालश्रियः
कूजत्कोकिलमाश्रमस्य निकटं सायं प्रपेदे मुनिः ॥ ७३ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ श्रीरामोत्पत्तिर्नाम चतुर्थः सर्गः ॥

---

70. D. मुनिनोदितः for मुनिचोदितः. C. D. अक्षणोत् for अक्षिणोत्. C. D. वहिः for बहिः.

71. C. D. मुनिः for ऋषिः.

72. D. वहिः for बहिः.

73. C. स तु, D. स च for स हि. D. हिः for बहिः.

पञ्चमः सर्गः ।

ततस्ततं तापसकन्यकाजन-
प्रसिक्तसंवर्धितवृक्षमण्डलैः ।
सहस्रशस्तानितसामनिस्वन-
प्रवर्तिताखण्डशिखण्डिताण्डवम् ॥ १ ॥
विहङ्गपानाय महीरुहां तले
निवेशिताम्भःपरिपूर्णभाजनम् ।
विशोषणार्थाहितपुण्यवल्कल-
प्रताननम्रीकृतवृक्षमस्तकम् ॥ २ ॥
कृतासु नीवारविभागवृत्तिषु
स्वकीयमंशं मृदुहस्तसंपुटैः ।
हरद्भिरालोहितगण्डमण्डलैः
प्लवङ्गमैः सेवितशैलकन्दरम् ॥ ३ ॥
स्वमङ्कमारुह्य सुखं परिष्वपत्-
कुरङ्गशावप्रतिबोधशङ्कया ।
चिरोपवेशव्यथितेऽपि विग्रहे
सुनिश्चलासीनजरत्तपोधनम् ॥ ४ ॥
हिरण्यरेतःशरणानि सर्वतः
प्रवृत्तपुण्याहुतिधूमधूसरम् ।
बृहल्लतातानभृतः फलग्रहे-
रधस्तरोरासितशायितातिथि ॥ ५ ॥

---

1. A. B. °जनान्निषिक्त° for °जनप्रसिक्त°.

2. D. Fr. प्रभार° for प्रतान°. The Calcutta edition as well as the Sinhalese edition agree with our codices A. B. C.

5. C. D. दृहल्लता° for बृहल्लता°. D. आतानभुजः for आतानभृतः. D. आशित° for आसित°. D. agreeing with the Sinhalese edition.

तपस्विवर्गस्य वधूषु वह्नये
वितन्वतीषु प्रकृतां बलिक्रियाम् ।
मृगाङ्गनाभिः परिलिह्य जिह्वया
विनोदितत्याजितरोदितच्छिशु ॥ ६ ॥

बलिक्रियातामितलाजकर्षणे
समेतकीटप्रतिघातशङ्कया ।
कुशस्य मुष्ट्या शनकैस्तपस्विभिः
प्रमृज्यमानानलमन्दिरोदरम् ॥ ७ ॥

महीरुहभ्रष्टविहङ्गपोतिका-
सुखोपवेशाय तपस्विसूनुभिः ।
इषीकतलेन विधाय मार्दवं
क्वचित्समासज्जितनीडपञ्जरम् ॥ ८ ॥

सवारिमृत्स्नापरिपूर्णखातक-
प्रजन्यमानाङ्कुरबीजमेकतः ।
प्रहृष्टसारङ्गकिशोरवल्गित-
प्रकीर्णपुञ्जीकृतशुष्यदिङ्गुदि ॥ ९ ॥

समीरणैराहुतिगन्धपावनै-
र्वितानितोद्दामशिखण्डिनिस्वनम् ।
तपोवनं तत्तपसामधिश्रयः
कुमारयुग्मेन विवेश कौशिकः ॥ १० ॥

---

6. Fr. °वर्णस्य for °वर्गस्य. D. Fr. बधूषु for वधूषु. C. अधिलिह्य for परिलिह्य. Fr. °शिशुं for °शिशु. Fr. agreeing with the Sinhalese edition.

7. D. Fr. प्रमज्यमानं शनकैस्तपस्विभिः । कुशस्य मुष्ट्यानलमंदिरोदरम् for कुशस्य मुष्ट्या शनकैस्तपस्विभिः । प्रमृज्यमानानलमन्दिरोदरं. D. Fr. agree with the Calcutta and the Sinhalese editions.

9. C. प्रजायमान° for प्रजन्यमान°. C. D. वीजं. for बीजं. B. C. °इंगुदं for °इंगुदि.

विधित्सुरिष्टिं नृपतेरतन्द्रितं
सुतं ततो वैबुधलौकिकीमृषिः ।
समादिदेश प्रकृताय कर्मणे
चिराय तद्रक्षणरूप्यमादृतः ॥ ११ ॥

तमग्निमिन्धानमधिक्रतु भ्रमन्
रिरक्षिषुः सन् परितो रिपोरसौ ।
क्षमाभुजः सज्यशरासनः सुतो
हृतो जगादावरजं वनश्रिया ॥ १२ ॥

बिभर्ति नीवारवदम्बुजाकर-
श्रिया परीतं सततं तपोजुषाम् ।
अखातमाहावमनुप्तिमं परं
सदाफलं शस्यमिदं तपोवनम् ॥ १३ ॥

सवेदवेदाङ्गविदो यमव्यय
विदन्ति यत्नेन पदं तपस्विनः ।
स लोककृत्यानि विचिन्त्य कानिचित्
तपस्यति स्मेह पुमान् पुरातनः ॥ १४ ॥

सुदर्शनच्छिन्नसमाहृतेन्धनं
द्विजेन पक्षव्यजनेन वीजितम् ।
त्रिनेत्रमूर्त्यन्तरमादिपूरुषो
जुहाव हव्यैरिह हव्यवाहनम् ॥ १५ ॥

---

11. D. Fr. ऋषिः सुतं वैबुधलौकिकीं ततो विधित्सुरिष्टिं नृपतेरतन्द्रितं for विधित्सुरिष्टिं नृपतेरतन्द्रितं सुतं ततो वैबुधलौकिकीमृषिः. D. Fr. agree with the Sinhalese edition.

12. D. Fr. इन्धन्तं for इन्धानं. D. Fr. agreeing with the Sinhalese and the Calcutta editions.

14. D. वदन्ति for विदन्ति.

तपस्यति स्वामिनि शत्रुशातने
समित्कुशच्छेदनमात्रतत्परः ।
सुसंयतो नाभिननन्द नन्दकः
सुरारिवक्षःक्षतजासवं तदा ॥ १६ ॥

गदा रणदुन्दुभिभैरवं रणं
तदा समभेत्य भयं वितन्वति ।
शिरस्यपध्वस्तशिरस्त्रजालके
निमज्य मज्जां न जघास विद्विषाम् ॥ १७ ॥

नवं स्वकोशाहृतवारिधारया
वनं तरूणामनुगृह्णता रणे ।
न पाञ्चजन्येन जनस्य तेनिरे
भियो विशुष्काशनिभैरवैरवैः ॥ १८ ॥

सलीलमुद्दण्डसरोजविष्टरे
निषद्य पादेन पुरोऽवलम्बिना ।
परिस्पृशन्त्या चलवीचिमस्तकं
तदा किलागायि कलं न पद्मया ॥ १९ ॥

फणावतामुद्धरणेषु वारिधि-
प्रवाहसिक्तावुदयाचलस्थितः ।
वितत्य पक्षावधिपः पतत्त्रिणां
व्यशोषयन्न प्रति सूर्यमायतम् ॥ २० ॥

---

16. C. reads the following for our text:-तपस्यति स्वामिनि शत्रुशातने सुसंयतो नाभिननन्द नन्दकः । समित्कुशच्छेदनमात्रतत्परः सुरारिवक्षःक्षतजासवं तदा. C. agrees with the Sinhalese edition.

17. C. रटदुन्दभभैरवं for रणदुन्दुभिभैरवं.

18. D. °कोषाहृतनीर° for कोशाहृतवारि°. D. भियो हि for भियो वि°.

विहारमारण्यकमिष्टवस्तुदं
विहाय वल्केन समं वितूस्तयन्।
इतः किल क्रोधपराहतो हरिः
पुरा प्रतस्थे बलिबन्धसिद्धये ॥ २१ ॥

ततः प्रहृत्येव गुणस्य संपदां
हिरण्यगर्भस्य विधतहिंसया।
निषेव्यते श्वापदसंपदा पदं
तपस्विनामृद्धमिदं शमावहम् ॥ २२ ॥

प्रगह्य पुच्छे शिशवस्तपस्विनां
मसीपयःसेककृतानिवासितान्।
यदङ्गबिन्दून् गणयन्ति चापला-
द्विलोकय द्वीपिनमेनमग्रतः ॥ २३ ॥

इमौ हरी संहृतरोषशङ्कितौ
नितान्ततप्तौ तपनस्य दीप्तिभिः।
तलं गजस्य स्रुतगण्डसंपदः
फणातपत्रं फणिनश्च वाञ्छतः ॥ २४ ॥

---

21. D. इतः पुरा for इतः किल. A. C. क्रोधविमूर्च्छितो विभुः for क्रोधपराहतो हरिः. D. किल प्रतस्थे for पुरा प्रतस्थे. The readings of D. agree with the Sinhalese edition. C. बलिबन्धकर्मणे for बलिबन्धसिद्धये.

22. B. C. प्रहत्येव for प्रहृत्येव.

23. C. मशीपयः°, D. मषीपयः° for मसीपयः°. Fr. यद्देहबिन्दून् for यदङ्गबिन्दून्.

24. D. Fr. हरी इमौ for इमौ हरी. Agreeing with the Sinhalese edition. D. Fr. °शङ्किनौ for °शङ्कितौ. Agreeing with the Sinhalese edition.

तथा गिरं व्याहरतैव रोदसी
वितत्य यातं पवनेन रंहसः ।
विधूनयत्तद्विपिनं द्विषद्बलं
ध्वजैरुपालक्ष्यत काकलाञ्छनैः ॥ २५ ॥

सरोषरक्षः प्रतिविम्ब्रविग्रहं
कृपाणपत्रे शरदम्बरत्विषि ।
विगृह्णतां जीवितपानलिप्सया
स्थितः समास्थाप्य यमो यथा बभौ ॥ २६ ॥

असंख्यगह्या अपि तत्र सैनिकाः
पिशाचरक्षस्ततिभिर्निरन्तरम् ।
कृतान्धकारं रथचक्ररेणुभि-
र्जगुर्जगत्सत्त्वरजस्तमोमयम् ॥ २७ ॥

चकार लक्ष्यं प्रथमो बलोत्तरो
नभः श्रितं तत्पदिको बलं द्विषाम् ।
ततिं क्षितिस्थामनुजो जघान च
द्रवत्तुरङ्गामतिदन्तवद्विभुम् ॥ २८ ॥

युधि द्विपा रामशरेण दारिताः
कृतत्वराधोरणमुक्तकन्धराः ।
यतो धरण्यामनुकृष्टवारिदं
दिवः पतन्तो रुरुजुः स्वसैनिकान् ॥ २९ ॥

---

25. D. Fr. पवनस्य रंहसा for पवनेन रंहसः.

26. D. Fr. प्रतिविम्बविग्रहं for प्रतिविम्ब्रविग्रहं. Fr प्रयुध्यतां for विगृह्णतां.

28. D. Fr. read the following for our text:—चकार लक्ष्यं स नभः श्रितं बलं बलोत्तरोऽपि प्रथमोऽनुजो द्विपम् । द्रवत्तुरंगामतिदन्तवद्विभुं जघान पंक्तिं पदिकः क्षितिस्थिताम्. Agreeing with the Sinhalese edition. A. अभिदान्तवत्, B. अतिदान्तवत्, C. अभिदन्तवत् for अतिदन्तवत्.

29. D. Fr. बिभिदुः for रुरुजुः.

शरासने वर्त्मनि लक्ष्यभेदने
परैरुपालक्ष्यत नेषुसन्ततिः ।
ऋतेऽपि हेतोरिव दीर्णवक्षसो
निपेतुरस्य प्रधने सुरद्विषः ॥ ३० ॥

यथा गुणस्य ध्वनयः समुच्चयु-
र्निपातशब्देन समं युधि द्विषाम् ।
तथाऽस्य योद्धुर्धनुषो विनिर्गता
जवे विशेषं विदधुः शिलीमुखाः ॥ ३१ ॥

सुरारिहस्तच्युतशस्त्रजालका-
न्यलब्धलक्ष्याणि चिरं नभस्तले ।
विशुष्कपत्रप्रतिमानि तच्छर-
प्रतानवातोपहतानि बभ्रमुः ॥ ३२ ॥

प्रभञ्जनेनाहितपक्षतिध्वनि
प्रसर्पतां राजसुतस्य पत्रिणाम् ।
ऋभुद्विषस्ते प्रतिलोममाहतैः
शरैर्निजैरेव दृढं निजघ्निरे ॥ ३३ ॥

क्षतं पृषत्केन पतत्रिणां पथः
पतद्बलं तत्तनयस्य भ्रमतः ।
निपातखेदादशिवे भुवस्तले
भियेव तूर्णं जहुरन्तरासवः ॥ ३४ ॥

---

30. Fr. लक्षछेदने for लक्ष्यभेदने. D. Fr. शीर्णवक्षसः for दीर्णवक्षसः.

31. D. Fr. निदधुः for विदधुः.

32. D. Fr. °पाणिच्युत° for °हस्तच्युत°. Fr. °लक्षाणि for °लक्ष्याणि.

33. D. प्रसर्पता राजसुतस्य पत्रिणा for प्रसर्पतां राजसुतस्य पत्रिणाम्. A. C. ऋतुद्विषः for ऋभुद्विषः. Agreeing with the Sinhalese edition.

34. D. Fr. महीतले for भुवस्तले.

शिताङ्कुशन्यासविधूतमस्तकाः
　　शिरःसमीपे विनिविष्टबाहवः ।
ध्रुवं नदन्तो युधि तं प्रहारिणं
　　भयादयाचन्त यथारिदन्तिनः ॥ ३५ ॥

द्विपं करीरीयुगमूलखण्डित-
　　प्रशीर्णदन्तं समदेन पश्यता ।
मृधावतारव्यथितेन चेतसि
　　क्षणं विचक्रे निकटेन दन्तिना ॥ ३६ ॥

क्री करं यातमुदग्रविग्रहः
　　परं प्रहर्तुं प्रतिहृत्य रंहसा ।
शरेण भित्त्वा निखिले निकीलिते
　　शशाक भोक्तुं न भुजस्य मण्डले ॥ ३७ ॥

निकीलिते रामशरेण वेगिना
　　दृढं विभिन्नोरुयुगं तुरङ्गमे ।
कृतेऽपि दोषे भयमूढवृत्तिना
　　हयेन कश्चिद्विचचाल नासनात् ॥ ३८ ॥

रिपोरपूर्णेन्दुमुखेन कश्चन
　　स्थिरासनः पत्रियुगेन राक्षसः ।
निकृत्तयोरप्यधिजानु पादयोः
　　पपात वेगेन यतो न वाजिनः ॥ ३९ ॥

---

35. C. इवारिदन्तिनः for यथारिदन्तिनः.

36. C. प्रकीर्णदन्तं for प्रशीर्णदन्तं. D. रमरावतार° for मृधावतार.° Agreeing with the Sinhalese edition.

38. D. कृतेऽपराधेऽपि भयेन चेतसा for कृतेऽपि दोषे भयमूढवृत्तिना.

39. D. अरेः for रिपोः.

वधाय धावन्नभिशत्रु विद्विषः
  शरेण कृत्तच्युतमस्तकोऽपरः ।
हतायुरप्यादिकृतेन कानिचि-
  त्पदानि वेगेन जगाम राक्षसः ॥ ४० ॥

जवेन कश्चिज्जवनाम्बुदोपम
  क्षणं सिताभ्रैः कृतकर्णचामरम् ।
निपत्य कुम्भे तरसा द्विधा गतै-
  र्विहायसा वाहयति स्म दन्तिनम् ॥ ४१ ॥

पृषत्कभिन्नोदररन्ध्रनिर्गतं
  स्वमन्त्रमुत्कृत्य खुराग्रपातनैः ।
दिशि क्षिपन्तं युधि वेगधारया-
  परो भुवं वाहयति स्म वाजिनम् ॥ ४२ ॥

निकृत्य सौमित्ररथाङ्गधारया-
  पवर्जितं स्वं तरसा क्षपाचरः ।
क्रुधायुधीकृत्य भुजं महीभुजः
  सुतं जघान ध्वनिकम्पिताचलः ॥ ४३ ॥

न्यमज्जदर्धेन रथाङ्गमीरितं
  परेण शत्रोरुपदण्डमस्तकम् ।
तमेव दण्डं परशुं विधाय तं
  शिरस्यरातिर्निजघान सस्वनः ॥ ४४ ॥

---

40. D. गतायुः for हतायुः. C. नैर्ऋतः, D. कौणपः for राक्षसः.

41. B. हस्तिनम् for दन्तिनम्.

42. C. सैन्धवं, D. घोटकं for वाजिनम्.

43. D. कृधा for क्रुधा. D's reading appears to be corrupt. C. D. °कम्पितस्थलः for °कम्पिताचलः. Agreeing with the Calcutta edition.

स्वपाणियंत्रच्युतशस्त्रसादितं
विधाय वृन्दं बहुधा सुरद्विषाम् ।
रणाय कोशादसिमीशितुः सुत-
श्चकर्ष कृष्णं विवरादिवोरगम् ॥ ४५ ॥

परस्य सौमित्रिकृपाणपाटित-
द्विधाभवद्देहभृतो निकीलयन् ।
शरेण पार्श्वे नृहरिः समग्रतां
व्यधत्त रोषेण नु लीलया नु सः ॥ ४६ ॥

करं रणाय प्रतिहृत्य धावति
द्विपे निजघ्ने तनयेन भूभुजः ।
बहूनि खण्डानि विधित्सुनासिना
समेत्य संपिण्डित एव तत्करः ॥ ४७ ॥

कृपाणकृत्तस्य दृढोरुयन्त्रितं
न पश्चिमार्धं निपपात सादिनः ।
तुरङ्गवल्गादृढकृष्टमुष्टिना
परेण भागेन च लम्बितं पुरः ॥ ४८ ॥

परेण खड्गेऽनुपपातपातिते
सुरारिरुत्तानविसृष्टविग्रहः ।
अपि व्यपाये सति सत्त्वमानयो-
र्द्विषे न दित्सन्निव पृष्ठमाहवे ॥ ४९ ॥

---

45. D. वृन्दं for व्रन्दं Agreeing with the Sinhalese edition.

48. D. °वाल्गादृढकृत्तंमुष्टिना, Fr. °वल्गादृढलग्नमुष्टिना for °वल्गादृढकृष्टमु ष्टिना. Fr. agreeing with the Sinhalese edition.

निमग्नखड्गे जठरे सुरद्विषः
परिक्षरच्छोणितसिक्तमूर्तयः ।
परस्परस्य प्रसभं समुच्छ्वस-
त्प्रहारवातेन पुनर्विशोषिताः ॥ ५० ॥

ततस्ततासृक्स्रवलोहिताम्बरः
श्रियं जयस्थामुपयन्तुमुद्यतः ।
यथेप्सपानाशनतृप्तचेतस-
श्चकार राजन्यवराश्चिरं द्विजान् ॥ ५१ ॥

ततो मरुत्पावकशस्त्रनिर्धुत-
प्रदग्धमारीचसुबाहुविग्रहः ।
बलं बलीयानवलीकृतं भिया
ततं दिगन्तं स निनाय नायकः ॥ ५२ ॥

रणे दधानो हृदयं दयाऽऽहृतं
सलीलमायम्य धनुर्धनुर्धरः ।
पराङ्मुखानां शनकैः शिलीमुखा-
द्विषाद्विपानां जघने जघान सः ॥ ५३ ॥

भृशं न सेहे युधि राममाशुग-
प्रतानशुष्काशनिपातभीषणम्
युगान्ततिग्मद्युतितेजस द्विषो
बलीयसो भ्रातृबलान्वितं बलम् ॥ ५४ ॥

---

50. D. सुरारयः for सुरद्विषः. D. परिस्रवल्लोहित° for परिक्षरच्छोणित°.

51. A. B. जयोत्थां for जयस्थां. D. °पानासन° for °पानाशन°. D. agreeing with the Sinhalese edition. D. Fr. खगान् for द्विजान्.

52. C. क्षणाद्दिगन्तं for ततं दिगन्तं.

53. D. आहत्य for आयम्य.

24. C. चिरं for भृशं. D. °प्रवृन्द° for °प्रतान°.

स्थित्वा गुणे महति तत्क्षणलब्धमोक्षाः
सुश्लिष्टयुक्तिसफलाननसंपदस्ते ।
शाक्या इवास्य विशिखा रिपुसैनिकेभ्य-
श्चक्रुस्त्रिविष्टपसभागमनोपदेशम् ॥ ५५ ॥

हुतभुजि निधनाख्ये शत्रुहव्यानि हुत्वा
परिणयति जयश्रीवीरकन्यां नृवीरे ।
समरपटहघोषे तत्र नृत्तं कबन्धै-
र्बहलरुधिरपङ्कस्फारिसिन्दूरलेपैः ॥ ५६ ॥

मध्येनिकृत्तरजनीचरपूर्वकाया-
श्छेदैः स्थिता भुवि निपत्य भयं वितेनुः ।
रक्षःसु युद्धविमुखेषु विभिद्य भूमी-
मर्धोत्थिता इव पुनः समराय दैत्याः ॥ ५७ ॥

रामायुधव्यथितराक्षसरक्तधारा-
स्पर्शेन लोहितरुचो मुहुरम्बुवाहाः ।
गौरीपतिप्रणतिसंभ्रमलाभवन्ध्यां
सन्ध्यामकालघटितां गगने वितेनुः ॥ ५८ ॥

संक्रीडद्रथतुरगद्विपाभ्रवृन्द-
व्युत्क्रान्तौ विरतपृषत्कपातवृष्टि ।
निस्त्रिंशस्फुरिततडिद्वियुक्तमाप
व्यक्तार्कद्युति शरदीव तन्नभः श्रीः ॥ ५९ ॥

---

55. A. B. C. त्रिपिष्टपसभा° for त्रिविष्टपसभा°.

56. D. °पटहकोपे for °पटहघोषे. C. नृत्यं for नृत्तं. D. कदन्धैः for कबन्धैः.

57. D. निशय्य for निपत्य. D. गोत्रां, Fr. पृथ्वीं for भूमीं. C. प्रधनाय for समराय.

58. D. रोहितरुचः for लोहितरुचः. D °बन्ध्यां for °वन्ध्यां.

59. D. °वृन्द for °वृन्द.

रक्षोवसापिशितपूरितकुक्षिरन्ध्रः
काकुत्स्थबाणहतहास्तिमुखाधिरूढः ।
पर्यन्तलग्नरुधिराणि मृदुप्रणाद-
स्तुण्डानि वायसगणो रदने ममार्ज ॥ ६० ॥

राजात्मजौ मुनिसुताश्रुभिराहिताघ्यौं
प्रत्युद्गतौ मृगकुलैरुटजानि गत्वा ।
आवर्जिते विदधतुः शिरसी सुबाहो-
र्वाणव्रजेन गुरुणी गुरुपादमले ॥ ६१ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ मारीचसुबाहुवधो नाम पञ्चमः सर्गः ॥

---

60. C. °मुखावरूढः for मुखाधिरूढः.

61. C. D. मुनिसुताक्षिभिः for मुनिसुताश्रुभिः. A. B. आहिताघौं for आहिताघ्यौं.

षष्ठः सर्गः ।

उच्चचाल ततः स्रष्टा जगदंशस्य मैथिलम् ।
अनुग्रहीतुमग्रण्यं गृहिणामाहितक्रतुम् ॥ १ ॥

बिभ्रत् सन्ध्याविधिस्नानसंवर्धितरुचो जटाः ।
ज्वाला इव तपोवह्नेः शालिशूकाग्रपिङ्गलाः ॥ २ ॥

तेजसा तपसो दीप्तः स्निग्धश्च करुणागुणात् ।
समं संदर्शितादित्यचन्द्रोदय इवार्णवः ॥ ३ ॥

शिरःप्रदेशलम्बिन्या कुर्वन् रुद्राक्षमालया ।
फलिता इव तीर्थाम्भःसेकपुष्ट्या जटालताः ॥ ४ ॥

अरण्यदेवताभिः स प्रयुक्तबलिमङ्गलः ।
व्रती निरगमत् सत्रान्मेघाद्ब्रध्न इव ज्वलन् ॥ ५ ॥

निनाय हरिणव्रातं स्वयं यत्नेन वर्धितम् ।
प्रस्थितं सह संरुध्य बाष्पापूरितलोचनौ ॥ ६ ॥

गमनव्याहृतारम्भप्रणामेषु महर्षिभिः ।
पाणिभिः शिरसि स्पृष्टौ हव्यधूमसुगन्धिभिः ॥ ७ ॥

वैखानसवधूहस्तलम्भिताघ्यर्कृताशिषौ ।
तौ द्रष्टुकामौ मेदिन्या ईश्वरस्य सुतौ धनुः ॥ ८ ॥

---

1. D. उच्चचार for उच्चचाल. D. कर्ता for स्रष्टा.
3. D. तपसस्तेजसा for तेजसा तपसः.
5. D. अरण्यदेवताभिश्च for अरण्यदेवताभिः स. C. मुनिः for व्रती.
6. C. D. read सह प्रस्थितमारुध्य वर्धितं हरिणव्रजम् । स्वयं निनाय यत्नेन बाष्पापूरितलोचनौ for our text. B. वाष्पापूरितलोचनौ for बाष्पापूरितलोचनौ.
7. D. शिरसि पाणिभिः स्पृष्टौ for पाणिभिः शिरसि स्पृष्टौ.
8. C. D. °लम्भितार्घं° for °लम्भितार्घ्यं.° C. D. द्रष्टुकामौ निनायैशं मेदिनीशसुतौ धनुः for तौ द्रष्टुकामौ मेदिन्या ईश्वरस्य सुतौ धनुः. Agreeing with the Sinhalese edition.

ततश्चिरपरित्यक्तं गौतमस्य तमोनुदः ।
विवेश विश्वभुग्धाम्नो धाम वर्त्मवशाद्वशी ॥ ९ ॥

स्थपुटासु कुटीरस्य निकटाङ्गनभूमिषु ।
प्ररूढदर्भसन्दर्भघासग्रासोद्यतद्विपम् ॥ १० ॥

क्वचिदुद्देहिकालीढजीर्णवल्कलमन्यतः ।
आरण्यतुटुमच्छिन्नशीर्णकृष्णमृगाजिनम् ॥ ११ ॥

तलस्थितजरत्कुम्भमुखान्निर्गच्छताहिना ।
आवर्जितपयास्तिम्यद्वृक्षमूलमिव क्वचित् ॥ १२ ॥

क्वचिद्विष्णुप्रतिच्छन्दःकुक्षिस्थविवराननात् ।
नकुलैरन्त्रवत्कृष्टवेष्टमानसरीसृपम् ॥ १३ ॥

तस्मिन्निजपदस्पर्शत्याजितग्रावविग्रहम् ।
पप्रच्छ स्त्रीमयं तेजो रामः शापस्य संभवम् ॥ १४ ॥

निगद्यासौ सुनासीरं व्रीडानम्रीकृताननना ।
न्यवीविददनुक्त्वैव यौवनाविनयं पुरा ॥ १५ ॥

ययौ रामोऽथ तं देशं मरुतामास वेगिनाम् ।
पुरुहूतहतभ्रूणच्छेदेभ्यो यत्र संभवः ॥ १६ ॥

---

9. A. B. गोतमस्य for गौतमस्य.

10. C. D. निकटाङ्गणभूमिषु for निकटाङ्गनभूमिषु. Agreeing with the Sinhalese edition.

14. D. शापस्य स्त्रीमयं तेजो रामः पप्रच्छ संभवम् for पप्रच्छ स्त्रीमयं तेजो रामः शापस्य संभवम्. Agreeing with the Sinhalese editin.

15. B. शुनासीरं, C. शुनाशीरं, Fr. सुनाशीरं for सुनासीरं. A. D. निगद्यासौ शुनासीरं व्रीडादावर्जिताननना for निगद्यासौ सुनासीरं व्रीडानम्रीकृताननना. A. D. agree with the Sinhalese edition. D. Fr. न्यवीवदत for न्यवीविदत.

16. A. मेधातिथिहतभ्रूणच्छेदेभ्यो यत्र संभवः । मरुतां वेगिनामास देशं रामो ययावथ, B. मेधातिथिहतभ्रूणच्छेदेभ्यो यत्र संभवः । ययौ रामोऽथ तं देशं मरुतामास वेगिनाम्, C. मध्वरातिहतभ्रूणच्छेदेभ्यो यत्र संभवः । मरुतां वेगिनामास देशं रामो ययावथ for our text. C. agrees with the Sinhalese edition.

प्रतीत्या लङ्घिताध्वानस्ते तोरणमणित्विषा ।
इति चेतोहरा राममभिव्यातेनिरे गिरः ॥ १७ ॥

मत्तमातङ्गसंदानदामनिर्दलितत्वचः ।
अजय्यत्वं वदन्तीव यस्य पर्यन्तभूरुहः ॥ १८ ॥

ताराव्रजस्पृशो याति पिधानत्वं निशाकरः ।
यत्र प्राकारचक्रस्य नभोमध्यस्थमण्डलः ॥ १९ ॥

मध्ये कुवलयाक्रान्तमहापद्मविभीषणः ।
अवतीर्णघनालिश्रीर्यत्खातः सागरायते ॥ २० ॥

वप्राजगरभोगेन वेष्ट्यमानः समन्ततः ।
पिण्डीभूत इव त्रासाद्घनो यद्गृहसंचयः ॥ २१ ॥

यद्गोपुरविटङ्काग्रचन्द्रकान्तमणिस्रवम् ।
रसयन्ति स्यदश्रान्ताः शीतदीधितिवाजिनः ॥ २२ ॥

विटङ्कभुजसंप्राप्तसहस्रकरमूर्तिना ।
विग्रहेण यदावाससंतानो भार्गवायते ॥ २३ ॥

यद्देवगृहशृङ्गस्थपद्मरागप्रभाहतम् ।
व्योममध्यं प्रपद्यापि बिम्बं बालायते रवेः ॥ २४ ॥

हर्म्यशृङ्गेषु निर्धूतध्वान्ता यत्र मणित्विषः ।
ज्यौत्स्नः कृष्ण इति ज्ञानं जने रुन्धन्ति पक्षयोः ॥ २५ ॥

यत्र वातायनासन्नवारमुख्यामुखेन्दवः ।
रथ्यासंचारिणो यूनः स्खलयन्ति पदे पदे ॥ २६ ॥

---

18. Fr. निर्दोलित° for निर्दलित°. The reading of the Ms. Fr appears to be corrupt; it agrees with the Sinhalese edition.

21. D. Fr. वेष्टमानः for वेष्ट्यमानः. A. B. C. agree with the Sinhalese edition.

24. D. Fr. विम्बं for बिम्बं.

26. D. Fr. °द्वारमुख्या मुखेन्दवः for °वारमुख्यामुखेन्दवः. D. Fr. रथ्यां संचारिणः for रथ्यासंचारिणः.

श्रुत्वा यत्सौधपृष्ठेषु विमानशिखिनिस्वनम् ।
याति शैथिल्यमुष्णांशुहयभोगीन्द्रबन्धनम् ॥ २७ ॥

सोपानरत्ननिर्भिन्नतमश्छेदेन दर्शिताः ।
ग्लायन्ति यत्र न सरश्चक्रवाका निशास्वपि ॥ २८ ॥

यस्य हर्म्यसमासन्नतिग्मदीधितिवाजिनः ।
मन्दं व्रजन्ति संगीतवीणावर्जितचेतसः ॥ २९ ॥

पौरसन्दोहभोगस्य श्रिया वज्रभृतः पुरीम् ।
अधो विधत्ते धामेदं मैथिलस्य पुरं परम् ॥ ३० ॥

इति व्याहरतैवाथ तेन स्थानं महीयसः ।
परमृद्धं क्रतुपतेर्निन्याते नेतुरात्मजौ ॥ ३१ ॥

कृतपाद्यो भुवो भर्तुः स व्रती प्रमदाश्रुभिः ।
विष्टरं परिजग्राह सिंहचर्मोत्तरच्छदम् ॥ ३२ ॥

स्तुत्यासुतीवलं सत्रे जगादोत्साहयन्मुनिः ।
नुतिर्भ्राजत एवाग्रे निःस्पृहेण प्रभोरपि ॥ ३३ ॥

यो धर्मस्य धृतः सप्ततन्तुभिः सगरादिभिः ।
तन्तुः स एव सम्राजा सम्यगालम्बितस्त्वया ॥ ३४ ॥

---

27. D. Fr. यानस्य for विमान.°

28. D. Fr. म्लायन्ति for ग्लायन्ति. D. Fr. क्षपास्वपि for निशास्वपि.

29. B. C. संगीतवाद्यावर्जित° for संगीतवीणावर्जित.°

32. D. Fr. व्याघ्रचर्मोत्तरच्छदम् for सिंहचर्मोत्तरच्छदम्.

33. B. reads जगादोत्साहयन् सत्रे स्तुतिः स्तुत्यास्तुतीवलम् । स्तुतिर्भ्राजत एवाग्रे निस्पृहेण प्रभोरपि, C. has स्तुत्यास्तुतीवलं सत्रे जगादोत्साहयन्मुनिः । प्रभोर्भ्राजत एवाग्रे निःस्पृहेण कृता स्तुतिः, D. reads स्तुत्यास्तुतीवलं सत्रे जगादोत्साहयन्मुनिः । प्रभोर्भ्राजत एवाग्रे निःस्पृहेणापि हि स्तुतिः for our text. B agrees with the Sinhalese edition.

34. C. D. read तन्तुर्धर्मस्य यः सप्ततन्तुभिः सगरादिभिः । धृतः स एव सम्राजा सम्यगालम्बितस्त्वया. C. D. agree with the Sinhalese edition.

अपि सत्यां विस्रसायामविस्रस्तां तव श्रियम् ।
विक्रमस्य वदन्तीव सत्रसंभारसंपदः ॥ ३५ ॥

कृतवेलाव्यतिक्रान्तिस्त्वरासंकोचिताम्बरा ।
साभिसारेव ते कीर्तिर्दूरमाक्रामदाशया ॥ ३६ ॥

कच्चित्स्वार्थे क्रतुरयं स्वर्ग्यस्तव फलस्पृहाम् ।
विनैव प्रथते कच्चिन्निःस्वं प्रति वदान्यता ॥ ३७ ॥

आदाय करमाढ्येभ्यः कीकटेष्वपि वर्षसि ।
प्रपीय वारि सिन्धुभ्यः स्थलेष्विव घनाघनः ॥ ३८ ॥

नवे वयसि राज्यार्थं प्रविधाय जरां गतान् ।
कच्चित्पुष्णासि ते भृत्यान् सादरं समयेऽक्षमे ॥ ३९ ॥

त्वद्विक्रमेण वैधव्यं प्रापिता रिपुयोषितः ।
बालप्राणार्थिनीः कच्चित्सम्यग्रक्षसि बन्धुवत् ॥ ४० ॥

द्वयेनादौ त्रिवर्गस्य कच्चित्साम्यं गताश्चिरम् ।
धर्मोऽद्य वयसो वृध्या सह संवर्धते तव ॥ ४१ ॥

इति प्रश्नावकाशस्य विरामे रामलक्ष्मणौ ।
मुनेर्विवेद वैदेहो द्रष्टुकामौ निजं धनुः ॥ ४२ ॥

---

35. D. reads the following for our text:—विस्रसायामविस्रस्तां त्रि-क्रमस्य तव श्रियम् । सत्यामपि वदन्तीव सत्रसंभारसंपदः. D. agrees with the Sinhalese edition.

37. D. स्वार्थे कच्चित्क्रतुरयं for कच्चित्स्वार्थे क्रतुरयं. D. वदन्यता for वदान्यता.

38. C. दरिद्रेषु for कीकटेषु. C. निपीय for प्रपीय.

39. D. भृत्यानपि सादरमक्षमे for भृत्यान्सादरं समयेऽक्षमे. D. agrees with the Sinhalese edition.

40. C. वैरियोषितः for रिपुयोषितः. C. पुत्रप्राणार्थिनीः, D. शिशुप्राणार्थिनीः for बालप्राणार्थिनीः.

एकमुद्रेचितं तस्य भ्रूचापमनुजीविभिः ।
चापस्यानयने हेतुः क्षणमास क्षमापतेः ॥ ४३ ॥

वरवक्त्रेन्दुबिम्बत्विड्ग्रासगृध्नुं परं ग्रहम् ।
सीताविवाहसंयोगसुखरोधार्गलान्तरम् ॥ ४४ ॥

अहिर्बुध्न्य परित्यागतीव्रशोकभरादिव ।
मध्ये लोहसमुद्रस्य निःशब्दं शयितं चिरम् ॥ ४५ ॥

अमार्दवमतिस्तब्धं गुणेनापि न नामितम् ।
ईशेन दर्शितस्नेहं नीचं जनमिवाग्रहम् ॥ ४६ ॥

चक्रीचकार कर्णान्तावतंसितनखद्युतिः ।
तद्दाशरथिरादाय सीताक्रयधनं धनुः ॥ ४७ ॥

ततस्त्रासकरो नादश्चापभङ्गसमुद्भवः ।
दिशः ससर्प रामस्य यशोघोषणडिण्डिमः ॥ ४८ ॥

क्षेत्रभूमिर्गुणस्यासौ सीतया सहिता वृता ।
वर्मैः फलवती सद्यः प्रचकम्पेऽखिला पुरी ॥ ४९ ॥

रोमोद्भेदापदेशेन हर्षमङ्कुरितं हृदि ।
सिञ्चन्नश्रुस्रवेण स्म मुनिमाह महीपतिः ॥ ५० ॥

---

43. D. तस्योद्रेचितमेवैकं for एकमुद्रेचितं तस्य. D. agrees with the Sinhalese edition.

44. D. °विम्ब° for °बिम्ब°. D. °गृध्नुपरग्रहम् for °गृध्नुं परं ग्रहम्.

45. C. अहिर्बुध्न°, D. अहिर्ब्रध्न° for अहिर्बुध्न्य°.

46. C. D. जनं नीचमिवाग्रहम् for नीचं जनमिवाग्रहम्. C. D. agreeing with the Sinhalese edition.

47. C. सीताक्रयधनं दाशरथिरादाय तद्धनुः for तद्दाशरथिरादाय सीताक्रयधनं धनुः. C. agrees with the Sinhalese edition.

48. C. यशोयात्रिकडिण्डिमः for यशोघोषणडिण्डिमः.

50. C. मुनिमश्रुस्रवेण स्म सिञ्चन्नाह महीपतिः, D. सिञ्चन्नश्रुस्रवेण स्म मुनिमाह विशांपतिः for सिञ्चन्नश्रुस्रवेण स्म मुनिमाह महीपतिः. C. agrees with the Sinhalese edition.

प्रौढेऽपि वयसि प्रायो रुणाद्धि तपसि स्पृहाम् ।
यच्चापभङ्गदेयं मे प्रार्णं सीमन्तिनीधनम् ॥ ५१ ॥

तद्रामस्य गतं दास्यं विक्रमक्रयलम्भितम् ।
अस्य ह्रस्वद्वितीये मे न्यस्तां विध्यूर्मिलामपि ॥ ५२ ॥

शोकाख्यमस्य वैदेह्या विवाहपरिलम्बजम् ।
हृच्छल्यमस्तुकारेण तपस्यन् निचकर्ष सः ॥ ५३ ॥

अथ दूतास्थितः प्रायाद्राजद्वयमनोरथः ।
अयोध्यामन्यराजन्यप्रीतिप्रशमनो रथः ॥ ५४ ॥

यन्नासीद्रघुपतिरूपनिर्जितोऽसौ
वैलक्ष्यक्षतकृतसंमदावसादः ।
लालाट्यज्वलनरयेण भूतभर्त्रा
नैरात्म्यं हृदयभुवः शिवाय सृष्टम् ॥ ५५ ॥

पीनांसो नियतमुरस्तटो विशालः
क्षामं तव्द्यथयति मध्यमं शरीरम् ।
धात्रेति स्वयमनुचिन्त्य लम्बबाहु-
स्तम्भाभ्यां दृढमिव यन्त्रितोऽस्य देहः ॥ ५६ ॥

---

51. C. reads the following for our text चापभङ्गेन यद्देयं प्रार्णं सीमन्तिनीधनम् । प्रौढेऽपि वयसि प्रायो रुणद्धि तपसि स्पृहाम्. C. agrees with the Sinhalese edition.

52. C. reads the follwing for our text गतं रामस्य दास्यं तद्वि-क्रमक्रयलम्भितम् । अस्य भ्रातृद्वितीये मे न्यस्तां विध्यूर्मिलामपि. C. agreeing with the Sinhalese edition.

53. D. दुःखाख्यं for शोकाख्यं. D. जानक्याः for वैदेह्याः.

54. D. तदा for अथ. D. प्रागात् for प्रायात्.

55. C. लालाटज्वलनरयेन, D. लालाटज्वलनरयेण for लालाट्यज्वलनरयेण.

नेत्रान्ताधरकरपल्लवप्रभाभि-
स्तेनोष्णद्युतिकरकुङ्कुमानुलिप्तः ।
व्याकोशारुणवनजप्रभाविशेषो
निर्जित्याहित इव पादयोरधस्तात् ॥ ५७ ॥

ज्ञानं विलोचनमिति प्रथिते तदीये ।
नेत्रे उभे विमलवृत्तिगुणस्वभावे ।
एकं तयोः श्रुतिपथस्य समीपमात्रं
यातं प्रपन्नमखिलश्रुतिपारमन्यत् ॥ ५८ ॥

इत्थं वराश्रयकथेषु जनेषु सीतां
नम्रेण घर्मसलिलास्पदगण्डलेखा
तस्थौ मुखेन शशिनिर्मलदन्तकान्ति-
ज्योत्स्नानिषिक्तदशनच्छदपल्लवेन ॥ ५९ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरधिशयभूतस्य कुमारदासस्य
कृतौ मिथिलाप्रवेशो नाम षष्ठः सर्गः ॥

---

57. D. व्याकोष° for व्याकोश°.
59. D. °गण्डरेखा for °गण्डलेखा.

सप्तमः सर्गः ।

ततो धरित्रीतनया गरीयः
सा शासनं प्राप्य गुरोरलङ्घ्यम् ।
स्थपत्यशुद्धान्तजनैः परीता
जगाम कर्तुं व्रतिनो नमस्याम् ॥ १ ॥

सुखेन नत्वा गजकुम्भपीन-
स्तनावकृष्टा चरणौ महर्षेः ।
तथैव भूयो भरमुद्वहन्ती
समुन्ननाम प्रतिपद्य यत्नम् ॥ २ ॥

सत्यं यदस्याः प्रविभाव्यरागो
दृष्टिप्रवेकः खलु कृष्णवर्त्मा ।
स्नेहेरितं तद्वनदोपमस्य
धैर्येन्धनं तेन ददाह भर्तुः ॥ ३ ॥

विन्यस्तपीनस्तनहेमकुम्भा
स्वेदाम्बुभिस्तद्धृदयोपकार्या ।
मनोभुवस्तत्प्रथमप्रवेशे
सिक्तापि नो तत्र रजः शशाम ॥ ४ ॥

---

1. C. ततः पृथिव्यास्तनया for ततो धरित्रीतनया. D. reads the following for our text:—स्थपत्यशुद्धान्तजनैः परीता ततो धरित्रीतनया गरीयः। सा शासनं प्राप्य गुरोरलंघ्यं जगाम कर्तुं व्रतिनो नमस्याम्. Agreeing with the Sinhalese edition.

3. C. reads the first two lines thus:—दृष्टिप्रवेकः प्रविभाव्यरागः सत्यं यदस्याः खलु कृष्णवर्त्मा. C. agrees with the Sinhalese edition. D. तस्य for तेन.

4. C. D. स्वेदोम्बुभिः for स्वेदाम्बुभिः. D. सिक्ता च for सिक्तापि.

तुष्टो नु भङ्गादविपन्नधाम्नः
शैवस्य चापस्य सुबाहुशत्रुम् ।
स्मरस्तमालिङ्ग्य तया प्रयुक्त-
श्चक्रे विहस्तं नु विशालदृष्ट्या ॥ ५ ॥

विधातृमुख्यैरपि दृश्यरूपं
रूपं निरूप्यार्धनिरीक्षितेन ।
एवं स गुण्यो गणयाम्बभूव
भूम्ना मनस्वी मनसैव तस्याः ॥ ६ ॥

प्रसीद मैवं परिभूदखण्डं
ताराधिपं ते वदनामृतांशुः ।
इति प्रियायाः पतितेव पादे
तारातातिर्दीप्तनखच्छलेन ॥ ७ ॥

कृष्टा नितान्तं कृशवृत्तिमध्यं
मास्म च्छिनच्छ्रोणिरिति प्रचिन्त्य
गुर्वी तदूरुद्वयशातकौम्भ-
स्तम्भद्वयेनेव धृता विधात्रा ॥ ८ ॥

तदस्तु सोष्मं कठिनं प्रकृत्या
तनोति तापं स्तनयोर्द्वयं यत् ।
मध्यस्तमप्येतदनिन्द्यवृत्ते-
र्वलित्रयं मां दहतीति चित्रम् ॥ ९ ॥

---

5. C. has the following for the first two lines–चापस्य भङ्गाद-विपन्नधाम्नः शैवस्य तुष्टो नु सुबाहुशत्रुम्. Agreeing with the Sinhalese edition.

6. C. has the fallowing for the last two lines:–तस्याः स गुण्यो गणयाञ्चकार एवं मनस्वी मनसैव भूम्ना.

7. D. क्षमस्व for प्रसीद.

8. A. B. C. °शातकौम्भ°, D. शातकुम्भ.° We with A. B. C.

9. D. बलित्रयं for वलित्रयं.

स्तनौ नु कुम्भप्रतिमौ सुदत्या
निःशेषवक्षस्तटबद्धबिम्बौ ।
पिण्डौ नु पीनौ नवयौवनस्य
न्यस्तौ शरीरादतिरिक्तवन्तौ ॥ १० ॥

विभाति तन्व्या नवरोमराजिः
शरीरजन्मानलधूमरेखा ।
अन्योन्यबाधिस्तनमण्डलस्य
मध्यस्य धात्रा विहितेव सीमा ॥ ११ ॥

यात्यङ्गदोऽप्येष विवृद्धदीप्ति-
रनङ्गदत्वं न्यसनेन यत्र ।
तथाहि शक्तिर्मदनस्य दाने ।
चारुप्रकोष्ठस्य भुजद्वयस्य ॥ १२ ॥

वक्त्रेन्दुलीलामनुयातुमस्याः
कलान्तराणि प्रतिपद्य चन्द्रः ।
पूर्णोऽपि साधर्म्यविशेषशून्यः
क्रमेण शोकादिव याति हानिम् ॥ १३ ॥

मृगाङ्गनानां नयनानि पूर्वं
विधाय नीलानि च नीरजानि ।
कृतप्रयोगेण पुनर्विधात्रा
सृष्टं नु नेत्रद्वयमायताक्ष्याः ॥ १४ ॥

---

10. D. सुमुख्या for सुदत्या. C. D. °बिम्बौ for °बिम्बौ.

11. C. नवरोमराजी, D. नवलोमराजिः for नवरोमराजिः. C. °धूमरेपा, D, धूम्र.ले ग, Fr. °धूमलेपा for °धूमरेखा.

13. D. अनुकर्तुं for अनुयातुं. C. सोमः for चन्द्रः. C. दुःखादिव for शोकादिव.

14. C. एणाङ्गनानां, D. खर्वाङ्गनानां for मृगाङ्गनानां. B. निर्माय for विधाय. C. धृत° for कृत°. C. कृतं for सृष्टं.

अन्वेति कान्त्या कमनीयमस्या
युग्मं भ्रुवोरायतनम्रलेखम् ।
रोषेण कृत्तस्य हरेण मध्ये
छेदद्वयं मन्मथकार्मुकस्य ॥ १५ ॥

असर्पतामापतितालकान्त-
पर्यन्तकान्ति श्रुतिमूलमस्याः ।
भ्रुवौ नु वक्तुं तरलत्वमक्ष्णो-
र्भ्रूयुग्मकौटिल्यमिमे नु दृष्टी ॥ १६ ॥

तन्व्या मनोज्ञस्वरनैपुणेन
विनिर्जितो रोषविलोहिताक्षः ।
प्रसक्तचिन्ताहितमन्यपुष्टः
शोकेन कार्ष्ण्यं वहतीति मन्ये ॥ १७ ॥

पुष्पायुधः स्वात्मनि शस्त्रपातान्
कुर्वीत सीताकृति वीक्ष्य रत्नम् ।
चित्रीयते तन्न यदात्मयोने-
स्तीव्रा मयि व्यापृतिरायुधानाम् ॥ १८ ॥

सति स्म तस्यातिगुरुप्रतर्के
चेतस्यथ प्राह मुनिं नरेन्द्रः ।
प्रणम्य शुद्धान्तमुपैति पादौ
तीर्थादनूनौ भवतः स्नुषेति ॥ १९ ॥

---

15. C. °रेखम्, D. °लेपम् for °लेखम्. C. क्रोधेन for रोषेण. D. भवेन for हरेण.

17. D. कोप° for रोष°. D. दुःखेन for शोकेन.

कलत्रभारेण कुचद्वयस्य
स्थाम्ना तथा मन्थरविक्रमायाः ।
आसीत् स तस्या गतिमन्थरत्वेऽ-
सौ राजपुत्रोऽपि तृतीयहेतुः ॥ २० ॥

अनुव्रजन्तं परिवारवर्गं
प्रव्याहरन्ती किल नाम किञ्चित् ।
तिर्यग्विवृत्ताननचन्द्रबिम्बा
रामं जघानार्धनिरीक्षितेन ॥ २१ ॥

तस्यां गतायां सह राघवाभ्यां
भर्ता भुवः संयमिनं ततस्तम् ।
द्रष्टुं निनाय स्वयमृद्धिसारं
सत्रस्य विप्रैरकृशं ततस्य ॥ २२ ॥

दूरोऽपि देहेन वियोगवह्नेः
प्रवर्धिताधिः स्फुटतीति भीतः ।
तद्रक्षणायैव कृतप्रयत्नो
मुमोच तस्या हृदयं न रामः ॥ २३ ॥

20, D. reads the last three lines thus:—स्थाम्ना च तस्या गति-मन्थरत्वे । आसीत्तथा मन्थरविक्रमायास्तृतीयहेतुः स हि राजपुत्रः. Agreeing with the Sinhalese edition.

21. C. संव्याहरन्ती for प्रव्याहरन्ती. D. °विम्बा for °बिम्बा.

22. A. B. C. द्रष्टुं निनाय, D. Fr. निनाय द्रष्टुं. We with A. B. C. supported by the Calcutta edition.

23. C. D. रामो न तस्या हृदयं मुमोच for मुमोच तस्या हृदयं न रामः.

यातेे च रामे नयनाभिरामे ।
दृष्ट्वा दिशः किं फलमस्ति शून्याः ।
इतीव पद्मायतलोचनाया
विलोचने नेत्रजलं रुरोध ॥ २४ ॥

कृतेऽपि पाणिग्रहणे मयेयं
जाता परत्राहितरागवृत्तिः ।
बालेति तस्या वलयं कृशाङ्ग्याः
ससर्ज रोषेण यथा कराग्रम् ॥ २५ ॥

संतापवह्निर्हृदि सन्नताङ्ग्याः
कामाहितः खेदविलोहितेन ।
नेत्रद्वयेनेव बहिःप्रवृत्त-
ज्वालावलिः संविविदे सखीभिः ॥ २६ ॥

याता नु सा तानवमङ्गजाग्नि-
तप्ते चिरं तद्धृदये निवासात् ।
उत स्वकीये हृदि तं निविष्ट-
मूढ्वा तनुत्वं श्रमजं गता नु ॥ २७ ॥

दूरेऽपि रामः परिकल्पवृत्त्या
किं दृश्यतेऽस्मिन्नथ वा स्थितेऽपि ।
किं मे प्रवासः प्रतिभाति पापा-
दित्यास तस्या विविधो विकल्पः ॥ २८ ॥

---

24. D. Fr. read याते च दृष्ट्वा नयनाभिरामे । रामे दिशः किं फलमस्ति शून्याः for our text, Agreeing with the Sinhalese edition.

25. D. Fr. बाला for जाता. D. Fr. जातेति for बालेति.

26. D. Fr. विवेद कामावहितः सखीभिः for कामाहितः खेदविलोहितेन. D. Fr. वहिःप्रवृत्त° for बहिःप्रवृत्त°. D. Fr. ज्वालावलिः खेदविलोहितेन for ज्वालावलिः संविविदे सखीभिः. D. Fr. agree with the Sinhalese edition.

28. D. Fr. वितर्कः for विकल्पः.

मृदुप्रवालास्तरणेऽपि तन्वी
  शिलातले नैव धृतिं सिषेवे ।
असृक्स्रवार्द्रे शरतल्पमध्ये
  सा पुष्पकेतोरिव वर्तमाना ॥ २९ ॥

तुषाररश्मेरुदयेऽपि तस्या
  नेत्रोत्पलं नो मुकुलीबभूव ।
चन्द्रे मुखच्छन्नानि दीर्घकाल-
  मभ्यासतो नु प्रियचिन्तया नु ॥ ३० ॥

ससीकरं गर्भदलं कदल्या
  न्यस्तं नताङ्ग्या हृदये सखीभिः ।
बबन्ध भिन्नस्फटिकावदातं
  पुष्पेषुबाणव्रणपट्टशोभाम् ॥ ३१ ॥

कस्यापि दृष्ट्या मयि यद्विरागः
  स्वपादसेवाभिरतेऽपि तत्किम् ।
इतीव शैथिल्यमतानि तस्या
  युग्मेन सन्नूपुरयोरमन्दम् ॥ ३२ ॥

सखीसमीपेऽपि सखेदवृत्ति-
  श्चन्द्रातपैरप्यनुतापभाजा ।
देहेन वैदेहसुता निनाय
  दिनानि दीना कतिचित्कथञ्चित् ॥ ३३ ॥

---

29. D. शिलातलेनैव for शिलातले नैव.

31. D. Fr. सशीकरं for. ससीकरं. D. वधूभिः for सखीभिः. D. छिन्न° for भिन्न°. D. Fr. पुष्पेषुवाण° for पुष्पेषुबाण°.

32. D. reads the following for the last three lines, स्वपादसेवाभिरतेऽप्यभूत्किम् । युग्मेन तन्नूपुरयोरमन्दमितीव शैथिल्यमतानि तस्याः. Agreeing with the Sinhalese edition.

सार्धं द्विजैः पावनसोमपान-
निर्धूतपाप्मन्यथ सत्रनाथे ।
मखस्य कोटिं प्रकृतस्य मुख्ये
क्षितिक्षितामीयुषि वीतविघ्नम् ॥ ३४ ॥

जनाधिनाथः पुरुहूतकल्पः
समग्रशक्तिः सुतयुग्ममन्यत् ।
ततः समादाय सुमन्त्रसूतः
पुरं प्रपेदे जनकस्य राज्ञः ॥ ३५ ॥

क्षत्रस्य नक्षत्रमदोषदुष्टं
वैवाहिकं वाहितशत्रुवीरः ।
पुरोहितेनाभिहितं निशम्य
संपादयामास विधिं विधिज्ञः ॥ ३६ ॥

स्नातद्विजारूढमदद्विपेन्द्र-
स्कन्धस्थकार्तस्वरकुम्भपंक्त्या ।
नृपस्य धिष्ण्ये प्रकृते समन्ता-
दच्छेदवत्पावनतीर्थतोये ॥ ३७ ॥

रथ्योभयान्ताहितशातकुम्भ-
कुम्भस्थपङ्केरुहगन्धविद्धे ।
तिरोदधाने गगनं सुगन्धौ
कर्पूरकृष्णागरुसारधूपे ॥ ३८ ॥

---

35. B. लोकैकनाथः, C. प्रजाधिनाथः for जनाधिनाथः. D. समन्त्रसूतः Fr. सुमन्तुसूतः for सुमन्त्रसूतः.

37. B. °चामीकर°, C. °जाम्बूनद° for °कार्तस्वर°. D. भूपस्य for नृपस्य. D. Fr. घिष्ण्यं for धिष्ण्ये.

38. C, °शातकौम्भ° for °शातकुम्भ°. D. गगणं for गगनं. D. Fr. °कालागुरु° for °कृष्णागरु°.

चरत्सु वन्द्याननिःसृतेषु
नरेन्द्रसूनोर्जयघोषणेषु ।
प्रध्मातशङ्खध्वनिबृंहितेषु
ध्वनत्सु तूर्येषु च मङ्गलाय ॥ ३९ ॥

लाजा जलं दर्भमिति प्रसक्त-
माविष्कृताम्रेडितशीघ्रनादे ।
आहूय संपादयतोऽपि भृत्यान्
प्रत्युद्व्रजत्याकुलभृत्यवर्गे ॥ ४० ॥

ज्ञातुं मुहुर्यामघटीजलस्य
वृत्तिं प्रयुक्ते नृपदासवृन्दे ।
धावत्युरोघातनिपातिताध्व-
मार्गस्थलोकेऽपि गतागताभ्याम् ॥ ४१ ॥

आसन्नभूतो महितो मुहूर्तः
किं स्थीयते तावदिति प्रगल्भम् ।
वृद्धेषु वंशद्वितयस्य धीरं
स्नानाय सद्यस्त्वरयत्सु रामम् ॥ ४२ ॥

उच्चैर्भृतान्यस्वरमुच्चरत्सु
समं समाविष्कृतमङ्गलेषु ।
आपूरिताशेषककुब्मुखेषु
पटुप्रसक्तं पटहध्वनेषु ॥ ४३ ॥

---

39. D. Fr. बन्द्या° for वन्द्या°. B. C. नृपेन्द्र° for नरेन्द्र°. D. Fr. द्वंहितेषु for बृंहितेषु. B. C. मङ्गलार्थे for मङ्गलाय.

40. D. Fr. °तूर्ण° for °शीघ्र°. D. Fr. दासान् for भृत्यान्.

41. B. परिवारवृन्दे, C. परिवारलोके, D. नृपभृत्यवृन्दे for नृपदासवृन्दे.

42. A. वीरं for धीरं.

43. D. Fr. ककुस्मुखेषु for ककुब्मुखेषु. A. B. पटुप्रणादं for पटुप्रसक्तं.

वेत्रेण वेत्रग्रहणाधिकारे
　　जने च तत्रानुपयोगवन्ति ।
दिदृक्षुवृन्दानि निरस्यमाने
　　मुखेन हुङ्कारकृता नितान्तम् ॥ ४४ ॥

हुङ्कारमात्रप्रथितैरमर्षै-
　　स्तिर्यक्कराग्रस्य विकम्पितेन ।
निवारयन्तो मुखरं जनौघं
　　माशब्दिका वेश्मनि तत्र चेरुः ॥ ४५ ॥

केचिद्विधातुं विधिमुद्यतेभ्यः
　　क्रियासु दक्षाः कुशलेतरेभ्यः ।
आच्छिद्य वैवाहिककर्मयोग्य-
　　वस्तूनि भृत्या विदधुर्विधानम् ॥ ४६ ॥

शच्या विवाहस्य विधानमाद्यं
　　नामान्तरेण प्रथितं विधिज्ञः ।
पर्यस्य चित्तानि तथा सुताया
　　नृपस्य तत्रैव जनस्ततान ॥ ४७ ॥

---

44. C. हुङ्कारवता for हुङ्कारकृता.

45. C. हंकारमात्रोपचितैः for हुंकारमात्रप्रथितैः. C. व्यपोहयन्तः for निवारयन्तः. D. Fr. माशाब्दिकाः for माशब्दिकाः.

46. D. Fr. read the first two lines:—क्रियासु दक्षा विधिमुद्यतेभ्यः । केचिद्विधातुं कुशलेतरेभ्यः. Agreeing with the Sinhalese edition.

47. D. सच्याः for शच्याः.

स्नानस्य रत्नाभरणेन दीप्त-
माकल्पमन्ते विधिवद्विधाय ।
ययौ वधूर्वेदविदा कृतार्घ्ये
वेद्या उपान्तं विधुरा स्मरेण ॥ ४८ ॥

अथोपनिन्ये नयकोविदेन
महेन्द्रसख्यास्तनुजेन तन्वी ।
लज्जाविधेया विधवेतराभि-
र्विभूषिताऽसौ विभुनन्दनाय ॥ ४९ ॥

समाददे संमदभिन्नधैर्यः
पाणिं फणीन्द्राङ्गगुरुप्रकोष्ठः ।
तस्याः कुमारः सुकुमारसन्धि
वामेतरं वामविलोचनायाः ॥ ५० ॥

प्राज्यं ततः प्राज्ञतरेण हव्य-
मावर्जितं वर्जितदुष्कृतेन ।
विधातृधाम्ना विधिवत्कृशानौ
सदिन्धने शीलधनेन तेन ॥ ५१ ॥

---

48. C. has the following for our text :—आकल्पमन्ते विधिवद्विधाय स्नानस्य रत्नाभरणेन दीप्तं । ययावुपान्तं विधुरा स्मरेण वेद्या वधूर्वेदविदा कृतार्घ्यं. D Fr. कृतार्घं for कृतार्घ्यं.

49. B. रघुनन्दनाय for विभुनन्दनाय.

51. C. reads the following for our text:—आवर्जितं वर्जितदुष्कृतेन सदिन्धने शीलधनेन तेन । विधातृधाम्ना विधिवत्कृशानौ प्राज्यं ततः प्राज्ञतरेण हव्यम् ॥ Agreeing with the Sinhalese edition.

वेद्यामनंसीदनवद्यवृत्ति-
स्तन्वी ततो वेदविदा प्रयुक्ता ।
प्रदक्षिणीकृत्य विवाहसाक्षी-
कृतं कृशानुं सह राघवेण ॥ ५२ ॥

गण्डस्य बिम्बं दुहितुर्धरित्र्या
घर्माम्भसां विन्दुरलश्चकार ।
चेतःस्थकन्दर्पकृशानुना वा
तस्योष्मणा वा परमार्थवह्नेः ॥ ५३ ॥

चकार चक्राङ्कतलेन पाणौ
करेण भर्त्राभिनिपीड्यमाने ।
सीत्कारमाकुञ्चितदीर्घदृष्टिः
स्पर्शेन वह्नेः किल नाम सीता ॥ ५४ ॥

व्यापारिता वाङ्मयपारगेण
द्विजेन तेन द्विजराजवक्त्रा ।
बाला कृशानौ कृशगात्रयष्टि-
र्भावानभिज्ञाथ जुहाव लाजान् ॥ ५५ ॥

पत्युः करस्पर्शकृते कृशाङ्ग्या
हर्षे सखीभिः प्रविभाव्यमाने ।
आचारधूमागमलब्धजन्मा-
न्यश्रूणि तत्संवृतये बभूवुः ॥ ५६ ॥

---

52. B. नियुक्ता for प्रयुक्ता.

53. D. Fr. धरिण्याः for धरित्र्याः. D. Fr. स्वेदाम्भसां for घर्माम्भसां.

54. D. Fr. शीत्कार° for सीत्कार°.

55. C. तन्वी for बाला.

56. A. B. C. तत्संवरणाय जग्मुः for तत्संवृत्तये बभूवुः.

कृत्वा नमस्यामनुपूर्वमुक्तो
भर्तुर्भुवो विप्रवरेण रामः ।
समेतजानिर्जनकस्य राज्ञो
वन्दिस्तुतस्यांघ्रियुगं ववन्दे ॥ ५७ ॥

पश्यन्सुतं पाशभृतो दधानं
गङ्गाकरासक्तकरस्य कान्तिम् ।
तस्थौ नृपः स्तब्धविशालदृष्टि-
रश्रुस्रवाक्षालितपक्ष्मरेखः ॥ ५८ ॥

रत्नासनस्थामथ पौरमुख्या
बाष्पप्रकाशप्रणयाः प्रणेमुः ।
भर्तुः सुतामेत्य वरं च तस्याः
कक्षान्तरे दत्तसितातपत्रम् ॥ ५९ ॥

नीत्वा विवाहोत्सवसंभृतेन
सुखेन रामः कतिचिद्दिनानि ।
ततः कदाचित्सभयाववोध-
दक्षेन विद्धो हृदि मन्मथेन ॥ ६० ॥

गौरीमिवाचारगुणेनगुर्वीं
करे गृहीत्वा करभोपमोरूम् ।
सतल्पभूभागमनल्पशोभं
भवप्रभावो भवनं विवेश ॥ ६१ ॥

---

57. D. Fr. वन्दिस्तुतस्य for वन्दिस्तुतस्य. C. अङ्घ्रियुगं, D. अंह्रियुगं for अङ्घ्रियुगं.

58. D. दीप्तिं for कान्तिं.

59. D. Fr. वाष्प° for बाष्प°.

60. Fr. रामो विवाहोत्सवसंभृतेन सुखेन नीत्वा कतिचिद्दिनानि for the first half of our text.

भुवि विरचितमग्रे तल्पमालोक्य भीतिं
स्पृशति मनसि बालां साश्रुपातस्थितां ताम् ।
नृपतिभवनरत्नस्तम्भमालिङ्ग्य दोर्भ्यां
रघुपतिरुपगृह्य प्रापयद्भूमिशय्याम् ॥ ६२ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ सीताविवाहवर्णनो नाम सप्तमः सर्गः ॥

अष्टमः सर्गः ।

आचरन्नथ स योषितो हठं
सा च वामचरिताऽनुरागिणः ।
अप्यनीप्सितविधानचेष्टितौ
तेनतुः सपदि संमर्दं मिथः ॥ १ ॥

कामिना समुपगुह्य बालिका
सप्रयत्नमुपवेशिताऽप्यसौ ।
वाञ्छति स्म समुदेतुमङ्कतः
साध्वसेन चपला मुहुर्मुहुः ॥ २ ॥

राघवेण परिरभ्य पृष्ठतः
सस्पृहं निगदिते मनोरथे ।
व्रीडयावनतवक्त्रपङ्कजा
धीरमस्मयत चारुहासिनी ॥ ३ ॥

अङ्गुलीषु परिगृह्य राघवे
वेधयत्युरसि रागिभिर्नखैः ।
सास्मितं विवलिताङ्गुलिर्बला-
दात्मनः करमुदास मानिनी ॥ ४ ॥

---

1. C. योषिति for योषितः. C. अनुरागिणि for अनुरागिणः.

2. B. C. read the following for our text :—सप्रयत्नमुपवेशिताप्यसौ बालिका समुपगुह्य कामिना । साध्वसेन चपला मुहुर्मुहुर्वाञ्छति स्म समुदेतुमंकतः ॥ Agreeing with the Sinhalese edition. [C. कामिनी for बालिका].

3. D. सस्मितं for सस्पृहं. A. B. मनोगते for मनोरथे. D. चारुभाषिणी for चारुहासिनी.

4. D. सस्पृहं for सास्मितं. D. विचलित° for विवलित°. C. भामिनी, D. कामिनी for मानिनी.

किन्तु वक्ति कुपितेति वोदितुं
कामिना निधुवने सविग्रहम् ।
याचितैनमभिकोपजिह्मित-
प्रेरितेक्षणकटु व्यलोकयत् ॥ ५ ॥

पुष्पकेतुहृतधैर्यबन्धनं
तस्य भावमवगम्य निर्गमैः ।
सावकाशमथ कुर्वतीः सखीः
संरुरोध वसनान्तसङ्गिनी ॥ ६ ॥

इच्छति स्म विरहं न कामिनी
सङ्गमं न भृशमाकुलीकृता ।
विप्रयोगसमये मनोभुवा
लज्जया नृपसुतस्य सन्निधौ ॥ ७ ॥

तस्य हस्तमबला व्यपोहितुं
मेखलागुणसमीपसङ्गिनम् ।
मन्दशक्तिररतिं न्यवेदय-
ल्लोलनेत्रगलितेन वारिणा ॥ ८ ॥

तत्र राजदुहितुर्बलात्क्रिया-
माचरत्युदितलोचनाम्भसः ।
आगमिष्यदनुचिन्त्य खण्डनं
भीतवद्भृशमकम्पताधरम् ॥ ९ ॥

---

5. D. स्वग्रहं निधुवनेषु कामिना for कामिना निधुवने सविग्रहम्. Agreeing with the Sinhalese edition.

6. D. वसनान्तसङ्गिनीः for वसनान्तसङ्गिनी. And construes it with सखीः.

न स्पृशामि रशनागुणं पुन-
निर्दयं भुजयुगेन पीडितः ।
इत्युवाच नृपसूनुरर्थिनी
सा ततान परिरम्भमस्फुटम् ॥ १० ॥

अन्तरीयहरणे कृतत्वरं
राघवं तमपयान्तमङ्गना ।
तत्पटान्तपरिधानरक्षिता
संरुरोध परिरभ्य पृष्ठतः ॥ ११ ॥

अंशुकस्य निशि रक्षणाकुला
हस्तयुग्मधृतनीविबन्धना ।
अप्रमादकृतिविघ्नमन्तरा
स्वापमाप शयने पराङ्मुखी ॥ १२ ॥

यद्ररक्ष दृढवस्त्रबन्धनैः
स्वापकालमवगम्य भर्तरि ।
तत्प्रमृष्टवति संगतस्मृतिः
सा रुरोद मुषितेव सस्वरम् ॥ १३ ॥

यत्नगम्यमथ मैथिलीमुखं
सोऽनुभूय नहि तृप्तिमाययौ ।
आननेन परिघट्य बोधितं
राजहंस इव पद्मकुड्मलम् ॥ १४ ॥

---

11. C. अपयन्तं for अपयान्तं.

12. D. अप्रमादकृतविघ्नमन्तरा for अप्रमादकृतिविघ्नमन्तरा. Agreeing with the Sinhalese edition.

13. D. सस्वनम् for सस्वरम्.

14. A. B. चञ्चुनात्रि [त्र or पि] for आननेन. Corrected to this in the margins of A. B. The readings being completely blotted, we cannot make them out. C. विघटय्य for परिघट्य. B. C. पद्मकुड्मलं for पद्मकुड्मलं.

प्रेमवेगदृढदंशपीडितं
यत्तदीयमधरोष्ठपल्लवम् ।
तद्दयार्द्रहृदयः शनैः पिबन्
स क्षणेन विनिनाय वेदनाम् ॥ १५ ॥

ग्राहितं नृपतिशक्रसूनुना
स्वाधरं विविधचाटुचेष्टितैः
पानवर्जितमदन्तविक्षितं
भूय एव सृजति स्म मानिनी ॥ १६ ॥

स्वं नितम्बमपवाहितांशुकं
कामिनी रहसि पश्यति प्रिये ।
प्रार्थनामपि विनैव पल्लव-
स्निग्धरागमधरं स्वयं ददौ ॥ १७ ॥

सा मदेन मदनेन लज्जया
साध्वसेन च विमिश्रचेष्टिता ।
आययौ सपदि तादृशीं दशां
या न वक्तुमपि शक्यविभ्रमा ॥ १८ ॥

वर्जनाय सुरतस्य भामिनी
वाञ्छति स्म पटुचाटुचेष्टितम्
यत्तदेव समजायत स्वयं
योषितो निधुवनस्य वृद्धये ॥ १९ ॥

---

15. C. °विक्षितं for °पीडितं.

16. B. अदन्तविक्षतं, C. अदन्तपीडितं for अदन्तविक्षितं.

17. C. भामिनी for कामिनी.

18. C. झटिति for सपदि. A. B. या च वक्तुमपि न क्षमा तदा for या न वक्तुमपि शक्यविभ्रमा. [B. या हि for या च].

19. B. मैथिली for भामिनी.

अश्रुणा सुरतखेदमात्मनः
संमदं च पुलकेन कामिनी ।
व्याजहार न तु लज्जया गिरा
भावनृत्यकुशलेव भर्तरि ॥ २० ॥

यद्यदास तरसाभियोजितं
योषितो रतिषु खेदवृत्तये ।
तत्तदेव मृदु साधितं पुनः
कामिनाऽपनयति स्म तच्छ्रमम् ॥ २१ ॥

केशपाशमथ बन्धुमुद्यता
मैथिली निधुवनेन विश्लथम् ।
बाहुमूलगतलोचने प्रिये
लज्जयावनमति स्म सस्मितम् ॥ २२ ॥

इत्यनङ्गशिखिना हते हृदि
क्ष्माधिपस्य दुहितुर्निविष्टया ।
लज्जया कतिपयेषु तानवं
वासरेषु गलितेषु शिश्रिये ॥ २३ ॥

शर्वरीषु विरलीकृतत्रपा
निद्रया किल हृता नृपात्मजा ।
नीविबन्धनमतीत्य संस्थितं
हस्तमस्य न बलादपाहरत् ॥ २४ ॥

---

20. D. भामिनी for कामिनी. C. नतु for न तु. A. भावहृद्यकुशले च, C. भावनृत्यकुशले च, D. नव्यनृत्यकुशलेव for भावनृत्यकुशलेव. We with B.

22. D. केशहस्तं for केशपाशं. Agreeing with the Sinhalese edition., C. जानकी for मैथिली. D. सस्मयं for सस्मितं.

23. B. C. गमितेषु for गलितेषु.

24. D. reads the following for our text:-हस्तमस्य न बलादपाहरत् । नीविबन्धनमतीत्य संस्थितं । शर्वरीषु विरलीकृतत्रपा । निद्रया किल हृता नृपात्मजा. Agreeing with the Sinhalese edition. C. सर्वरीषु for शर्वरीषु. C. अपानयत् for अपाहरत्.

निद्रिता मतिभयं भयानक-
स्वप्नदर्शनकृतं प्रपद्य सा ।
राघवं कुचघटावुरःस्थले
सन्निधाय परिषस्वजे दृढम् ॥ २५ ॥

ज्ञातमन्मथरसा मदातुरे
कामिनि क्षिपति नीविबन्धनम् ।
सा जहार करयुग्ममंशुका-
दञ्जलिं किल भयेन कुर्वती ॥ २६ ॥

संमतापि भुवनस्य मेधया
राघवे निधुवनोपदेशिनि ।
व्याजहार गुणितस्य विस्मृतिं
भूरिशस्तदुपदेशवाञ्छया ॥ २७ ॥

स्वेदबिन्दुनिचिताग्रनासिका
धूतहस्तलतिका सशीत्कृतिः ।
सोढमन्मथरसा नृपात्मजा
राघवस्य न बभूव तृप्तये ॥ २८ ॥

चोदयत्यवनिपालनन्दने
शिक्षितुं युवतिकृत्यनैपुणम् ।
देहजन्मशरखण्डितत्रपा
सा ययौ रहसि कर्मकर्तृताम् ॥ २९ ॥

---

25. C. reads the following for our text:—स्वापगा निशि भयं भयानक-स्वप्नदर्शनकृतं प्रपद्य सा । सन्निधाय परिषस्वजे दृढं राघवं कुचघटावुरःस्थले ॥ Agreeing with the Sinhalese edition. D. उरस्तले for उरःस्थले.

26. D. मैथिली, Fr. कामिनी for कामिनि. C. क्रमत्ति (?) for क्षिपति.

27. C. प्रज्ञया for मेधया. D. निधुवनोपदेशके for निधुवनोपदेशिनि.

28. D. °विन्दु° for °बिन्दु°.

यज्जगाद मदनेन पीडिता
तत्सहासरसभूचिषि प्रिये ।
सस्मितं वलितदेहशोभिनी
तत्तदस्फुटमुवाच लज्जिता ॥ ३० ॥

रत्नवल्पनिकटस्थिते शुके
संगतौ हृदि निधाय भाषितम् ।
निःसहास्मि विसृजेति जल्पति
व्रीडिता परिजघान पञ्जरम् ॥ ३१ ॥

राघवक्त्रगलितैः श्रमाम्बुभि-
श्छिद्रितं कुचयुगस्य कुङ्कुमम् ।
सा निरीक्ष्य हसिते सखीजने
संमुखाद्व्यपजगाम सस्मितम् ॥ ३२ ॥

स्वानुवृत्तिविधिवन्ध्यमीर्ष्यया
चोदितोद्यत इवाथ लज्जितम् ।
मैथिलस्य दुहितुर्मनोभव-
श्चेतसो निरवशेषमाक्षिपत् ॥ ३३ ॥

दीर्घिकाजलतरङ्गनिर्धुत-
त्यक्तपुष्पमयमण्डनौ क्वचित् ।
चाटुरम्यमितरेतराश्रया-
स्तेनतुः प्रमदकानने मृजाः ॥ ३४ ॥

---

30. C. यद्भाण मदनेन क्लेषिता for यज्जगाद मदनेन पीडिता.

31. C. reads the verse thus :—रत्नतल्पनिकटस्थितं शुके निःसहोऽस्मि विसृजेति जल्पति । संगतौ हृदि निधाय भाषितं व्रीडिता परिजघान पिञ्जरम्. D. निःसहोऽस्मि for निःसहास्मि.

32. D. रामतुण्डनिसृतैः, Fr. भर्तृवक्त्रनिसृतैः for रामवक्त्रगलितैः.

33. D. reads the verse thus :—चोदितोद्यत इवात्त ईर्ष्यया मैथिलस्य दुहितुर्मनोभवः । स्वानुवृत्तिविधिवन्ध्यलज्जितं चेतसो निरवशेषमाक्षिपत् ॥ Agreeing with the Sinhalese edition.

चाटुमात्रकरणप्रयोजन-
स्तुल्यरागमपि स न्यपातयत् ।
योषितश्चरणपङ्कजद्वये
यावकं तरुणपल्लवप्रभे ॥ ३५ ॥

अङ्घ्रियुग्ममनुलिम्पतः स्वयं
कुङ्कुमेन तरुणार्करोचिषा ।
आरुरोह करयुग्ममस्य तत्
दूरमेव परिवृद्धवेपथु ॥ ३६ ॥

मेखलामधिनितम्बमर्पयं-
स्तत्र तत्र पुनरादधौ करम् ।
अत्र किंचिदनुपाश्रितः परं
दुर्नहो नु मणिमेखलागुणः ॥ ३७ ॥

आचरन्नथ विलेपनक्रियां
पाणिना पुलकितेन सस्पृहम् ।
सोऽस्पृशत्कुचयुगं पुनः पुन-
श्चन्दने समपि स्थिते सति ॥ ३८ ॥

पत्रमानिततर्जनीशिरः-
स्पृष्टकर्णलतिकोऽयमर्पयन् ।
पूर्वमर्धमुकुलीकृतेक्षणं
तन्मुखं सुरभिगर्भमन्वभूत् ॥ ३९ ॥

---

36. B. अंघियुगं, C. अंह्रियुगं for अंघ्रियुगं. C. has the following for the last two lines:—आरुरोह परिवृद्धवेपथु दूरमेव करयुग्ममस्य तत् ॥

37. D. अनुपाश्रितं, Fr. अनुशंसितं for अनुपाश्रितः. A. B. C. दुर्णहो for दुर्नहो.

38. D. मुहुर्मुहुः for पुनः पुनः. B. C. हृदि for सति.

39. D. ° स्पृष्टकर्णलतिकस्ततोऽर्पयन् for °स्पृष्टकर्णलतिकोऽयमर्पयन्.

आत्मनैव स तदा पुरा कृतं
यावकं युवतिदन्तवाससि ।
उज्जहार मुदितः पुनः पुन-
र्निष्पिबन्नधरपानलोलुपः ॥ ४० ॥

चुम्बति प्रियतमे विलोचनं
योषितः स्वयमुपाहिताञ्जनम् ।
आप रागमविकाशचक्षुषः
कर्णगं निजमशोकपल्लवम् ॥ ४१ ॥

पुष्परत्नविभवैर्यथेप्सितं
सा विभूषयति राजनन्दने ।
दर्पणं ननु चकांक्ष योषितां
स्वामिसंमदफलं हि मण्डनम् ॥ ४२ ॥

तामनङ्गकृतचारुविभ्रमां
निर्दयं समुपगुह्य चुम्बितुम् ।
वीक्षितुं च समकालमप्रभु-
र्व्याकुलो मुहुरिवास राघवः ॥ ४३ ॥

प्रार्थिताऽपि न चकार कानिचित्
कानिचित् स्वयमपि व्यधत्त सा ।
अन्वभूद्धृदयरत्नविक्रय-
क्रीतमेनमबला यथेप्सितम् ॥ ४४ ॥

---

40. C. reads the following for our text:-उज्जहार स तदा पुनः पुनर्निष्पिबन्नधरपानलोलुपः । आत्मनैव मुदितः स यावकं प्राकृतं युवतिदन्तवाससि ॥ Agreeing with the Sinhalese edition.

41. D. °चक्षुषा for °चक्षुषः.

42. D. यथोचितं for यथेप्सितं.

येन येन हरति स्म तामसौ
तत्तदेव पुनराप योषितः ।
सज्जनेषु विहितं हि यच्छुभं
सद्य एव फलवन्थि जायते ॥ ४५ ॥

कर्मणि स्वमुखपद्मविच्युत-
स्वेदबिन्दुहृतकान्तवक्षसि ।
तस्य चक्षुरुपकाञ्चि संचर-
द्वीक्ष्य वक्षसि मुमोच सा तनुम् ॥ ४६ ॥

भर्तरि प्रणयमौनमास्थिता
जल्पयत्यधरदंशनिग्रहैः ।
नो चकार वचनानि तादृशं
निग्रहं चिरमवाप्तुमिच्छया ॥ ४७ ॥

बालया हृदि निधाय स स्तनौ
दन्तमास्यकमलं प्रसादने ।
प्राप्तुमिच्छुरपि दोषतो विना
रोषमाविरकरोन्मुहुर्मुहुः ॥ ४८ ॥

अल्पदोषविषयेऽपि जम्पती
जग्मतुः प्रणयकोपवक्रताम् ।
स्नेहजातिरतिवृद्धिमागता
जायते सुलभरोषसत्रणा ॥ ४९ ॥

---

45. B. C. निहितं for विहितं.

46. C. °विन्दु° for °बिन्दु°. C. वपुः for तनुम्.

47. C. भाषयत्यधरदंशपीडनैः for जल्पयत्यधरदंशनिग्रहैः. C. पीडनं for निग्रहं.

48. D. कोपं, Fr. क्रोधं for रोषं.

49. D. स्वल्पदोष° for अल्पदोष°. C. दम्पती for जम्पती. C. D. प्रणयरोष° for प्रणयकोप°. B. सुलभरोषसम्भवा, C. D. सुलभकोपसत्रणा for सुलभरोषसत्रणा.

अश्रुषु प्रणयकोपवह्निना
लोहितत्वमुपनीय पायितः ।
तत्कटाक्षविशिखो निपातितो
धैर्यमस्य निचकर्त सुस्थिरम् ॥ ५० ॥

कोपिता चिरनिवृत्तसंगतिः
सुप्तमेत्य परिबोधशङ्किनी ।
हस्तरुद्धचलकुण्डला धृत-
श्वासवृत्ति शनकैश्चुचुम्ब सा ॥ ५१ ॥

कैतवेन कलहेषु सुप्तया
स क्षिपन्वसनमात्तसाध्वसः ।
चोर इत्युदितहासविभ्रमं
सप्रगल्भमवखण्डितोऽधरे ॥ ५२ ॥

संगतानि परिहृत्य चारिणौ
मानमेत्य कलहं वितेनतुः ।
अन्ययातनयनौ किलोरसा
तौ निहत्य कुहचित्परस्परम् ॥ ५३ ॥

एकदारिकदनः स कान्तया
सार्धमिद्धरुचि सौधमम्बरम् ।
आरुरोह परिसंहृतातपं
द्रष्टुमर्धशशिमौलिसन्निभः ॥ ५४ ॥

---

50. C. प्रणयरोप° for प्रणयकोप°. D. रोहितत्व° for लोहितत्व°. B. C. तत्कटाक्षविशिखोऽत्र पातितः for तत्कटाक्षविशिखो निपातितः. B. C. स्थैर्यं for धैर्यं.

51. B. C. हस्तरुद्धचलकुन्तला for हस्तरुद्धचलकुण्डला.

52. B. C. चौर इति. for चोर इति. B C. °संभ्रमं for °विभ्रमं.

53. C. reads the following for the first two lines:–मानमेत्य परिहृत्य चारिणौ संगतानि कलहं वितेनतुः॥ Agreeing with the Sinhalese edition.

54. B. C. °दमनः for °कदनः. D. भार्यया for कान्तया.

वासरस्य विगमे समीरणै-
मन्दनर्तितसुगन्धिकुन्तलाम् ।
सौधपृष्ठमधितस्थुषीं वचो
जानकीमिदमुवाच राघवः ॥ ५५ ॥

सन्निगृह्य करसन्ततिं क्वचि-
त्प्रस्थितोऽपि रविरेष रागवान् ।
अस्तमस्तकमधिश्रितः क्षणं
पश्यतीव भुवनं समुत्सुकः ॥ ५६ ॥

दिङ्मुखादपसरन्तमातपं
नष्टतेजसमनुव्रजन्मुहुः ।
रश्मिभिः समववध्य भानुना
कृष्यमाणमिव लक्ष्यते तमः ॥ ५७ ॥

अन्तराणि तमसः प्रयच्छति
स्रष्टरीव जगती युगक्षये ।
भूय एव रविमण्डले रुचि-
र्लीयते जलधिमध्यवर्तिनी ॥ ५८ ॥

ध्वान्तजालमुपयाति सर्वतः
सागरे निहितमण्डलं रविम् ।
वारिभिः पिहितदण्डमायतं
भृङ्गचक्रमिव फुल्लमम्बुजम् ॥ ५९ ॥

---

55. D. प्रभञ्जनैः for समीरणैः. D. कुन्तलम् for कुन्तलाम्. C. हर्म्यपृष्ठं for सौधपृष्ठं. C. D. सुन्दरीं for जानकीं.

56. B. सलीलया, C. सलालसं for समुत्सुकः.

57. D. भानुना समवबध्य रश्मिभिः for रश्मिभिः समवबध्य भानुना.

59. C. वारिधौ for सागरे. C. अम्बुभिः for वारिभिः.

एकचक्रमिव राजते नभः-
स्यन्दनस्य रविबिम्बमस्तगम् ।
उत्पतत्यविकले निशाकरे
धातुपङ्कपरिदिग्धमण्डलम् ॥ ६० ॥

संहृतात्मकिरणं यथा यथा
वृद्धिमुद्वहति मण्डलं क्रमात् ।
सागराम्भसि तथा तथा रवि-
र्गौरवादिव शनैर्निमज्जति ॥ ६१ ॥

उन्मुखा दिनकरस्य रश्मयः
सागरान्तरितमण्डलश्रियः ।
भान्ति तोयमभिभूय निर्गता
वाडवस्य शिखिनः शिखा इव ॥ ६२ ॥

सन्ध्यया च परिरुद्धमग्रतो
वासरस्य विगमे घनं तमः ।
भाति सिन्धुजलभिन्नमेकतः
प्रावृषीव सलिलं पयोनिधेः ॥ ६३ ॥

सन्ध्ययाऽरुणितपत्रसंचयं
श्लक्ष्णपल्लवनिरन्तरं वनम् ।
विन्दतीव परिणामसम्पदं
पश्य तत्तमासि सर्पति क्रमात् ॥ ६४ ॥

---

60. C. reads this verse in the following way:—उत्पतत्यविकले निशाकरे धातुपङ्कपरिदिग्धमण्डलं । एकचक्रमिव राजते नभःस्यन्दनस्य रविबिम्ब-मस्तगम् ॥

62. C. नीरं for तोयं.

63. C. गांगजलभिन्नं for सिन्धुजलभिन्नं.

64. D. पल्लवैरिव निरन्तरं वनम् for श्लक्ष्णपल्लवनिरन्तरं वनम्.

अन्धकारनिकरेण सर्वतः
कृष्णसर्पमलिनेन सर्पता ।
रुध्यमानविषयाः समन्ततः
संकुचन्ति परिखा नु दिग्भुवः ॥ ६५ ॥

भाति मत्तशिखिकण्ठकर्बुरं
ध्वान्तजालपरिरुद्धमम्बरम् ।
अर्कदीपकृततापसंभृत-
प्रौढकज्जलमलीमसं यथा ॥ ६६ ॥

पश्य दीप्तरुचि पूर्वमुद्गतं
ज्योतिरेतदसितोरगात्विषः ।
छिद्रमेकमिव विष्णुवर्त्मनो
दूरमग्नरविरश्मिभास्वरम् ॥ ६७ ॥

पश्चिमे नभसि भान्ति लोहिता-
स्तारका रविरथस्य वेगिनः ।
लोहचक्रहतमेरुमस्तका-
दुद्गता इव हुताशविप्रुषः ॥ ६८ ॥

मीलिता रविभयेन तारका
रश्मिधामहतलोहिता इव ।
उन्मिषन्ति दिनकृत्करात्यये
दिङ्मुखैकरचनाः समन्ततः ॥ ६९ ॥

---

65. D. कालसर्पमलिनेन for कृष्णसर्पमलिनेन. D. व्याप्यमानविषयाः for रुध्यमानविषयाः. C. D. संकुचन्ति परितो दिशा इव for संकुचन्ति परिखा नु दिग्भुवः. Agreeing with the Sinhalese edition

66. C. परिणद्धं for परिरुद्धं.

68. C. रोहिताः for लोहिताः. A. B. हुताशविप्रषः for हुताशविप्रुषः.

69. C. उस्रधामहतरोहिताः for रश्मिधामहतलोहिताः.

पूर्ववारिनिधिपृष्ठतः क्रमा-
दर्शयन् हिमरुचिः कलान्तरम्
एकपक्षसुलभक्रमामसौ
वृद्धिमद्य मुहुरेव विन्दति ॥ ७० ॥

पश्य भृङ्गपटलासितप्रभं
पूर्वतः सपदि निर्गतं तमः ।
यत्करेण जघने हिमांशुना
तुद्यमानमिव याति पश्चिमम् ॥ ७१ ॥

क्षीरवारिनिधिना विवर्धिना
प्लाव्यमानवदसौ निशाकरः ।
उत्पतत्युदयतः शनैः शनै-
र्हारशुभ्रनिजरश्मिसंचयः ॥ ७२ ॥

क्षिप्यमाणघनतामसोत्करं
दूरमुत्सरति मण्डलं दिशाम् ।
शीतरश्मिकिरणस्य सर्वतो
दातुमन्तरमिव प्रसर्पतः ॥ ७३ ॥

क्षीयमाणवपुरिन्दुरुद्गमे
वर्धमानकिरणः समन्ततः ।
अर्कतप्तगगनानुबन्धिना
तेजसेव परितो विलीयते ॥ ७४ ॥

---

70. D. पूर्वतोयनिधिपृष्ठगः for पूर्ववारिनिधिपृष्ठतः.
71. B. C. ताड्यमानं for तुद्यमानं.
72. C. क्षीरतोयनिधिना for क्षीरवारिनिधिना. D. विवर्धता for विवर्धिना. C. क्षपाकरः for निशाकरः.
73. D. मण्डले for मण्डलं. B. शीतरश्मिप्रसरस्य, C. शीतरश्मिप्रसराय, D. शीतरश्मिकिरणाय for शीतरश्मिकिरणस्य. C. D. प्रसर्पते for प्रसर्पतः.
74. A. B. C. °गगण° for °गगन°.

बद्धरागमुदितो निशाकरः
संत्यजन्दिशमसौ बलिद्विषः ।
शोकदीन इव पाण्डुरोचिषा
कार्श्यमेति वपुषा मुहुर्मुहुः ॥ ७५ ॥

पीतमेतदलिवृन्दमेचकं
ध्वान्तमेव सकलं हिमत्विषः ।
स्वच्छविग्रहतया शशाकृति-
च्छद्मना बहिरिवास्य लक्ष्यते ॥ ७६ ॥

विप्रयुक्तवनितामुखाम्बुज-
प्रोद्धृतद्युतिचयेन चन्द्रमाः ।
नूनमेष पुनरात्ममण्डलं
पूरयत्यसितपक्षकर्शितम् ॥ ७७ ॥

अन्धकारनिकरं करैरिमं
भिन्दतः शशधरस्य मण्डले ।
धूलिपुञ्ज इव भाति तामसः
क्षोभवेगपतितः शशाकृतिः ॥ ७८ ॥

गुल्मलीनमलिकर्बुरं तमः
कर्ष्टुकाम इव शार्वरीकरः ।
सर्वतो विटपजालरन्ध्रकैः
प्रेरयत्युदयशेखरः करान् ॥ ७९ ॥

---

76. D. reads पश्य पीतमलिवृन्दमेचकं ध्वान्तमस्य सकलं हिमत्विषः । स्वच्छविग्रहतया शशाकृतिच्छद्मना बहिरिवाभिलक्ष्यते ॥ for our text. Agreeing with the Sinhalese edition. B. C. °कर्बुरं for °मेचकं.

77. C. विप्रयुक्तललनामुखोत्पल° for विप्रयुक्तवनितामुखाम्बुज.° C. मुहुरात्म-मण्डल for पुनरात्ममण्डलं.

78. D. °निचयं for °निकरं. C. भञ्जतो मृगधरस्य for भिन्दतः शशधरस्य. D. मृगाकृतिः for शशाकृतिः.

79. C. अलिमेचकं for अलिकर्बुरं. D. कष्टुकाम for कर्ष्टुकाम. C. यामिनी-करः, D. शर्वरीकरः for शार्वरीकरः. C. D. °रन्ध्रके for °रन्ध्रकैः.

चन्द्ररश्मिनिहतोऽपि तामसः
सुप्तकोकिलकुलेन संचयः ।
उल्लसत्कुमुदगन्धसंभृतैः
सावशेष इव भाति षट्पदैः ॥ ८० ॥

पत्रजालशतरन्ध्रविच्युतः
सामिसिक्त इव भूरुहस्तले ।
स्थण्डिले निरवशेषमिन्दुना
भाति मुक्त इव रश्मिसंचयः ॥ ८१ ॥

उल्लसत्सु कुमुदेषु षट्पदाः
संपतन्ति परितो हिमांशुना ।
भिद्यमानतमसो नभस्तला-
द्विच्युता इव तमिस्रबिन्दवः ॥ ८२ ॥

तारका रजतभङ्गभासुरा
लाजका इव विभान्ति तानिताः ।
दिग्वधूभिरुदयादुदेष्यतो
वर्त्मनि ग्रहपतेः समन्ततः ॥ ८३ ॥

मित्रनाशपरिरोदिताश्चिरं
मूर्छिता इव विभान्ति दीर्घिकाः ।
सुप्तपद्मविनिमीलितेक्षणा
वृद्धशान्तकलहंसकूजिताः ॥ ८४ ॥

---

80. C. चन्द्रपादविहतोऽपि for चन्द्ररश्मिनिहतोऽपि.

81. D. reads:—सामिसिक्त इव भूरुहस्तले स्थण्डिले निरवशेषमिन्दुना । भाति मुक्त इव रश्मिसञ्चयः पत्रजालशतरन्ध्रविच्युतः for our text.

82. D. छिद्यमानतमसः for भिद्यमानतमसः. D. विन्दवः for बिन्दवः.

सैकते शशिमरीचिलेपने
रोधसीन्दुकरपुञ्जसन्निभम् ।
राजहंसमसमीक्ष्य कातरा
रौति हंसवनिता सगद्गदम् ॥ ८५ ॥

तिग्मरश्मिविरहे सरोजिनी
लोकमिन्दुकिरणावगुण्ठितम् ।
नाभिवीक्षितुमिव क्षपागमे
मीलयत्यसितवारिजेक्षणम् ॥ ८६ ॥

जृम्भमाणचलपत्रसंहते-
रन्तरं कुमुदखण्डसंपदः ।
संविधातुमिव पद्मसंततिः
संकुचत्यनतिदूरवर्तिनी ॥ ८७ ॥

भाति बिभ्रदसितोत्पलप्रभं
लक्षणं मृगमयं हिमद्युतिः ।
श्यामलावदनाबिम्बकान्तिभि-
र्बद्धमध्य इव रूप्यदर्पणः ॥ ८८ ॥

यौवनोपहितपाण्डुकान्तिना
त्वन्मुखेन विजितो निशाकरः ।
लज्जयेव घनमेघसन्ततौ
रुद्धरश्मिनिवहो निलीयते ॥ ८९ ॥

---

85. C. reads शारदिन्दुकरपुञ्जसन्निभं राजहंसमसमीक्ष्य कातरा । रौति हंसवनिता सगद्गदं सैकते शशिमरीचिलेपने for our text. Agreeing with the Sinhalese edition.

87. A. B. °पर्णसंहतेः, C. °पर्णसंततेः, D. पत्रसन्ततेः for पत्रसंहतेः. C. D. °षण्ड° for °खण्ड.° D. पद्मसंहतिः for पद्मसन्ततिः.

88. C. °विस्वदीप्तिभिः for °बिम्बकान्तिभिः. B. C. नद्धमध्यः, D. विद्धमध्यः for बद्धमध्यः.

89. A. B. यौवनोपहितलोध्रपाण्डुना, C. यौवनोपहतपाण्डुदीप्तिना for यौवनोपहितपाण्डुकान्तिना. C. विजितः क्षपाकरः for विजितो निशाकरः.

अङ्कितः शशमयेन लक्ष्मणा
कृष्णमेघशकलं निशाकरः ।
मध्यलग्नमिव मन्दमुद्वहन्
निष्पतत्यसितवारिदोदरात् ॥ ९० ॥

उद्धृतद्युतिरिवैष मध्यतो
भाति कृष्णमृगलक्षणः शशी ।
कुन्दगौरदशनावलीमिमां
वेधसा रचयितुं तव प्रिये ॥ ९१ ॥

त्वन्मुखावजितमण्डलश्रिय-
स्तत्कलङ्कममृतद्युतेरयम् ।
वीक्ष्य शीतकरकान्ततोरणः
शोकबाष्पमिव वारि मुञ्चति ॥ ९२ ॥

इति सपदि वदन् वदान्यवर्यः
शयनशिलातलमिन्दुपादधौतम् ।
अलसतरगतिर्नरेन्द्रकन्या-
मनुगमयन्मदमन्थरः प्रपेदे ॥ ९३ ॥

अथ सुरतमखे सुखं समाप्ते
मदनहुताशनदग्धमानहव्ये ।
चषकमधुनि सन्निविष्टविम्बं
मुखमनयद्दयितासखः स सोमम् ॥ ९४ ॥

---

90. A hiatus in the first line in A. B. [* * लक्ष्मणा]; C. कालमेघशकलं क्षपाकरः for कृष्णमेघशकलं निशाकरः.

91. B. भाति कृष्णमृगलांछनो विधुः, C. भाति कृष्णशशलक्षणो विधुः for भाति कृष्णमृगलक्षणः शशी. C. कुन्दशुभ्ररदनावलीमिमां, D. कुन्दधौतरदनावलीमिमां for कुन्दगौरदशनावलीमिमां. C. ब्रह्मणा for वेधसा.

92. A. B. त्वन्मुखापहृतमण्डलश्रियः for त्वन्मुखावजितमण्डलश्रियः D. °तोरणं for °तोरणः.

दुहितुरवनिभर्तुरुन्मयूखं
मणिचषकं परिमण्डलं विहाय ।
प्रियमुखपरिभुक्तधामवान्छा
करकमलं नयति स्म हेमशुक्तिम् ॥ ९५ ॥

नियतमिह पतन्ति दन्तधारा
मदनमदोद्धतयोरितीव भीत्या।
अधरकिसलये विहाय यूनो-
र्मधु पिवतोर्नयनान्युपास्त रागः ॥ ९६ ॥

मुहुरपि मधुपो विवृद्धतृष्णो
न विरमति स्म पिबन् सुगन्धि हृद्यम् ।
युवतिमुखमसंशयं यतो यत्
सरसिरुहं परमार्थतस्तदेतत् ॥ ९७ ॥

अचकमत मधु प्रियामुखेन
क्षितिपसुतः प्रणयादसौ वितीर्णम् ।
अधरमितवतो व्रणस्य दाहात्
स्फुटरचितभ्रुकुटिर्मधुस्रवेण ॥ ९८ ॥

इति सपदि निशामतीयतुस्तौ
प्रविधुतकौसुमभक्तिसूत्रशेषम् ।
रतिकलहकचग्रहेण माल्यं
विलुलितकेशसमर्पितं दधानौ ॥ ९९ ॥

---

95. C. has the following:—प्रियमुखपरिभुक्तधामवान्छा करकमलं नयति स्म हेमशुक्तिं । दुहितुरवनिभर्तुरुन्मयूखं मणिचषकं परिमण्डलं विहाय.

96. D. मदमदनोद्धतयोः for मदनमदोद्धतयोः. C. D. °किशलये for °किसलये. C. उवास रागः D. अवाप रागः for उपास्त रागः.

99. A. B. read this verse in the following way:—रतिकलहकचग्रहेण माल्यं विलुलितकेशसमर्पितं दधानौ । इति सपदि निशामतीयतुस्तौ प्रविधुतकौसुमभक्तिसूत्रशेषम् ॥ Agreeing with the Sinhalese edition.

अथ हृदयङ्गमध्वनितवंशकृतानुगमै-
रनुगतवल्लकीमृदुतरक्वणितैर्ललनाः ।
तमुषसि भिन्नषड्जविषयीकृतमन्द्ररवैः
शयितमबोधयन् विविधमङ्गलगीतिपदैः ॥ १०० ॥

हृदयनिपीडनोद्धृतपयोधरकुङ्कुमया
रतिषु दधानया दशनखण्डितमोष्ठमणिम् ।
चिरकृतजागरारुणितमन्थरलोचनया
शयनममुच्यत प्रियमनु प्रमदोत्तमया ॥ १०१ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ सम्भोगवर्णनो नामाष्टमः सर्गः ॥

नवमः सर्गः ।

इति प्रवृत्तस्य सुतस्य केषुचि-
दिनेषु यातेषु सुखेन भूपतिः ।
पुरं प्रतस्थे वनितापरिग्रहै-
स्त्रयं सुतानामितरत्समस्य सः ॥ १ ॥

उपेत्य पत्या सह शोकसंपदा
कलत्रभारेण च मन्थरक्रमा ।
पितुः प्रयाणाभिमुखी भुवः सुता
ततान पादाबुदबिन्दुभिर्दृशोः ॥ २ ॥

असावपत्यं गुणपक्षवर्तिनीं
मतिं समालम्ब्य गुणैः पुरस्कृतम् ।
जगौ ततः साधु गुरुर्गरीयसीं
गिरं सतीनामुचितव्रताश्रयाम् ॥ ३ ॥

परः प्रकर्षो वपुषः समुन्नति-
र्गुणस्य तातो नपतिर्नवं वयः ।
इति स्म मा मानिनि मानमागमः
पतिप्रसादोन्नतयो हि योषितः ॥ ४ ॥

---

1. C. केषुचिद्गतेषु वारेषु, D. केषुचिद्गतेषु मासेषु for केषुचिद्दिनेषु यातेषु.

2. C. reads the following for our text :—कलत्रभारेण च शोकसंपदा पदद्वयं मन्थरविक्रमा पितुः । ततान पत्याद्रिरुपेत्य बिन्दुभिर्दृशोः प्रयाणाभिमुखी भुवः सुता ॥ The marginal note on D. says :—सिंहललिपिसन्ने तु उदर्भिबिन्दुभिरित्येव पाठः उपलभ्यते. C. agrees with the Sinhalese edition.

3. D. reads the following for our text :—गुरुस्ततोऽसौ गुणपक्षवर्तिनीं मतिं समालम्ब्य गुणैः पुरस्कृताम् । अपत्यकां साधु जगौ गरीयसीं गिरं सतीनामुचितव्रताश्रयाम् ॥ B. गुणपक्षवर्धिनीं, C. गुणपक्षवन्तिनीं for गुणपक्षवर्तिनीं.

4. B. पतिप्रसादोन्नतयः कुलस्त्रियः for पतिप्रसादोन्नतयो हि योषितः.

स्त्रियो न पुंसामुदयस्य साधनं
त एव तद्धामविभूतिहेतवः
तडिद्वियुक्तोऽपि घनः प्रजृम्भते
विना न मेघं विलसन्ति विद्युतः ॥ ५ ॥

गतापि भर्त्रे परिकोपमायतं
गिरः कृथा मा परुषार्थदीपनीः ।
कुलस्त्रियो भर्तृजनस्य भर्त्सने
परं हि मौनं प्रवदन्ति साधनम् ॥ ६ ॥

पतिव्रता वश्यमवश्यमङ्गना
करोति शीलेन गुणस्पृहं पतिम् ।
विनष्टचारित्रगुणा गुणैषिणः
पराभवं भर्तुरुपैति दुस्तरम् ॥ ७ ॥

अलं त्वयि व्याहृतिविस्तरेण मे
कुरुष्व तद्यच्चरितं त्वदाश्रयम् ।
श्रुतिं प्रयातं जरसैव जर्जरं
सहस्रधेदं हृदयं न दारयेत् ॥ ८ ॥

---

5. C. कारणं for साधनं. A. B. त एव सौभाग्यविभूतिसाधनाः for त एव तद्धामविभूतिहेतवः. B. C. घनो विजृम्भते for घनः प्रजृम्भते.

6. D. गिरोऽकृथा मा for गिरः कृथा मा. B. C. परुषार्थदीपिनीः for परुषार्थदीपनीः. A., B. पतिव्रताः for कुलस्त्रियः. D. reads the last two lines thus :— वदन्ति मौनं हि परं प्रसाधनं कुलस्त्रियो भर्तृजनस्य भर्त्सने ॥ D. agrees with the Sinhalese edition.

7. A. B. om. the first line. B. C. शीलैश्च for शीलेन. C. °चारित्र्यगुणा for °चारित्रगुणा.

8. A. C. कृतं, B. अरं for अलं.

अयं त्वदेकप्रवणो मनोरथो
वृथाऽद्य दैवादपिनाम नो भवेत् ।
इति प्रवक्तुर्जरतो निरासिरे
निगृह्य कण्ठं वचनानि मन्युना ॥ ९ ॥

उदग्रभासः शिखया शिखामणेः
स्रजा च धम्मिल्लकिरीटदष्ट्या ।
प्रमृज्य पादौ जनकस्य जम्पती
क्षयादयातामथ लम्भिताशिषौ ॥ १० ॥

कृतो वियोगेन शुचः समुद्भवः
समर्पितः साधुवरेण संमदः ।
मनस्यवस्थाननिमित्तमीशितुः
क्षणं विवादानिव तस्य चक्रतुः ॥ ११ ॥

हलायुधाभस्य सकाहलो रवः
पयोधिनिर्घोषगभीरभैरवः ।
ततः प्रगल्भाहतभेरिसंभवः
प्रकाशयामास गतिं समन्ततः ॥ १२ ॥

गजेन्द्रघण्टाघटितश्च निःस्वनः
करेणुकाबृंहितबृंहितो मुहुः ।
भयं वितन्वन् भवनेषु पक्षिणां
दिशः ससर्पाथ समं समुद्धतः ॥ १३ ॥

---

9. B. मुधैव, C. मुधाद्य for वृथाद्य. B. C. कण्ठे for कण्ठं.

10. D. °किरीटसक्तया for °किरीटदष्टया. D. दम्पती for जम्पती. B. C. गृहाद् for क्षयाद्.

13. C. °प्रभवश्च for °घटितश्च. C. समन्ततः, D. समुद्धृतः for समुद्धतः. D. agrees with the Sinhalese edition.

समारुरोहाथ रथं महारथः
सहेमचित्रं सह राजकन्यया ।
दिनादिसन्ध्यानुगतां पिशङ्गितां
स्वरश्मिदीप्त्येव दिवं दिवाकरः ॥ १४ ॥

शिरःप्रदेशस्थसमुद्गपेटिका-
गृहीतवीणांशुकपञ्जरादयः ।
सवेत्रहस्तैः स्थविरैराधिष्ठिताः
स्त्रियोऽप्यनुस्यन्दनमत्यगुर्मुदा ॥ १५ ॥

मदान्धमातङ्गघटाद्रिसंकटे
परिक्वणन्ती वलक्वायनिम्नगा ।
तरङ्गिता वल्गुतुरङ्गरङ्गितैः
पुरः प्रतस्थे पुरुहूततेजसः ॥ १६ ॥

स्वदृष्टिरोधि श्रवणाग्रमारुतै-
रजो रथोत्थं यदि नाहरिष्यत ।
विनिर्गताभिर्न पुरो मदस्रुतां
घटाभिरद्रक्ष्यत वर्त्म दन्तिनाम् ॥ १७ ॥

व्यतीतरथ्येऽथ रथे कपोलयो-
र्विलासवत्या लसदंशुजालयोः ।
पपात तस्याः पुरगृह्यदीर्घिका-
समीरणानर्तितपद्मजं रजः ॥ १८ ॥

---

14. D. स्वरश्मिकान्त्येव for स्वरश्मिदीप्त्येव.

15. B. C. गृहीतवीणाशुकपञ्जरादयः for गृहीतवीणांशुकपञ्जरादयः. A. अत्यगुस्तदा, B. अत्ययुर्मुदा, C. अत्यगुर्मुदा, D. अन्वयुस्तदा. We with C. The Sinhalese edition reads अपि स्त्रियः स्यन्दनमन्वतीयुः.

17. C. पुरोगताभिर्न तदा मदस्रुतां for विनिर्गताभिर्न पुरो मदस्रुतां. C. हस्तिनां for दन्तिनां.

18. A. C. सद्यः for तस्याः.

वराङ्गना प्रस्तरभेदकोटिभि-
र्हतस्य चक्रे चलनं वरूथिनः ।
पिधाय यत्तच्चलनं पथि प्रियं
तमाललम्बे बलसन्निधावपि ॥ १९ ॥

रथध्वनिप्रापितसंमदं गवां
कुलं समुत्पुच्छयमानमुन्मुखम् ।
उदग्रकर्णं परिधावदेकतो
ददर्श सीताऽथ वनान्तवर्तिनी ॥ २० ॥

विनिद्रपद्मा मृदुभिः समीरणै-
र्विसारयन्त्यः कलहंसिकागिरः ।
स्वदेशसीमासरितो विलङ्घिताः
शुचं वधूचेतसि साधु संदधुः ॥ २१ ॥

विवृत्तदृष्टा विषयव्यतिक्रमा-
च्छनैर्निमज्जन्त इवावनीतले ।
स्वजन्मभूमौ गिरयो नृपात्मजा-
कपोलमातेनुरजस्रमश्रुभिः ॥ २२ ॥

द्विपेन्द्रदन्ताहतवन्यसल्लकी-
कषायगन्धिः पथि तत्र योषिताम् ।
शनैर्विधुन्वन्नलकाग्रवल्लरी-
र्मुखानि पस्पर्श वनान्तमारुतः ॥ २३ ॥

---

20. D. वनान्तचारिणी for वनान्तवर्तिनी.

21. A. C. मृदुभिश्च मारुतैः for मृदुभिः समीरणैः. A. C. विसारयन्तः for विसारयन्त्यः. D. बधूचेतसि for वधूचेतसि.

22. D. स्वजन्मभूमेः for स्वजन्मभूमौ.

23. D. गजेन्द्र° for द्विपेन्द्र°. D. °शल्लकी° for °सल्लकी°.

अथ प्रतानः प्रततान तामसो
 नृपस्य भीमं भयमादिशन्दिशः ।
क्षिपन् क्षपाया विगमेऽपि संहतिं
 प्रसह्य वैरोचनरोचिषां पथि ॥ २४ ॥

अरिष्टसंतापविरूपदर्शना-
 स्तमोऽभिभूताः प्रतिकूलमारुताः
अविप्रसन्नानि मुखानि भेजिरे
 दिशो विनाशोपनता इव क्षणम् ॥ २५ ॥

अथ प्रकाशीभवदग्रतो दिशं
 क्षणादुदीचीमवभास्य दीप्तिभिः ।
बलेन तेजः पुरुषाकृतिश्रिया
 विभक्तमुत्पातमनु व्यदृश्यत ॥ २६ ॥

ततो दधानः श्रवणावसङ्गिनीं
 विशुष्कपङ्केरुहबीजमालिकाम् ।
विनिद्ररक्तोत्पलशङ्कया ततां
 विलोचनोपान्त इवालिसन्ततिम् ॥ २७ ॥

विशालवामांसतटावलङ्घिनीं
 समुद्वहन् द्वीपितनुं तनूदरः ।
परिज्वलंस्तीव्रतपोहुताशन-
 स्फुलिङ्गपातैरिव बिन्दुचित्रिताम् ॥ २८ ॥

---

26. The Sinhalese edition reads the following for the last two lines of our text :—अदृश्यतोत्पातमनु व्यपाश्रितं बलेन तेजः पुरुषाकृतिश्रिया.

27. C. D. read the following for our text :—विनिद्ररक्तोत्पलशंकया ततं [तां] विलोचनोपान्त इवालिसन्ततिम् । ततो दधानः श्रवणावसङ्गिनीं विशुष्कपङ्केरुहबीजमालिकाम् ॥ Agreeing with the Sinhalese edition.

28. B. C. °तटावलम्बिनीं for °तटावलङ्घिनीं. B. C. व्याघ्रतनुं for द्वीपितनुं. B. C. परिज्वलत्तीव्र° for परिज्वलंस्तीव्र°. Agreeing with the Sinhalese edition. B. C. पट्टचित्रिताम् for बिन्दुचित्रिताम्.

भुजेऽतिभीमे सशरं शरासनं
निधाय वामे निधनावहं द्विषाम् ।
करेऽपरस्मिन् परदुर्गपारगं
परं स बिभ्रत्परशुं परासुहा ॥ २९ ॥

तपोऽभिधानस्य सितेत्वराध्वनः
शिखा इवादित्यमयूखपिङ्गलाः ।
जटा विधुन्वन् वलिताः समन्ततः
समीरणैरात्मरयेण संभृतैः ॥ ३० ॥

प्रभुर्भृगूणां जगदे जगत्स्रजः
परोऽवतारो ज्वलनं वितन्वता ।
हसेन धुन्वन्नथ तद्बलं वली
प्ररुध्य रामेण रुषावृता गिरः ॥ ३१ ॥

न राम रामं युधि जेतुमुद्यमो
विधीयतामन्यमिव क्षितिक्षितम् ।
सरित्तटीपाटनपाटवस्पृशं
न गोपतिं प्राप्य विशीर्यते नगः ॥ ३२ ॥

रघोरपत्ये जगतीपतिद्विषो
वृथा तव स्यादिह विक्रमक्रमः ।
अलं विसारिग्रसनस्थपाटवो
न दन्दशूकप्रभवे विहङ्गमः ॥ ३३ ॥

तव प्रयोगे धनुषोऽनुशासितुः
शरासने भूधरधन्वनः परम् ।

---

30. A. B. read the following for our text :—समीरणैरात्मरयेण संभृतैः जटा विधुन्वन् वलिताः समन्ततः । तपोभिधानस्य सितेतराध्वनः शिखा इवादित्यमयूखपिङ्गलाः.

इतः प्रवृत्तापि न नूनमागता
विपत् त्वदीयश्रवणस्य गोचरम् ॥ ३४ ॥

निशम्य तस्यैतदितीरितं वचो
जगाद शिष्यः स पुनः पिनाकिनः ।
परस्य वृद्धिं यशसो वितन्वतीं
वृथा विधित्सन् धनुषो भिदामिदम् ॥ ३५ ॥

नवेश्वर स्तब्धतरं धनुर्द्वयं
विधाय वन्ध्येतरबाणपातनम् ।
विशामधीशे किल विश्वकर्मणा
पुरन्दराख्याय पुरा व्यतीर्यत ॥ ३६ ॥

विसृज्य पूर्वं दनुजारये धनु-
स्तयोरथादायि रथाङ्गधारिणे ।
धनुस्तथैकं त्रिपुरं दिधक्षते
त्रिलोचनाय त्रिदशाधिपेन तत् ॥ ३७ ॥

विवित्सया तद्गतजन्यतेजसो
व्यधत्त यत्नेन तथा मरुत्पतिः ।
यथाऽहवो हव्यवहोग्रतेजसो-
रजय्यशक्त्योरजयोरजायत ॥ ३८ ॥

---

34. A. B. C. ध्रुवम् for परम्.

35. A. B. तस्येदमुदीरितं for तस्यैतदितीरितं. A. B. जगाद शिष्यो बलवत्पिनाकिनः for जगाद शिष्यः स पुनः पिनाकिनः. A. B. भिदामिमाम् for भिदामिदम्. C. omits the second line.

37. C. reads the last two lines thus :—धनुस्तथैकं त्रिदशाधिपेन तत् त्रिलोचनाय त्रिपुरं दिधक्षते ॥ Agreeing with the Sinhalese edition.

38. C. D. read the following for our text :—मरुत्पतिस्तद्गतजन्यतेजसो विवित्सया हव्यवहोग्रतेजसोः । अजय्यशक्त्योरजयोरजायत व्यधत्त यत्नेन यथाऽहवस्तथा ॥ Agreeing with the Sinhalese edition.

चकार चक्रादि विहाय देवयो-
र्युगं महेष्वासयुगेन संयुगम् ।
दिशो दशापि प्रतिरुध्य पत्रिभिः
समाः सहस्राणि समेतसाहसम् ॥ ३९ ॥

अथो विकृष्टं मृदुभूतमीश्वरः
ससर्ज यच्चापमभेदि तत्त्वया ।
अगादृचीकाय वितीर्णमक्षतं
क्रमेण हस्तं मम वैष्णवं धनुः ॥ ४० ॥

गुणाद्वुभावस्य तयोर्जगच्छ्रुतिं
जहाति नैको दृढतेति विश्रुतः ।
असंशयं ज्येति निरूढिमागतः
परो ममैव श्रवणान्तगोचरः ॥ ४१ ॥

अपाङ्गभागावधि चापपूरणं
सुदुष्करं तिष्ठतु विष्णगोचरम् ।
गुणं यदि प्रापयसीह जिह्मतां
बलोपपन्नेषु ततस्त्वमग्रणीः ॥ ४२ ॥

निधाय बाणं धनुषीह पूरिते
वधः स्वहस्तेन तवैष सत्क्रिया ।
इतीरयीत्वा तनयस्य भूपते-
र्मुमोच हस्ते सशरं शरासनम् ॥ ४३ ॥

---

40. D. ऋपीकाय for ऋचीकाय. We with A. B. C.

41. D. जगच्छ्रुतं (?) for जगच्छ्रुतिं.

42. D. वक्रतां for जिह्मतां.

43. D. इदीरयित्वा for इतीरयित्वा.

ततः स शून्यामिव मुष्टिमानय-
न्नपाङ्गदेशं दशकण्ठसूदनः ।
बलादविज्ञातविकर्षणश्रम-
श्चकर्ष गुञ्जद्गुणबन्धनं धनुः ॥ ४४ ॥

स तेन मुक्तः किल सायको दिवः
पदं तपस्यद्वृषभस्य वाञ्छतः ।
द्वितीयवर्णस्य निहन्तुरात्मनो
विधाय नीशारमथ व्यतिष्ठत ॥ ४५ ॥

रिपोरजय्यस्य जयेन मानवैः
सभाज्यमानो बहुमानमन्त्रणैः ।
मनोज्ञवासे पथि मैथिलीसखः
सुखेन नीत्वा कतिचिद्दिनानि सः ॥ ४६ ॥

व्यपावृतद्वारमुखेन सन्ततं
बलेन भूम्ना विशता कृतध्वनिम् ।
पुरीमुदन्वन्तमुदग्रनिस्वनं
तनुं पिबन्तीमिव कुम्भजन्मनः ॥ ४७ ॥

नरेन्द्ररथ्योभयभागचारित-
प्रसारिकालागुरुधूपवासिताम् ।
ततामनन्तैरुपरत्नतोरणं
सपङ्कजाष्टापदकुम्भमण्डलैः ॥ ४८ ॥

---

44. C. दशकण्ठमर्दनः for दशकण्ठसूदनः.

45. D. अथो for अथ.

46. B. C. बहुमानसत्क्रियैः for बहुमानमन्त्रणैः. The reading of B. C. appears preferable to the varients of other Mss. and printed editions.

47. D. कृतस्वरम् for कृतध्वनिम्.

48. C. D. नृपेन्द्र° for नरेन्द्र°. C. °कृष्णागरु°, D. °कालागरु° for °कालागुरु°.

परिक्वणत्काञ्चनकिङ्किणीगुणैः
सुगन्धिना गन्धवहेन ताडितैः ।
भ्रमत्पताकानिकरैरुदर्चिषो
वितन्वतीमुष्णघृणेः करच्छिदाम् ॥ ४९ ॥

मधुव्रतव्रातविरावकिङ्किणी-
रुतेन रम्यं मणितोरणस्रजाम् ।
चयं दधानामनिलस्य रंहसा
धुतं पताकानुकृतानि बिभ्रतम् ॥ ५० ॥

विवेश तामञ्जलिबद्धसंपदा
मुहुर्मुखेन्दोरुदयेन सर्वतः ।
नरेन्द्रसूनुर्मुकुलानि कल्पयन्
जनस्य हस्तारुणपङ्कजानि सः ॥ ५१ ॥

गुरूनपृष्ट्वैव कुमारमीक्षितुं
जवेन वातायनमीयुरङ्गनाः ।
न ता न सत्यो न च मूढवृत्तय-
स्तथाहि वंशस्य रघोर्विनीतता ॥ ५२ ॥

रराज वातायनसन्ततिर्वृता
विलोलनेत्रैर्वनितामुखाम्बुजैः ।
तता विनीलोत्पलपत्रसंपदा
सरोजिनी तिर्यगिव व्यवस्थिता ॥ ५३ ॥

---

49. C. स्फुरत्पताका°, D. चलत्पताका° for भ्रमत्पताका°.

50. D. विभ्रतः for बिभ्रतम्. We with A. B. C.

51. B. C. नृपेन्द्रसूनुः for नरेन्द्रसूनुः.

52. B. रयेण, C. तुरेण for जवेन.

दधौ द्युतिं जालगवाक्षसङ्गिनी
नितम्बिनीनां चलदृष्टिसन्ततिः ।
ततेव पङ्केरुहनालजालके
परिस्फुरन्ती शफरीपरम्परा ॥ ९४ ॥

पदं पुरन्ध्र्यामविशुष्कयावकं
समर्पयन्त्यामविलम्बिविक्रमम् ।
बभूव सोपानविमर्दसंभवः
स्वराग एवाङ्घ्रितलस्य यावकः ॥ ९५ ॥

कयाचिदालोकपथं मुखाकुलं
समेत्य घर्मस्रुतपत्रलेखया ।
सखीकपोलाहितगण्डभागया
कृतस्तदीयेऽपि मुखे विशेषकः ॥ ९६ ॥

प्रसाधनव्यापृतयाऽपि रामया
प्रदेशिनीपर्वविकृष्टकर्णया ।
उपाययेवामकरस्थपत्रया
रयेण वातायनजालमन्यया ॥ ९७ ॥

द्रुतप्रयाणश्लथकेशबन्धना
सघर्मवारिस्रुति बिभ्रती मुखम् ।
श्रमातुरोरुद्वयमन्थराऽपरा
ययौ सपत्न्याः परिशङ्कनीयताम् ॥ ९८ ॥

---

56. C. °गल्लभागया for °गण्डभागया. A. B. कृतं तदीयेऽपि मुखे विशेषकं for कृतस्तदीयेऽपि मुखे विशेषकः.

57. D. सुमण्डनव्यापृतया for प्रसाधनव्यापृतया. C. . बालया for रामया. C. त्वरेण, D. जवेन for रयेण.

58. D. सपत्न्या for सपत्न्याः.

नितान्तमेकीकृतगण्डभागयो-
　　र्भृशाल्पवातायनयातमन्ययोः ।
विभासुर कुण्डलमेकमेव तद्
　　मुखद्वयं मण्डयति स्म रामयोः ॥ ५९ ॥

विधाय काचित्प्रथमं तु लज्जया
　　प्रियोपभुक्ताधरमर्धलक्षितम् ।
प्रयाति दूरं नृपतौ दिदृक्षया
　　चकार वातायनबाह्यमाननम् ॥ ६० ॥

अतिष्ठदेका कुचयुग्मसंपदा
　　निरुध्य वातायनमुन्नतस्तनी ।
सखीजनो यत्कृशमध्यभागतः
　　पताकिनीमन्तरमाप वीक्षितुम् ॥ ६१ ॥

निधाय काचित्तनयं तनूदरी
　　विशालवातायनदेहलीतले ।
अकारयत्पङ्कजकोशकोमलं
　　महीभुजे बालकमञ्जलिं बलात् ॥ ६२ ॥

---

59. D. reads the following for the last two lines:—मुखद्वयं कुण्डलमेकमेव तद् प्रभासुरं मण्डयति स्म रामयोः ॥ Agreeing with the Sinhalese edition. C. D. प्रभासुरं for विभासुरं.

60. C. प्रियेण दष्टाधरं for प्रियोपभुक्ताधरं. D. अर्धनिह्नुतं for अर्धलक्षितं. C. निनाय for चकार. D. वाह्यं for बाह्यं.

62. A. विशालवातयनदेहलीतले, B. विभूषिवातायनदेहलीतले, C. प्रसह्य वातायनदेहलीतले, D. प्रसह्य वातायनदेहिनीतले. We with A. °कोष' for °कोश°.

नपः सुमित्रातनयो वधूरिति
 प्रियाजने निर्दिशति स्वयं करैः ।
तलप्रभापाटलभागभागिनो
 नखांशुजाला अपि चेरुरम्बरे ॥ ६३ ॥

अशक्नुवन् वर्धयितुं नृपात्मज
 वधूजनोऽधृष्टतया जयेन तम् ।
पदं विधत्स्वाविधवाजनोचिते
 पथीति पत्न्यै गिरमाशिषं जगौ ॥ ६४ ॥

नरेन्द्रसेना विविशुः समुद्रगाः
 विवृद्धतोया इव यत्समन्ततः ।
महार्णवस्येव न तस्य तत्कृतो
 बभव पूरश्च न चातिरिक्तता ॥ ६५ ॥

द्विधागतं द्वारमुपेत्य तद्बलं
 नृपाङ्गनस्योभयभागसंश्रितम् ।
निबध्यमानाञ्जलि शासिता भवो
 दृशाऽनुगृह्णन् स विवेश मन्दिरम् ॥ ६६ ॥

देशं युधाजिति जितं तनुजे तपोऽर्थी
 विन्यस्य केकयपतिर्विपिनं विविक्षुः ।
दूतेन तेन तनयं दुहितुर्दिदृक्षुः
 कालस्य कस्याचिदथेन्द्रसखं ययाचे ॥ ६७ ॥

---

63. A. B. दर्शयति for निर्दिशति.

64. B. C. अधृष्णुवन् for अशक्नुवन्. C. राज्यै for पत्न.

65. C. नृपेन्द्रसेनाः for नरेन्द्रसेनाः.

66. B. C. नृपाङ्गणस्य for नृपाङ्गनस्य

अथ स युधाजिति स्वविषयं सति नीतवति
प्रथितगुणे गुणप्रचयलाभरतं भरतम् ।
इतरसुताहितप्रियशताहततद्विरह-
प्रभवशुचोऽनयन्नयशुचिर्दिवसान् ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमार-
दासस्य कृतौ प्रस्थानवर्णनो नाम नवमः सर्गः ॥

दशमः सर्गः

ततो नयेन नयतो राज्यं राजीवचक्षुषः ।
तस्य शक्रसमानस्य समानामयुतं ययौ ॥ १ ॥

अथालक्ष्यत तद्देहे काठिन्यरहितत्वचि ।
पलितं विस्रसावल्लीपुष्पहास इव क्वचित् ॥ २ ॥

पलितच्छद्मना दोषा सर्वकालसमुन्नते ।
जरसा शिरसि स्पृष्टे न विषेहे महारथः ॥ ३ ॥

आरोप्यान्यतरेद्युः स्वमङ्कं नाथो भुवः कृती ।
समासीनः समज्यायां ज्यायांसं सुतमब्रवीत् ॥ ४ ॥

मामियं प्राणनिर्याणवैजयन्ती पुरःसरी ।
रक्ताक्षवाहनादेशदूती संसेवते जरा ॥ ५ ॥

जरसा तात नोऽङ्गानि स्पृहा कामेषु निर्विदा ।
शैथिल्यमुपनीतानि तुल्यमेव शनैः शनैः ॥ ६ ॥

कालेन शिरसि न्यस्तैः श्वेतकेशशिताङ्कुशैः ।
निवर्तन्ते हि कामेभ्यो भद्रा राघवदन्तिनः ॥ ७ ॥

---

1. C. इत्थं for ततः. B. शक्रोपमेयस्य, C. शक्रोपमानस्य for शक्रसमानस्य.

2. B. तदादृश्यत, C. तदालक्ष्यत for अथालक्ष्यत.

3. D. जरया for जरसा. B. C. नो for न. D. विसेहे for विषेहे. Agreeing with the Sinhalese edition. But the form is incorrect. A. महाभुजः for महारथः.

4. C. वशी, D. बली for कृती. We with A. B.

5. C. °केतुमाला for °वैजयन्ती. B. C. रक्ताक्षवाहनादेशदूतिका सेवते जरा for रक्ताक्षवाहनादेशदती संसेवते जरा.

6. A. B. C. जरया जात for जरसा तात. [A. जरसा for जरया].

7. A. B. वीरा राघवकुञ्जराः for भद्रा राघवदन्तिनः.

from which the darkness has departed or gone out.' पतङ्ग'-Analyse पतङ्गस्य यत् तेजस्तस्माद् यः परितापस्तेन लोहितं, 'Reddened by the scorching heat from the light of the sun.' शतक्रतोर्दिशः प्रदेशादभिनिष्पततमो जगत् क्रमेण निर्वृतिं व्रजतीव—'Having a red lustre of the twilight which had spread around, with its darkness departed from the region of the quarter presided over by Indra, and reddened by the scorching heat from the light of the sun, the world, as it were, advances by degrees to receive bliss.'

St. 68. हिमांशु°—Construe कोमलद्युतौ हिमांशुबिम्बे पुरुहूतदिङ्मुखस्मितश्रियं बिभ्रति [सति] अञ्जनत्विषा तमसा विमृज्यमानं नभस्तलं [तत्तमः] निर्मोकमिव जहाति. हिमांशु°—Analyse हिमाः अंशवः यस्य स हिमांशुः तस्य बिम्बं तस्मिन् तादृशे, 'On the disk of the cool-rayed moon.' पुरुहूत°—Analyse पुरुहूतस्य दिक् पुरुहूतदिक् तस्याः मुखं पुरुहूतदिङ्मुखं तस्य स्मितस्य श्रीः तां 'The beauty of the smiling on the face of the quarter presided over by Indra,' i. e. the east. कोमलद्युतौ—Analyse कोमला द्युतिर्यस्य स कोमलद्युतिः तस्मिन् तादृशे, 'Having an agreeable light or splendour.' नभस्तलं—Analyse नभसः तलं नभस्तलं, 'The vault of the heaven.' अञ्जनत्विषा—Analyse अञ्जनस्येव त्विट् यस्य तत् अञ्जनत्विट् तेन तादृशेन, 'Bearing a lustre of black pigment.' अञ्जनत्विषा तमसा विमृज्यमानं नभस्तलं [तत्तमः] निर्मोकमिव जहाति 'Whilst the disc of the cool-rayed moon was displaying (*lit.* bearing) an agreeable light and was bearing the beauty of smiles on the face of the quarter presided over by Indra, the surface of the sky, being abandoned by darkness, bearing the lustre of black pigment, forgoes it, as if it were a slough.'

St. 69. अथ—Construe अथ एवमस्य वचःश्रियः अवसरे निष्ठां समीक्ष्य मदालसाः स्खलद्गिराः लंभितादराः प्रमदाः आस्थया उपनीतं मधु तमपाययन्त. वचःश्रियः—Analyse वचसां श्रीर्वचःश्रीः तस्याः वचःश्रियः, 'Of excellence of speech.' निष्ठा properly means मनोवृत्तिः, 'The mood (or temper) of the mind.' i. e. निष्ठां मनोवृत्तिविशेषरूपां समीक्ष्य, 'After having observed (or read) the most excellent mood (or attitude) of his mind.' आस्था *f.*—'A female; probably a female servant.' *Cf.* Medi. "आस्था त्वालम्बनस्थानयत्नापेक्षासु योषिति." मदालसाः—Analyse मदेन अलसाः मदालसाः, 'Lazy from drunkenness.' Languid with passion or love.' 'Indolent with pride.' 'Slothful.' स्खलद्गिराः—Analyse स्खलन्त्यो गिराः यासां ताः स्खलद्गिराः, 'With faltering words.' Mark the word गिरा *f.* 'Speech.' लंभितादराः—Analyse लंभितः आदरः याभिः ताः लंभितादराः, 'Who have cherished respect for.' 'Who have shown respect to.' तं—Refers to the king. अवसर *m.*—'Beginning.' 'End or close' 'Introducing a topic.'

'A subject.' 'A topic.' Mark the Atm. use of the root पा 'to drink,' in the Causal. निष्ठां समीक्ष्य मदालसाः प्रमदाः तं राजानं आस्थयो पनीतं मध्वपाययन्त—'Then after having observed the most excellent mood of his mind, the young women, languid with passion, with words faltering, who had cherished respect for him, pressed him to drink wine, brought by a female servant, at the end of his excellent speech in this way.' Or the verse may be construed thus, अथ एवमस्य वचःश्रियः अवसरे निष्ठां (excellence or perfection) उपनीतं मधु समीक्ष्य प्रमदाः आस्थया (with anxious care or affectionately) तमपाययन्त.

St. 70. प्रियो°—Construe प्रियोपनीतमधिवासितं गण्डूषमधु प्रकामतः पिबतो नृपस्य तदा दन्तच्छदपल्लवो निपीतपानावसरोपदंशको बभूव. प्रियोपनीतं—Analyse प्रियया उपनीतं प्रियोपनीतं, 'Brought by a beloved.' अधिवासितं—Analyse अधिकं वासितं अधिवासितं 'Highly scented.' 'Highly perfumed.' गण्डूषमधु—Analyse गण्डूषे मधु गण्डूषमधु, or गण्डूषमात्रं मधु गण्डूषमधु, 'A mouthful of wine.' दन्तच्छदपल्लवः—Analyse दन्तानां छदः दन्तच्छदः स एव पल्लवः दन्तच्छदपल्लवः, 'Sprout-like lips.' निपीत°—Analyse निपीतस्य नितरां पीतस्य मधुनः पानं निपीतपानं तस्य अवसरे उपदंशको निपीतपानावसरोपदंशकः, 'A condiment at the time of the drinking of wine which was drunk up to satiety.' प्रकामतः *ind.*—'With great pleasure or delight.' 'Willingly.' 'To the heart's content.' 'At will.' गण्डूषमधु पिबतः नृपस्य तदा दन्तच्छदपल्लवः निपीतपानावसरोपदंशकः बभूव—'While the king was drinking to his heart's content a mouthful of sweet-scented wine offered to him by his beloved, from her mouth, her sprout-like lips became to him a condiment at the time of taking in (that mouthful of) wine with which he was already satiated.'

St. 71. प्रियेण—Construe प्रियेण विपक्षगोत्रेण निगद्य लंभितं लसितोत्पलं मधु अपीतमपि सद्यः वध्वाः अक्षि रागवद् विधाय गण्डयोः श्रमवारि ततान. लसितोत्पलं—Analyse लसितानि उत्पलानि यस्मिन् तत् तादृशं कमलसुरभितं, 'Perfumed with a sweet scent of lotuses.' विपक्षगोत्रेण-Analyse विपक्षस्य गोत्रं विपक्षगोत्रं तेन तादृशेन, 'By a rival name.' अपीतं—Analyse न पीतं अपीतं, 'Not drunk.' To be construed with नायिकया which is suppressed. श्रमवारि—Analyse श्रमस्य वारि श्रमवारि, 'Perspiration or sweat from labour.' 'Drops of perspiration from distress or pain.' श्रम *m.*—Means here, distress, pain consequent on humiliation or mortification. निगद्य *ger.*—Is equivalent to सपत्नीनाम्ना आहूय, 'By addressing her with her rival's name.' मधु अपीतमपि सद्यो वध्वाः अक्षि रागवद् विधाय गण्डयोः श्रमवारि ततान—'Wine, perfumed with a sweet scent of lotuses, and given to a young lady by addressing her with her

rival name by her dear lord, though untouched (*lit.* though not quaffed), instantly made her eyes red-hued and diffused her temple sides with drops of perspiration (from humiliation).'

St. 72. त्विषा—Construe मुखेन्दोः त्विषा शर्वरीकृतः [चन्द्रस्य] करेण [च] अम्बुजे मुकुलत्वं नीते सति मधुभाजि भाजने प्रियेक्षणस्य प्रतिबिम्बं सरोजकृत्यमाचरत्. मुखेन्दोः—Analyse मुखमेव इन्दुः मुखेन्दुः तस्य तादृशस्य, 'Of the moon-face.' 'Of the moon-like face.' शर्वरीकृतः—Analyse शर्वरीं करोतीति शर्वरीकृत् तस्य तादृशस्य, 'Of the lord of the night' i. e. of the moon. प्रियेक्षणस्य—Analyse प्रियायाः ईक्षणं प्रियेक्षणं तस्य तादृशस्य, 'Of the eyes of the beloved.' सरोजकृत्यं—Analyse सरसि जातं सरोजं तस्य कृत्यं सरोजकृत्यं, 'The function (or the office) of a lotus.' मधुभाजि—Analyse मधु भजतीति मधुभाक् तस्मिन् मधुभाजि, 'Containing wine.' मधुभाजि भाजने—'A goblet containing wine.' मधुभाजि भाजने प्रियेक्षणस्य प्रतिबिम्बं सरोजकृत्यमाचरत्—'When the lotus (which was put in the goblet of wine) was made to close like a bud by the splendour of the moon-face and by the rays of the moon the reflection of the eyes of the beloved in a goblet containing wine filled the office of a lotus' i. e. caused it to burst open.

St. 73. यियासुना—Construe प्रतिबिम्बमूर्तिना पङ्कजगर्भसौरभं तदीयं मुखं यियासुना हिमांशुना तरङ्गितासवे चषके समन्मथेनेव मुहुश्चकम्पे. यियासुना, Expl:—यातुमिच्छुः यियासुः तेन तादृशेन, 'Wishing to depart.' 'Desirous of going.' पङ्कज°—Analyse पङ्के जातं पङ्कजम् । पङ्कजस्य गर्भः पङ्कजगर्भः तद्वत् सौरभं पङ्कजगर्भसौरभं, 'Fragrant like the interior of a lotus.' प्रतिबिम्बमूर्तिना—Analyse प्रतिबिम्बं एव मूर्तिर्यस्य स तेन तादृशेन, 'Having the form of an image.' समन्मथेन—Analyse मन्मथेन सह समन्मथः तेन तादृशेन, 'Inspired by love.' तरङ्गितासवे—Analyse तरङ्गितश्चासौ आसवश्च तरङ्गितासवः तस्मिन् तादृशे, 'In the wavy wine.' हिमांशुना—Analyse हिमाः अंशवः यस्य स तेन तादृशेन, 'By the cool-rayed moon.' प्रतिबिम्बमूर्तिना तदीयं मुखं यियासुना हिमांशुना तरङ्गितासवे चषके समन्मथेनेव मुहुश्चकम्पे—'The moon with the form of a reflected image and desirous of going to her mouth, fragrant like the interior of a lotus, trembled repeatedly as if smitten by love, in the wine-glass, the wine in which was moving.' Mark the impersonal construction in लिट्.

St. 74. विलासवत्यः—Construe मदघूर्णलोचना विलासवत्यो निरूपयन्त्यो मुग्धाः शुचिरूप्यभाजने स्थितस्य मधुनः इन्दुप्रतिरूपगोपितं स्वरूपं न जज्ञिरे. मद°—Analyse मदेन घूर्णे लोचने यासां ताः, 'Having their eyes rolling with intoxication.' 'With their eyes rolling with great delight.' शुचि°—Analyse रूप्यस्य भाजनं रूप्यभाजनम् । शुचि च तद् रूप्यभाजनं च शुचिरूप्यभाजनं,

'In a glittering silver-pot.' 'In a beautiful goblet.' स्वरूपं—Analyse स्वस्य रूपं स्वरूपं, 'One's own form or shape.' इन्दु°—Analyse इन्दोः प्रतिरूपेण गोपितं इन्दुप्रतिरूपगोपितं, 'Assimilated (or hidden) in the reflected image of the moon.' मुग्धाः शुचिरूप्यभाजने स्थितस्य मधुनः इन्दुप्रतिरूपगोपितं स्वरूपं न जज्ञिरे—'Silly coquettish women, with their eyes rolling with intoxication, attentively looking, did not know the form of the wine that was standing in the glittering silver-goblet as it was assimilated into the reflected image of the moon.'

St. 75. विधूय—Construe आसवः पूर्वं मानादपि अनन्यसाधितं प्रवृद्धवामत्वं विधूय तासां हृदये स्मरं बबन्ध नु । विलोचने रागं [बबन्ध] नु । मुखे सौरभं [बबन्ध] नु. प्रवृद्धवामत्वं—Analyse प्रवृद्धं च वामत्वं च प्रवृद्धवामत्वं, 'Highly developed (or full grown) perverseness.' अनन्यसाधितं—Analyse न अन्यैः साधितं अनन्यसाधितं, 'Not practised or put to parctice by other women.' आसवः तासां हृदये स्मरं बबन्ध नु । विलोचने रागं [बबन्ध] नु । मुखे सौरभं [बबन्ध] नु—'After having previously removed the developed perverseness not put to practice by other women, even from haughtiness, has the wine fastened the god of Love on their heart, imparted colour to their eyes, and given fragrance to their mouth ?'

St. 76. इति—Construe इति बन्दिनः प्रियांकतल्पे शयितं प्रबन्धाहितपानकातरं विधातृतेजसं [राजानं] मङ्गलवन्ति वाक्यानि विधाय निशात्यये व्यबोधयन्. *Cf.* R. V. 65. "तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशांगरागम् । सूतात्मजाः सवयसः प्रथितप्रबोधं प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥" प्रबन्ध°—Analyse प्रबन्धेन आहितं यत्पानं तेन कातरः तं तादृशं, 'Fuddled (i. e. helpless or disordered) by a drink given to him (by his queens) continuously.' प्रियांकतल्पे—Analyse प्रियायाः अङ्कः स एव तल्पः तस्मिन् तादृशे, 'On a couch made of the lap of his beloved.' निशात्यये:—Analyse निशायाः अत्ययः निशात्ययः तस्मिन् तादृशे, 'After the passing away of the night.' 'At dawn.' बन्दिन् or वन्दिन् *m.*—'A panegyrist.' 'A bard.' A herald whose duty is to proclaim the titles of a great man as he passes along, or who sings the praises of a prince in his presence or accompanies an army to chant martial songs; these bards are regarded as belonging to a distinct tribe, being considered the descendants of a Kshatriya by a S'udra female. विधातृतेजसं—Analyse विधातुः तेजः इव तेजो यस्य स विधातृतेजाः तं तादृशं, 'Possessing a power or might like that of the Creator.' बन्दिनः प्रियांकतल्पे शयितं विधातृतेजसं मङ्गलवन्ति वाक्यानि विधाय निशात्यये व्यबोधयन्—'Him who was fuddled by a drink given to

him (by his queens) contiuously, who had slept on a couch of the lap of his beloved, and possessing a power like that of the Creator, roused, at dawn, the bards, by singing auspicious metrical songs.'

St. 77. जहिहि—Construe शयनं जहिहि । अनुरक्तमण्डलस्य कीर्णपादधाम्नः क्षततामसस्य भानोः भुवनशिरसि उद्गमस्य कालः भवतः इव समुपनमति. *Cf.* R. V. 66. "रात्रिर्गता मतिमतां वर मुञ्च शय्याम् ॥" समुपनम् *vt.* or *vi.* 1. P. (अनिट्) 'To approach,' 'to draw near,' 'to arrive &c. (of time).' अनुरक्तमण्डलस्य—Analyse अनुरक्तं मण्डलं यस्मिन् स अनुरक्त-मण्डलः तस्य तादृशस्य, 'He to whom the people of surrounding territories are attached or devoted.' As applied to the sun the compound may be analysed as, अनुरक्तं रक्तवर्णं मण्डलं बिम्बं यस्य स तस्य तादृशस्य, 'Having a red orb.' भुवनशिरसि—Analyse भुवनस्य शिरः भुवनशिरः तस्मिन् तादृशे, 'On the head or centre of the world or earth' i. e. on the best part of the world or in the east. कीर्ण°—Analyse कीर्णं प्रसारितं पादयोः धाम प्रतापः येन स कीर्णपादधामा तस्य तादृशस्य, 'Who has spread his valour all over the world.' As applied to the sun the compound may be analysed as, कीर्णं प्रसारितं पादानां किरणानां धाम तेजः येन स कीर्णपादधामा तस्य तादृशस्य, 'Spread the splendour or light of his rays.' क्षत°—Analyse क्षतं तामसं येन स तस्य क्षततामसस्य नष्टतमो-गुणस्य, 'Of him who had destoyed darkness.' When applied to the sun the compound may be analysed as, क्षतं तामसं येन स क्षततामसः दूरीकृतान्धकारः तस्य तादृशस्य, 'One who has expelled or removed the darkness.' The metre of the verse is पुष्पिताग्रा or औपच्छन्दसिक. For definition see notes on verse 88 of the first canto. क्षततामसस्य भानोः भुवनशिरसि उद्गमस्य कालः भवतः इव समुपनमति—'Please abandon thy couch (of bed). There on the horizon of the earth approaches (or arrives) the time of the rise of the sun, with its red orb, which has expelled the darkness, and spread the brilliant light of its rays like thee.'

St. 78. विरामः—Construe शर्वर्याः विरामः हिमरुचिः अस्तशिखरं अवाप्तः । मुकुलितांभोरुहदृशः तव अद्यापि स्वापः किं । इति अयं तरुणः भानुः विबोधाय आताम्रेण करेण प्रमदवनपर्यन्तसरसीं प्रहरति इव. हिमरुचिः—Analyse हिमा रुचिर्यस्य स हिमरुचिः 'The cool-rayed moon.' 'Possessing cool light.' अस्तशिखरं—Analyse अस्तस्य शिखरः अस्तशिखरः तं तादृशं, 'To the summit of a mountain where the sun and the moon set,' i. e. to the western mountain. मुकुलित°—Analyse मुकुलितं च यद् अंभोरुहं च मुकुलिताम्भोरुहम् । मुकुलितांभोरुहमिव दृशौ यस्य स मुकुलितांभोरुहदृक् तस्य तादृशस्य, 'Having eyes resembling a budded

lotus.' प्रमद°—Analyse प्रमदवनस्य पर्यन्ते या सरसी प्रमदवनपर्यन्तसरसी तां तादृशीं, 'A pond situated on the boundary of a pleasure-garden.' प्रमदवन or प्रमदकानन *n*.—'A royal garden or pleasure ground attached to the palace where the wives of the prince sport.' 'A pleasure-garden for the wives of a king.' शर्वर्याः विरामः हिमरुचिः अस्ताशिखरं अवाप्तः—'The cool-rayed moon, the repose of the night, has come to the western mountain.' मुकुलितांभोरुहदृशः तत्र अद्यापि स्वापः किं—'Why should you, with your eyes resembling a budded lotus, lie on a bed even now (or till now)?' इति अयं तरुणः भानुः विबोधाय आताम्रेण करेण प्रमदवनपर्यन्तसरसीं प्रहरति इव—'In these words, the morning sun (*lit.* the young sun) as if,strikes the lake situated on the boundary of the pleasure-garden with its red hand (or rays) in order to rouse it from sleep.'

St. 79. समुत्तिष्ठन्ति—Construe एते ते [तव] द्विपाः अपरं निगडकृतझङ्कारं शनैः आकर्षन्तः करटतटलीनालिविततीः हेलाविधुतपृथुकर्णान्तपवनैः निरस्यन्तः दन्ताग्रस्थितकरं आननतटं उदस्य समुत्तिष्ठन्ति. निगड°—Analyse निगडैः कृतः यः झङ्कारः तं तादृशं, 'The clanking made by the chains of fetters.' अपरं—अविद्यमानः परः यस्य तं, 'Unequalled.' करट°—Analyse करटयोः तटः तत्र लीनाः अलीनां विततयः ताः तादृशीः, 'The clusters of bees clung to the sides of cheeks.' हेला°—Analyse हेलया विधूतौ यौ पृथुकर्णान्तौ ताभ्यां ये पवनाः तैः तादृशैः, 'By the wind produced from the flapping of the extremities of broad ears through ease.' दन्त°—Analyse दन्तयोः यद् अग्रं तत्र स्थितः करः तं तादृशं, 'The trunk on the tips of its tusks.' आननतटं—Analyse आननस्य तटः आननतटः तं तादृशं, 'The sloping sides of its mouth.' The metre of the verses 78–9 is शिखरिणी which is thus defined:—"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी." The Gaṇas are य म न स भ with a short and a long syllable. एते ते द्विपा निगडकृतझङ्कारं आकर्षन्तः करटतटलीनालिविततीः हेलाविधुतपृथुकर्णान्तपवनैः निरस्यन्तः समुत्तिष्ठन्ति—'Tardily dragging behind the loudly clanking chains and warding off the clusters of bees, clung to the sloping sides of their cheeks, by the wind produced from the easy flappings of the extremities of broad ears, yonder, thy elephants rise up, raising the sloping sides of its face, the trunk whereof was lying (or hanging) on the tips of its tusks.'

St 80. पादेन—Construe पटुपटहरवैर्बोधितः एकेन पादेन आवासयष्ट्यां तिष्ठन् चिरशयनगुरुं अन्यं पादं पश्चात्पक्षेण सार्धं वितत्य उत्फुल्लोद्धूतपक्षच्युतहिमकणिकावृष्टिः ताण्डवार्थी ते मयूरः मार्तण्डधामोदयं दृष्ट्वा उदितमुदा उज्जृम्भते. पटु°–Analyse

पटहानां रवाः पटहरवाः । पटवश्च पटहरवाश्च पटुपटहरवाः तैः तादृशैः, 'Sharp (or clear) sounding noise or thunder of a drum.' *Cf.* R. IX. 71. "पटुपटहध्वनिभिर्विनीतनिद्रः." चिर°—Analyse चिरं च तत् शयनं च चिरशयनं तेन गुरुः तं तादृशं, 'Heavy by reason of sleep for a long time.' उत्फुल्ल°—Analyse उत्फुल्लाश्च ते उद्धूतपक्षाश्च उत्फुल्लोद्धूतपक्षाः तेभ्यः च्युताः हिमस्य कणिकाः तासां आवृष्टिर्येन स तादृशः, 'Making showers of particles of snow dropped down from shaking feathers, increased in bulk.' आवासयष्ट्यां—Analyse आवासस्य यष्टिः आवासयष्टिः तस्यां तादृश्यां, 'On a perching-rod.' मार्तण्ड°—Analyse मार्तण्डस्य धाम मार्तण्डधाम तस्य उदयः तं तादृशं, 'The rise of the splendour of the sun.' उदितमुदा—Analyse उदिता चासौ मुच्च उदितमुद् तया उदितमुदा, 'With increasing delight.' ताण्डवार्थी—Analyse ताण्डवस्य अर्थी ताण्डवार्थी, 'Seeking for a ताण्डव dance.' 'Desirons of a ताण्डव dance.' ताण्डव, Expl:—तण्डुना नन्दिना यत्प्रोक्तम् । "पुंनृत्यं ताण्डवं प्रोक्तम्" । उद्धतनृत्यमिति यावत्. The meter of this and the next verse is स्रग्धरा which is thus defined:-"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्." The Gaṇas are म र भ न य य य. पटुपटहरवैर्बोधितः आवासयष्ट्यां एकेन पादेन तिष्ठन् चिरशयनगुरुं अन्यं पादं पश्चात्पक्षेण सार्धं वितत्य—'Roused from sleep by the thunder of a sharp sounding drum, and resting on a perching-rod with a single leg, thy peacock has stretched out its other leg, heavy by reason of sleep for a long time along with its hinder tail.' उत्फुल्लोद्धूतपक्षच्युतहिमकणिकावृष्टिः ताण्डवार्थी ते मयूरः मार्तण्डधामोदयं दृष्ट्वा उदितमुदा उज्जृंभते—'After having seen the rise of the splendour of the sun thy peacock, raining showers of particles of snow trickle down from the shaking feathers increased in bulk and desirous of making a Tàn*da*va dance, rises up with increasing cheerfulness.'

St. 81. पूर्वाद्रौ—Construe पूर्वाद्रौ सूर्यपादे चरति [सति] चन्द्रपादावदातं तल्पं विसृजता मलयतरुरसामोदितांसद्वयेन तेन [राज्ञा] उन्निद्रश्वेतपद्मप्रकरपरिकरच्छन्नवीचीवितानात् सरस्तः मन्दं उद्यन् सलिलगुरुबृहत्पक्षतिर्मल्लिकाक्षः अनुचक्रे. पूर्वाद्रौ—Analyse पूर्वश्चासौ अद्रिश्च पूर्वाद्रिः तस्मिन् पूर्वाद्रौ, 'On the eastern mountain.' सूर्यपादे—Analyse सूर्यस्य पादः सूर्यपादः तस्मिन् तादृशे, 'The rays of the sun (*lit.* the feet of the sun).' चन्द्र°—Analyse चन्द्रस्य पादाः तद्वद् अवदातं चन्द्रपादावदातं, 'White like the rays of the moon.' 'White like lunar rays.' मलय *m.*—'A garden.' 'A celestial grove,'=नन्दनवन. मलय°—Analyse मलयस्य तरवः मलयतरवः तेषां रसेन आमोदितं अंसयोर्द्वयं यस्य स मलयतरुरसामोदितांसद्वयः तेन तादृशेन, 'A pair of whose shoulders was scented with diffusive perfume of a sap of trees of Nandana

garden.' उन्निद्र°—Analyse श्वेताश्च ते पद्माश्च श्वेतपद्माः । उन्निद्राश्च ते श्वेतपद्माश्च उन्निद्रश्वेतपद्माः तेषां ये प्रकराः तेषां परिकरेण छन्नं यद् वीचीनां वितानं यस्य तत् उन्निद्रश्वेतपद्मप्रकरपरिकरच्छन्नवीचिवितानं तस्मात्, 'From an awning of waves clad in a zone of multitudes of full blown white lotuses.' सलिल°—Analyse बृहती चासौ पक्षतिश्च बृहत्पक्षतिः । सलिलेन गुरुः बृहत्पक्षतिर्यस्य स सलिलगुरुबृहत्पक्षतिः, 'Having the large pits of wings made heavy by water.' तल्पं विसृजता मलयतरुरसामोदितांसद्वयेन तेन सरस्तः मन्दं उद्यन् मल्लिकाक्षः अनुचक्रे—'When the rays of the sun were shedding their lustre on the eastern mountain, he, with his pair of shoulders scented with the diffusive perfume of the sap of trees in the celestial garden' leaving his couch white like the lunar rays, imitated a Mallikáksha goose, with its large pits of wings made heavy by water and gently rising from a lake, having awnings of waves, clad in a zone of multitudes of full blown white lotuses.'

———:o:———

CANTO IV.

St. 1. अथ—Construe अथ स विधुरः भूपतिः चेतसि पुत्रकाम्यया सुबहुद्विजसात्कृताखिलद्रविणः [सन्] प्रविजृंभिते शुचौ स्तोमं अयष्ट. पुत्रकाम्यया—Analyse पुत्रस्य काम्या पुत्रकाम्या तया तादृश्या, 'Wish for a son.' 'Desire to have a son.' सुबहु°—Analyse सुबहवः ये द्विजाः तेषां अधीनं कृतं अखिलं द्रविणं येन स सुबहुद्विजसात्कृताखिलद्रविणः, 'Who has consigned all his wealth to (*lit.* brought under the proprietorship of) many Bràhmaṇas.' भूपतिः—Analyse भुवः पतिः भूपतिः, 'The lord of the earth.' The metre of this canto is वियोगिनी a species of वैतालीय. It is thus defined:—"विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी." In the odd verse the Gaṇas are स स ज and a long syllable; and in the even verse स भ र and a short and long syllable. अथ—'Then that care-worn lord of the earth, anxious in his heart to have a son, then spread a number of sacrifices in which he gave all his wealth to many learned Brahmaṇas, in the lighted (on blazing) fire.'

St. 2. बहुशः—Construe बहुशः तदध्वरे इति विफले सति अभिधानप्रथितः तपोनिधिः ऋष्यशृङ्गः अनन्तरं पुत्रीयं क्रतुं निरवर्तयत. तदध्वरे—Analyse तस्य अध्वरः तदध्वरः तस्मिन् तादृशे, 'In his sacrifice.' विफले—Analyse विगतं फलं यस्मात् स विफलः तस्मिन् तादृशे, 'Fruitless.' 'Ineffectual.' 'Useless.' ऋष्यशृंग *m.*—Name of a great sage. He was the sun of विभाण्डक and a heavenly nymph in the shape of a deer. He was brought up in the forest by his father and saw no other human being until he attained early manhood. At a season of great drought लोमपाद, king of Anga, by the advice of Bràhmaṇas, allured ऋष्यशृङ्ग to his house and with great ceremony gave his daughter शान्ता in marriage to him. The sage, satisfied with that gift, caused heavy showers to fall in his kingdom. He was subsequently called by दशरथ to perform for him a sacrifice for the attainment of issue. अभिधानप्रथितः—Analyse अभिधानेन प्रथितः अभिधानप्रथितः, 'Known or celebrated by his name.' 'Having his name celebrated in the world.' तपोनिधिः 'Analyse तपसां निधिः तपोनिधिः, 'A treasury cf religious austerities and penance.' 'A very treasure of merit derived from self mortification.' 'An eminently pious sage.'

बहुशः—' Although his sacrifices often became thus ineffectual the celebrated sage ऋष्यशृङ्ग, treasury of asceticism, then completed a sacrifice procuring for him a son.'

St. 3. उदियाय—Construe रुचा परिज्वलन् कश्चन पुमान् श्रितचामीकरभाजनं चरुं परिगृह्य ततो ज्वलतो रोहितवाजिनः अस्य [नृपस्य] उदियाय. *Cf.* R. X. 50-51 "अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः। पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम्॥ हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम्। अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्॥" श्रित°—Analyse श्रितं चामीकरस्य भाजनं पात्रं येन स श्रितचामीकरभाजनः तं तादृशं, 'Put in a golden vessel.' रोहितवाजिनः—Analyse रोहितौ वाजिनौ यस्य स तस्य, 'Of one having or driving red-horses.' An epithet of fire. *Cf.* रोहिताश्व. "रोहिताश्वो वृहद्भानौ हरिश्चन्द्रनृपात्मजे." उदियाय—'Blazing with (bodily) splendour, a certain human being, having taken (in his hands) a golden vessel in which was put the *Charu* came out of that burning fire to the king.'

St. 4. प्रविवेश—Construe विशाम्पतिः अरातितापितत्रिदशाश्रुस्रवदृष्टयवग्रहं प्रविधातुं आत्मना चतुरंशीकृततेजसा चरुं प्रविवेश. विशाम्पतिः—Analyse विशां पतिः विशाम्पतिः, 'Lord of gods.' चतुरंशीकृततेजसा—Analyse चतुरंशीकृतं तेजः यस्मिन् तेन तादृशेन, 'In which the vital power was divided into four parts.' अराति°—Analyse अरातिना तापिताः ये त्रिदशाः तेषां अश्रूणां स्रवाः तेषां दृष्टेः अवग्रहो यस्मात् स तं तादशं, 'A drought to the showers made up of the flow of tears of the immortals oppressed (or harassed) by the enemy.' प्रविवेश—'That lord of lords entered into the *Charu* with his self in which his vital power was divided into four portions, in order to be a drought to the showers made up of the flow of tears of the immortals oppressed by the enemy.'

St. 5. दयिताभिः—Construe असौ चरुः अनन्ततेजसा मुनिना परिकल्प्य लम्भितः भूपतेः तिसृभिः दयिताभिः प्रविभज्य अशितः [सन्] गर्भं अवीभवत्. अनन्त°—Analyse अनन्तं तेजो यस्य स अनन्ततेजाः तेन अनन्ततेजसा, 'Having boundless lustre.' 'Of an unlimited power.' परिकल्प्य *ger.*—'Having distributed.' अवीभवत्—'Brought into existence.' दयिताभिः—'Handed over to them after being arranged by the sage of an unlimited power and eaten by the three wives of the king in divisions the *Charu* brought into existence a fœtus (or embryo).'

St. 6. सुतयोः—Construe कोसलकेकयेन्द्रयोः सुतयोः वालिजिद्भरतौ भवतः स्म। यमतुल्यतेजसौ यमजौ सुमित्रया सुषुवाते. वालिजिद्भरतौ—Analyse वालिं जयतीति वालिजिद्। वालिजिच्च भरतश्च वालिजिद्भरतौ, 'Vanquisher of Vàli and

Bharata,' i. e. Ráma and Bharata. वालि *m.*—A great monkey-chief, who was killed by Ráma at the instigation of Sugrîva Váli's younger brother. His wife Tàrá subsequently married Sugrîva. भरत *m.*—Son of Das'aratha and Kaikeyî. He was firmly devoted to Ràma and was deeply grieved to learn that his mother had been instrumental in sending Ràma into exile. He would not accept the throne and ruled his father's kingdom in the name of Ràma while the latter was in exile. कोसलकेकयेन्द्रयोः--Analyse कोसलानां केकयानां च इन्द्रौ कोसलकेकयेन्द्रौ तयोः कोसलकेकयेन्द्रयोः, 'Of the lords of Kosala and Kekaya.' सुमित्रा *f.*—One of the wives of the king दशरथ, and mother of Lakshmaṇa and S'atrughna. यमतुल्यतेजसौ—Analyse यमेन तुल्यं तेजो ययोः तौ यमतुल्यतेजसौ, 'Having the power or energy like that of Yama, the god of death.' कोसलकेकयेन्द्रयोः सुतयोः वालिजिद्भरतौ भवतः स्म—'The vanquisher of Vàli and Bharata were born to the daughters of the lords of the Kosalas and the Kekayas (respectively).' यमतुल्यतेजसौ यमजौ सुमित्रया सुषुवाते—'And at a proper time Sumitrá brought forth twins who were equal in might to Yama, the god of death.'

St. 7. अथ—Construe अथ दिव्यमुनिप्रवर्तितप्रसवानन्तरजातकर्मणां चरुजन्मनां तनुसंदर्शितदन्तकुड्मला दशा रुरुचे. दिव्य°—Analyse दिवि भवः दिव्यः। दिव्यश्चासौ मुनिश्च दिव्यमुनिः तेन प्रवर्तितं प्रसवस्य अनन्तरं जातकर्म येषां तेषां तादृशानां, 'Whose birth ceremony was resumed (or commenced) after their birth by the celestial sage.' जातकर्मन् *n.*—This is a ceremony at the birth of a child, when the navel-string is divided. It consists in touching the infant's tongue thrice with Ghee after appropriate Mantras. Náráyaṇa Bha*tt*a in his प्रयोगरत्न, under जातकर्म says 'the moment the birth of a son is announced the father shall see his face, and shall bathe in a river with his face turned towards the east, or if that is not possible, shall bathe at home in cold water mixed with hot water, brought from a river during day time, and purified by a bit of gold being thrown in it. Then having sipped water, he shall besmear himself with sandle and wear garlands of flowers, and before the scission of the navel-stalk and before the baby is touched by any one except the mid-wife, he shall cause it to be placed on the lap of its mother, with its face turned towards the east, and say ममास्य कुमारस्य गर्भाम्बुपानजनितसकलदोषनिर्हरणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्ये. He then shall perform a श्राद्ध to the nine ancestors, and shall throw oblations of clarified butter into the sacred fire,

St. 50. अनुजग्मतुः—Construe अश्रुवर्षिणः पौरजनस्य अनाकुलातुरैः हृदयैः [सह] अनुयातौ राघवौ एनं मुनिं अशिवैकचिन्तया अनुजग्मतुः. अश्रु°—Analyse अश्रूणि वर्षतीति अश्रुवर्षी तस्य तादृशस्य, 'Shedding (or streaming down) tears.' पौर°—Analyse पुरे भवाः पौराः। पौराः एव जनः तस्य तादृशस्य, 'Of the citizens.' अनाकुलातुरैः—Analyse आकुलानि च आतुराणि च आकुलातुराणि। न आकुलातुराणि अनाकुलातुराणि तैः तादृशैः, 'Not sick and overburdened with.' अशिवैक°—Analyse एका चासौ चिन्ता च एकचिन्ता। अशिवस्य एकचिन्ता अशिवैकचिन्ता तया, 'With the sole thought about that misfortune.' अनुजग्मतुः—'The two descendants of Raghu with their sole thoughts regarding that misfortune went after that sage followed by the cheerful and unconfounded hearts of the citizens whose eyes were streaming down tears.'

St. 51. यमिनः——Construe ऐतिहासिकाद् यमिनश्च विविधाश्रयाः कथाः उपशृण्वन् बलया विद्यया आनीतबलः स राघवः पथि क्लमथं न विवेद. ऐतिहासिकात्—'From a historian.' *Cf.* Pàṇi. IV. 2. 60. and the Vàrtika thereto. "आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठग्वक्तव्यः." 'The affix ठक् comes in the same sense after names of stories [आख्यान], narratives [आख्यायिका], and after the words इतिहास and पुराण,' as, यावक्रीतिकः, प्रैयङ्गविकः, वासवदत्तिकः, सौमनोत्तरिकः, ऐतिहासिकः, पौराणिकः. विविधाश्रयाः—Analyse विविधाः आश्रयाः यासां ताः विविधाश्रयाः, 'Endowed or furnished with various sorts or kinds.' 'Depending (or resting) on various or multiform kinds.' क्लमथ *m.*—'Weariness.' बलया विद्यया = मन्त्रविशेषेण, 'By virtue of the spell called बला,' which is thus defined:—

" उत्साहबलयोर्वृद्धिः परशस्त्रसहिष्णुता । न बाधा क्षुत्पिपासाभ्यां यतः सा कथिता बला. " *Cf.* Ràmáyaṇa–Bálakáṇ*da.* Canto XXII. 18. " क्षुत्पिपासे न ते राम भविष्येते नरोत्तम । बलामतिबलां चैव पठतः पथि राघव. " Also *Cf.* R. XI. 9. " तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः. " आनीत°—Analyse आनीतं बलं यस्य स आनीतबलः संप्राप्तशक्तिः, 'One who has acquired bodily strength.' यमिनः—'And that descendant of Raghu, who was endowed with bodily strength by virtue of the spell called Balá, did not feel weariness on the road while hearing various kinds of stories from that saintly historian.'

St. 52. अथ—Construe अथ सुहृद्द्रुहः वज्रभृतः स्नपनेन यो विश्रुतः विषयः पिशिताशीनिहतं तत्पुरं निरीक्ष्य स नृवरो निजगाद. वज्रभृतः—Analyse वज्रं बिभर्तीति वज्रभृत् तस्य तादृशस्य, 'Of one who carries or wields a thunderbolt.' सुहृद्द्रुहः—Analyse सुहृदे द्रुह्यतीति सुहृध्रुक्–द् तस्य तादृशस्य, 'Of one who injures a friend.' 'Of one who smites a friend secretly.' नृवरः—Analyse नृणां वरः नृवरः, 'Best of men.' तत्पुरं—Analyse तस्य पुरं तत्पुरं, 'The city or town of which.' पिशिताशी°—Analyse पिशितं मांसं अश्नातीति पिशिताशी तया निहतं पिशिताशीनिहतं यक्षिण्या ध्वस्तं, 'Devastated by the flesh-eating demoness.' वज्रभृतः स्नपनेन विश्रुतः विषयः—'A country celebrated for the washing or bathing of the wielder of thunder (i. e. Indra).' The following legend was narrated to Ràma by Vis'vámitra,—'Do thou, listen, O Kàkutstha, as to whom belongeth this dreadful forest! Here were formerly, O foremost of men, two flourishing provinces, named Malada and Karûsha, built by celestial architects. In days of yore, O Ràma, on the occasion of the destruction of Vritra, the thousand-eyed one came to have hunger, to be besmeared with excreta, and to slay a Bràhmaṇa. And when Indra had been thus besmeared, the deities, and the saints having asceticism for wealth, washed him here, and cleansed his person from the dirt. And the deities, having renounced here the filth that had clung unto the person of the mighty Indra, as well as his hunger, attained exceeding delight. And thereat Indra becoming purified, attained his former brightness, and became devoid of hunger. And mightily pleased with this region, he conferred on it an excellent boon, saying,—"Since these two places have held excreta from my body, they going by the names of Malada and Karûsha, shall attain exceeding prosperity and fame among men." And beholding the land thus honoured by the intelligent S'akra, the deities

उभे वक्षासि वश्यानां तिष्ठतो रक्तकर्कशे ।
यौवने वनिता वल्कसन्ततिर्वार्धके च नः ॥ ८ ॥

न जिष्णुः कृतशस्त्रो यो यश्वाढ्यो यज्ञनिस्पृहः ।
कामी यश्च जरन्नेते क्षत्रवंशेषु कत्त्रयः ॥ ९ ॥

पादशेषेऽपि वैराग्यं न यस्य पुरुषायुषे ।
कीदृशी लक्ष्यते तस्य जनस्य हृदयालुता ॥ १० ॥

नातिविस्त्रसया भिन्ने देहे ना तप्यते तपः ।
इतरत्र चिरं जीर्णे तपस्यायां हता गतिः ॥ ११ ॥

मन्दशक्तीन्द्रियश्च्योतल्लालाविच्छुरिताधरः ।
अस्फुटस्मृतिचेष्टाभिर्बालव्रतमिवाचरन् ॥ १२ ॥

मृणालवलयच्छेदतन्तुजालसमत्विषः ।
यौवनोद्दाहभस्मेव दधानः पलितच्छटाः ॥ १३ ॥

जीविते जीर्णवयसः प्रत्याशा मे मुमूर्षतः ।
तिर्यग्विकम्पितैर्मूर्ध्नो नास्तीति प्रथयन्निव ॥ १४ ॥

दन्तकुन्तशतैरुग्रैर्मृत्योः संकटमाननम् ।
प्रवेष्टुमिव बिभ्राणः कायसंकोचखर्वताम् ॥ १५ ॥

---

8. B. यौवने वनिता नश्च वार्धक्ये वल्कसंहतिः, C. यौवने वनितास्माकं वार्धक्ये वल्कसन्ततिः for यौवने वनिता वल्कसन्ततिर्वार्धके च नः.

9. A. B. धृतशस्त्रः for कृतशस्त्रः. A. B. अपि for यः. A. B. यागनिःस्पृहः for यज्ञनिस्पृहः. C. क्षात्रवंशेषु for क्षत्रवंशेषु.

10. D. पुरुषायुषि यस्य न for न यस्य पुरुषायुषे. Agreeing with the Sinhalese edition.

11. D. देहे भिन्ने for भिन्ने देहे. Agreeing with the Sinhalese edition.

12. C. °श्च्योतलाला° for °श्च्योतल्लाला°. Agreeing with the Sinhalese edition. C. °विस्फुरिताधरः for °विच्छुरिताधरः.

15. D. देहसंकोचह्रस्वताम् for कायसंकोचखर्वताम्.

विभ्रदातङ्कनिर्मांसव्यक्तलक्ष्यसमुद्गमाः ।
वीचीरिव जरानद्याः पर्शुकास्थिपरम्पराः ॥ १६ ॥
निर्दन्तत्वादसंस्कारं मोहान्मुष्टिन्धयो यथा ।
मिथोऽशंसितमस्पष्टं वदन्नम्बूकृतं वचः ॥ १७ ॥
भिन्नभ्रुवमुदस्ताश्रां किञ्चित्कम्पितमस्तकाम् ।
नम्रो गद्गदितालापामनुनेतुं जरामिव ॥ १८ ॥
वार्धक्ये धर्मतो मूढः स्वदेहवहनेऽपि सः ।
विधित्सन्नप्यशक्तिष्ठस्तपः कीदृग्विधास्यति ॥ १९ ॥
यतो यातुस्तपस्यायामरण्ये वसतिं त्वया ।
मा जन्यश्रमवर्षेण प्रत्यूहो मे विरागिणः ॥ २० ॥
अनुशिष्टिः प्रकृत्यैव भद्रे भवति कीदृशी ।
मनसः प्रीतये स्नेहकातरस्य निगद्यते ॥ २१ ॥
औदासीन्यं यतः शत्रुरुदासीनश्च मित्रताम् ।
मित्रं भक्तौ दृढत्वं च याति तद्वक्तुमर्हसि ॥ २२ ॥
यो येन वाञ्छति ख्यातिं लोकसंग्रहकामिना ।
न तस्य निन्दनीयं तच्छत्रुतामप्यनिच्छता ॥ २३ ॥
वृत्तिः शुभकरी साम्नो नये स्वपररञ्जनी ।
आयःशूलिकतेत्याहुर्न तां निष्णातबुद्धयः ॥ २४ ॥
जिघांसुभिरपि प्राज्ञैः प्रयोक्तुं साम साम्प्रतम् ।
रञ्जयन्ति मृगान्गीतैर्विभिः सन्तो मृगाविधः ॥ २५ ॥

---

18. A. B. C. उदस्तास्रां for उदस्ताश्रां.

20. A. B. read the following for the first line of our text:— यतो यातुस्तपस्यायै कानने वसतिं त्वया.

21. D. प्रकृत्येव for प्रकृत्यैव. C. समुच्यते for निगद्यते.

25. C. प्रज्ञैः for प्राज्ञैः. D. मृगायवः for मृगाविधः. Agreeing with the Sinhalese edition.

साम शाठ्यं जनो वेत्ति दानादत्यन्तवर्जितम् ।
तत् सामौशनसं साधु युक्तं दानस्य मात्रया ॥ २६ ॥

मा दा रहितसंमानं त्यक्त्वा सत्कारसामनी ।
वित्तं विश्राणितं नीतौ कृतिनो दूषितं विदुः ॥ २७ ॥

शत्रुगृह्येण दुर्धर्षं शत्रुं नेता निहन्त्यथ ।
घनेनेव स्फुलिङ्गार्चिःप्रावृतं पिण्डमायसम् ॥ २८ ॥

उपजापहृतस्वामिस्नेहसीम्नि पराश्रयम् ।
मौले वाञ्छति मेदिन्याः पत्युः पातो न संशयः ॥ २९ ॥

इतरोपायदुःसाध्ये चण्डदण्डो महीपतिः ।
अदुष्टायत्यसौ नीतेरश्नाति विपुलं फलम् ॥ ३० ॥

अव्याहति न शक्या गौर्विना दण्डेन रक्षितुम् ।
इति प्रत्येति मुग्धोऽपि बल्लवः किमु राजकम् ॥ ३१ ॥

क्षोणिपतिः पतत्याशु जराक्रान्त इव ध्रुवम् ।
त्यक्तदण्डः पदं वाञ्छन्नगृहीतजगत्करः ॥ ३२ ॥

इत्थं युक्तिमुपायानां कुर्वाणस्य चतुष्टयीम् ।
व्रजतीन्दुप्रभागौरं पैरैरक्षय्यतां यशः ॥ ३३ ॥

---

26. B. C. सम्यग्युक्तं for साधु युक्तं.

27. A. B. C. हित्वा for त्यक्त्वा. D. द्रव्यं for वित्तं. C. द्रविणं दापितं for वित्तं विश्राणितं.

28. C. निहन्त्यथो, D. निहन्त्यतः for निहन्त्यथ.

29. C. पातः पत्युरसंशयं for पत्युः पातो न संशयः.

30. C. चोग्रदण्डः for चण्डदण्डः. D. भुवः पतिः for महीपतिः.

31. C. अव्याहतं for अव्याहति. C. D. मूढोऽपि for मुग्धोऽपि. D. वल्लवः for बल्लवः.

32. C. क्ष्मानाथः, D. क्षोणिनाथः for क्षोणीपतिः. B. स्वयम् for ध्रुवम्. D. मृष्टदण्डः for त्यक्तदण्डः.

33. B. C. एवम् for इत्थम्.

शूरं पुरुषसारज्ञं नीतौ पटुमलम्पटम्
सम्यग् संरक्षिताः कोशैर्वर्धयन्ति नृपं प्रजाः ॥ ३४ ॥

नोच्चैः पदं लम्भनीयो गुण्योऽप्यन्वयवर्जितः ।
रत्नाढ्यमपि कुर्वीत मूर्ध्नि कः पादमण्डनम् ॥ ३५ ॥

मूर्खो वर्ज्यः कुलीनोऽपि मातङ्ग इव भभजा ।
गुणैः कैरप्यविख्यातो वंशेनैव विभावितः ॥ ३६ ॥

तद्युक्तमुपधाशुद्धमन्वयेन गुणेन च ।
साचिव्यं लम्भयन् मौलं न प्रमाद्यति भूपतिः ॥ ३७ ॥

यस्मिन्कृत्यानुरोधेन सौहृदं प्रतनोति यः ।
स तं त्यजति कृत्यान्ते तीर्णतोय इव प्लवम् ॥ ३८ ॥

यौ तु निष्कारणामुक्तस्नेहपाशौ सुहृत्तरौ ।
मृत्युनैव तयोर्भेदो देहजीवितयोरिव ॥ ३९ ॥

दण्डद्रविणदुर्गैकसङ्गी रक्षति भूपतिः ।
आत्मानमेव सततं किमु रक्षत्यदो जगत् ॥ ४० ॥

---

34. D. reads the following for the first line:—नीतौ पुरुषसारज्ञं पटुं शूरमलम्पटं.

35. C. लम्भनीयः पदं नोचैः for नोच्चैः पदं लम्भनीयः. D. को मूर्ध्नि पादमण्डनम् for मूर्ध्नि कः पादमण्डनम्.

36. A. B. transpose the first and the second lines.

37. C. उपधाशून्यं for उपधाशुद्धं. C. मन्त्रित्वं, D. मन्त्रितां for साचिव्यं.

38. A. C. read the following for the first line of our text:—यत्र कृत्यानुरोधाद्यः सौहृदं वितनोति च.

39. B. C. नैसर्गिकाबद्धस्नेहपाशौ for निष्कारणामुक्तस्नेहपाशौ.

40. Three of our Mss. omit the second line of this verse. We have adopted the third Pa'da from the Sinhalese edition of Principal Dharma'rāma. C. reads किमु रक्षत्यदो जगत; and omits the third Pa'da. Printed editions read असौ for अदः.

इति प्रकृतिवर्गादिनिर्णयेषु नयाश्रयः ।
क्षपितान्तर्बहिःशत्रुः शाधि साधु वसुन्धराम् ॥ ४१ ॥

इत्थं वादिनि राजेन्द्रे रामो मौनमधिश्रितः ।
ववर्ष हृदयं बाष्पैः शोकेन हृदयाविधा ॥ ४२ ॥

ततो वज्रासने भद्रं निधाय निधिः श्रियः ।
निर्भरीकृतसंभारः प्राभिषिक्तो महीपतिः ॥ ४३ ॥

रुरुधे पृष्ठसंविष्टग्रन्थिमन्थरयातया ।
स्मारयित्वा वरा वीरं राज्यं मन्थरय तया ॥ ४४ ॥

आदिदेश ततो वस्तु वनषु वनजेक्षणम् ।
चतुर्दश दशग्रीवशत्रुमिन्द्रसमः समाः ॥ ४५ ॥

अनिन्द्यजानिनारूढो निर्जगाम रथः पुरः ।
कृतप्रस्थानसौमित्रिः स्फुरत्केतुरथो पुरः ॥ ४६ ॥

अश्रुभिर्हृदयं सीता निजमेव न केवलम् ।
चकारार्द्रं जनस्यापि प्रेक्षितस्य वनाध्वनि ॥ ४७ ॥

जगन्नेत्राभिरामस्य रामस्य रहितागसः ।
शक्रस्य त्यागिनं देवं घृणयेवासवो जहुः ॥ ४८ ॥

न्यवर्तत परित्यज्य क्षत्ताथ क्षत्रियत्रयम् ।
ऊढाश्रु वलितग्रीवं चिरं तेनैव वीक्षितः ॥ ४९ ॥

---

42. A. B. C. read the following for the first line of our text:—इत्थं वादिनि राजेन्द्रौ राघवो मौनमास्थितः. [C. कुमारः for राघवः].

44. A. B. ततो भद्रासने भद्रं for ततो वज्रासने भद्रं.

47. C. अस्य for अपि. C. प्रेक्षकस्य for प्रेक्षितस्य.

49. C. D. तेनैव वीक्षितश्चिरं for चिरं तेनैव वीक्षितः. Agreeing with the Sinhalese edition.

द्वित्राण्येव रथं त्यक्त्वा पदान्याधाय निःसहा ।
येयमन्यत्कियद्दूरमिति पप्रच्छ मैथिली ॥ ५० ॥

रामहस्तस्थशाखाग्रकल्पितातपवारणम् ।
प्रस्थानमभवत्तस्यास्तदग्रेसरलक्ष्मणम् ॥ ५१ ॥

इक्षुशाकटशालेयक्षेत्रानुत्तरकोसलान् ।
ययुर्भागीरथीतीरं पश्यन्तः सोत्पलाम्भसः ॥ ५२ ॥

अथानासाद्य कालिन्दीमुल्लङ्घ्य सरितं दिवः ।
भारद्वाजाश्रमं पुण्यं चित्रकूटस्य चाध्वनः ॥ ५३ ॥

चिह्नं नदनदीदेशैरुक्त्वा वृक्षक्ष्माधरैः ।
राजन्यभोगिने याते राघवोऽपि गुहे गृहम् ॥ ५४ ॥

रूपत्न्यौ सरितां पत्युः सुमित्रात्मजधीवरैः ।
चित्रकूटमकूटज्ञः प्रीतः प्रोत्तारितो ययौ ॥ ५५ ॥

ततः सीतामुखाम्भोजभ्रमरत्वे कृतस्पृहम् ।
नष्टैकदृष्टिमस्त्रेण बलिपुष्टं चकार सः ॥ ५६ ॥

ततः प्रतीकसघाटो वीरः केकयवंश्यजः ।
बिभ्रच्छोकद्विगुणितं श्रमं रामाश्रमं ययौ ॥ ५७ ॥

राजघ्नो निर्घृणः कश्चित् संप्राप्त इति साधवे ।
कथ्यतामिति तद्वाक्यं द्वारि शुश्राव राघवः ॥ ५८ ॥

अनुज्ञातोऽनुजस्तेन पर्णशालामथाविशत् ।
द्वारबन्धातिरिक्तेन किञ्चित्तिर्यक्कृतोरसा ॥ ५९ ॥

---

50. C. D. हित्वा for त्यक्त्वा. A. पेशला, B. पेलवा, C. कोमला for निःसहा.

52. C. °कोशलान् for °कोसलान्. A. B. ययुस्ते जाह्नवीतीरं for ययुर्भागीरथीतीरं.

53. C. D. भरद्वाजाश्रमं for भारद्वाजाश्रमं.

57. C. ततस्त्वनीकसंघाटः for ततः प्रतीकसंघाटः.

59. C. द्वारबन्धातिरेकेण for द्वारबन्धातिरिक्तेन.

भरतः शोकसंतप्तो राममादाय पादयोः ।
आर्येत्युक्त्वा सकृद्दीनः पुनर्नोवाच किञ्चन ॥ ६० ॥

ततः श्रुत्वा गुरोरन्तं स दुःखेन हृदिस्पृशा ।
साभिषेकमिवास्रेण चक्रे कर्मौर्ध्वदैहिकम् ॥ ६१ ॥

शपमानामथ स्वस्मै कैकेयीं भूतिनिःस्पृहाम् ।
गर्हन्तं भरतं वक्तुं रामस्तत्र प्रचक्रमे ॥ ६२ ॥

न स्मरामि गुरोराज्ञां ज्ञात्वा जातु विलङ्घिताम् ।
न सद्दक्षं हि नो हन्तुं तातस्य समयं यतः ॥ ६३ ॥

समयस्य गुरोरिन्द्रलोकस्थस्य विलङ्घने ।
बुद्धिश्च निर्विशङ्कैवं पुनर्मा जनि तावकी ॥ ६४ ॥

पूजनीया च ते देवी पत्युः सत्यानुपालिनी ।
दूषयिष्यति पूज्येषु पूजावैमुख्यमायतिम् ॥ ६५ ॥

स्वयं कृतेन दोषेण येन यो लज्जते गुरुः ।
तेन तत्सन्निधौ तद्वानन्योऽपि न च निन्द्यताम् ॥ ६६ ॥

इति व्याहृत्य नम्राय ददौ दीनाय पादुके ।
घर्मे मर्माविधि मरौ वारि वारीष्यते यथा ॥ ६७ ॥

द्विधाकारमिव ज्यायान् भरतं हृदयं चिरम् ।
दर्शयन्तं परिष्वङ्गप्राप्तसान्त्वं व्यसर्जयत् ॥ ६८ ॥

---

60. A. B. तातेत्युक्त्वा for आर्येत्युक्त्वा.

61. C. अश्रेण for अस्रेण. D. और्ध्वदेहिकं for और्ध्वदैहिकं.

62. D. प्रोक्तुं for वक्तुं. C. रामश्चापि, D. राघवोऽत्र for रामस्तत्र. A hiatus in A. between वक्तुं and प्रचक्रमे.

64. C. तु for च.

65. C. हि for च. B. C. सन्धानुपालिनी for सत्यानुपालिनी.

68. A. C. °शान्त्वं for °सान्त्वं.

ततस्तं त्यजता शैलं विराधो रावणारिणा ।
दृष्टस्तनूनपादर्चिर्बभ्रुः पञ्चवटीपथे ॥ ६९ ॥
हरन्तमथ वैदेहीं विनिहत्य निशाचरम् ।
भविष्यदिव संक्षिप्य कथाया वस्त्वदर्शयत् ॥ ७० ॥
पञ्चवट्याश्रमे रम्ये रङ्गत्सारङ्गशावकैः ।
वृतेऽथ ववृते तस्य वासो वासववर्चसः ॥ ७१ ॥
अथ रामं वृषस्यन्ती प्रपेदे नैकसीसुता ।
इव चिन्ता दरिद्रस्य स्थूललक्षं नरेश्वरम् ॥ ७२ ॥
चकर्त नासिकां क्रुद्धः सीताविद्रवणादथ ।
लक्ष्मणस्तन्मुखाम्भोजकर्णिकां कृपया समम् ॥ ७३ ॥
भ्रातृद्वये तदाहूते क्षुरप्रप्रकरं बलम् ।
शस्त्रैर्वर्षयति क्षिप्रमपावरिष्ट राघवौ ॥ ७४ ॥
अदीधपत गृध्राणां व्रातमेकधनुर्धरः ।
सत्यव्रतोऽसृजो धारां खरदूषणयोर्युधि ॥ ७५ ॥
दम्भाजीवकमुत्तुङ्गजटामण्डितमस्तकम् ।
कञ्चिन्नमस्कारिणं सीता ददर्शाश्रममागतम् ॥ ७६ ॥

---

69. D. विरोधः for विराधः.

70. B. C. विनिष्पिष्य for विनिहत्य.

72. A. निकषासुता, C. नैकषासुता, D. कै[probably a wrong reading for नै] कसीसुता for नैकसीसुता. D. स्थूललक्ष्यं for स्थूललक्षं. C. नृपेश्वरम् for नरेश्वरम्.

73. A. B. चिच्छेद for चकर्त. D. °विद्रावणात् for °विद्रवणात्.

74. D. reads the following for our text:—वर्षयति तदाहूते क्षुरप्रप्रकरं बलम् । शस्त्रैर्भ्रातृद्वये क्षिप्रमपावरिष्ट राघवौ. Agreeing with the Sinhalese edition.

76. A. द[दा ?]ण्डाजिनिकं, D. दम्भाजीविकं for दम्भाजीवकं. We with B. C. Excepting A. none of our Mss. or even the printed editions support this reading. We can, therefore, hardly believe in the genuineness of this solitary varient given by a single Ms.

भूमव्याहृतराजन्यो वर्णलिङ्गी निशाचरः ।
उग्ररूपो निजं घोरं रूपं प्रादुरवीभवत् ॥ ७७ ॥

दशानामस्य शिरसामुग्रतेजस्कमाश्रयम् ।
पश्यन्ती मैथिली भीत्या रूपधेयमकम्पत ॥ ७८ ॥

प्रदीपमिव तं द्रष्टुं नात्यासन्नं शशाक सा ।
असोढमरुतं तेजःपरिष्कृतदशाननम् ॥ ७९ ॥

रामारत्नमसौ रामनामाक्रन्ददिदं वचः ।
जगाद जगदीशस्य क्षेपदुष्टं क्षपाचरः ॥ ८० ॥

सारङ्गाक्षि शरस्तस्य केवलं तु खरे खरः ।
दूषणे दूषणो भद्रे न त्रिलोक्या विभौ रणे ॥ ८१ ॥

लब्धाभया बलनिरीक्षणदौहृदेन
द्वारे स्थिता निजपुरप्रवरस्य सिद्धाः ।
दृष्टा मया सुरपुरं व्रजता कटाक्षै-
रैरावणद्विपमतेन सहासगर्वम् ॥ ८२ ॥

अन्यायितोऽहमहमप्यनुवृत्त्य सेवां
निर्जीविको मम हृतं भवनं पिशाचैः ।
इत्युन्नदन् सुरगणः सह लोकपालैः
राजाङ्गने भ्रमति मत्प्रतिहारमेत्य ॥ ८३ ॥

---

77. A. B. वर्णिलिङ्गी for वर्णलिङ्गी. C. क्षपाचरः for निशाचरः.

79. A. B. C. तेजःपरिष्कृतदशाननम्, D. तेजः परिष्कृतदशाननम्. We with A. B. C. The reading of the Ms. D. agrees with the Calcutta edition.

81. A. B. मयि for रणे.

82. B. °दौर्हदेन, C. °दोह्रदेन, D. °दोहलेन for °दौहृदेन. D. ऐरावत° for ऐरावण°

83. D. राजाङ्गणे for राजाङ्गने.

स्पष्टोत्पिष्टबृहत्त्रिविष्टपबलं बाहुं वहुक्षोभित-
क्ष्मापातालतलं तलेन दलितश्वेताचलेन्द्रं मम ।
नो वाञ्छत्युपधानभतमवले धन्या सुरस्त्रीषु का
तल्पेऽनल्पपिकल्पजल्पमधुरक्रीडारसे सेवितुम् ॥ ८४ ॥

उर्वश्या परिवीजनेषु मधुरं नृत्यं यथा लीलया
तन्वन्त्या जितशारदेन्दुकिरणच्छायोल्लसच्चामरम् ।
आसज्य स्वयमङ्गदस्य शिखरे निर्मोकयन्त्या पुनः
स्नेहस्विन्नविवेपमानकरया सोऽयं भुजः स्पृश्यते ॥ ८५ ॥

एकस्मिन्शयने मया मयसुतामालिङ्ग्य निद्रालया-
मुन्निद्रं शयितेन मच्चरणयोः संवाहनव्यापृता ।
पादाग्रेण तिलोत्तमा स्तनतटे सस्नेहमापीडिता
हर्षावेशसमर्पितानि पुलकान्यद्यापि नो मुञ्चति ॥ ८६ ॥

अक्षान् दीव्यति दानवेन्द्रसुतया सार्धं स्मरार्ते मयि
क्रीडायत्नपरिश्रमः पण इति श्रुत्वा गतासह्यताम् ।
मत्तो मन्मथवस्तुसंहितविधौ वृद्धौ विवृद्धस्पृहा
द्यूतं कारयति प्रयोगचतुरा रम्भोरु रम्भाद्वया ॥ ८७ ॥

सर्वस्वर्गवराङ्गनाधृतिहाति प्रेमप्रधानं मयि
त्रैलोक्याधिपतौ निधाय हृदयं याया जगत्पूज्यताम् ।
नारीमाश्रयसंपदेव नयति श्रेयस्करीमुन्नतिं
मान्या मानिनि कस्य धूर्जटिजटाजुष्टा न जह्नोः सुता ॥८८॥

---

84. D. °व्हत्त° for °बृहत्त.° C. °त्रिपिष्टप° for °त्रिविष्टप.°

85. A. B. omit लीलया.

86. A. B. °समुत्थितानि for °समर्पितानि.

87. C. अक्षैर्दीव्यति for अक्षान् दीव्यति. D. प्रणयति for पण इति. Agreeing with the Sinhalese edition.

88. C. गच्छेः for यायाः.

हस्तौ पल्लवकोमलौ करयुगेनादाय वासः शनै-
रन्येन व्यपनीय पाणियुगलेनामृश्य काञ्च्यास्पदम् ।
मय्यालिङ्गति बाहुभिः सुबहुभिः शेषैर्विलक्षस्मित-
ज्योत्स्नासेकमनोहराधरपुटं वक्त्रं स्वयं दास्यसि ॥ ८९ ॥

इत्युक्त्वादाय रक्षःपतिरवनिसुतामुत्प्लुतो मीनजालै-
श्चित्रं व्योमाम्बुराशिं घनपवनरयास्फालगुञ्जद्घनोर्मिम् ।
पोतेनेव प्रकम्पध्वनिनिवहमसौ बिभ्रता पुष्पकेण
स्फूर्जत्सीतेन यात्रामनुपहतजवव्यापिनीमाललम्बे ॥ ९० ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमार-
दासस्य कृतौ सीताहरणो नाम दशमः सर्गः ॥

NOTES.

CANTO I.

जानकीहरणम्, Expl:—जानक्याः हरणं वर्ण्यते यस्मिंस्तत् काव्यं, *i. e.* जानकीहरणमधिकृत्य कृतं काव्यं जानकीहरणं, 'making the abduction of जानकी, Rāma's beautiful wife,' the subject of his poem. *Cf.* Pāṇi. IV. 3. 87. "अधिकृत्य कृते ग्रन्थे." An affix comes after a word in the 2nd case in construction, in the sense of, 'made in relation to any subject' when the thing made is a 'book'. And the Vártika thereon, "लुबाख्यायिकाभ्यो बहुलम्" for the elimination of the *Taddhita* affix अण्. A classical poem in twenty five cantos (the last ten are missing for ever) by Kumāradása a poet of Ceylon. It is one of the Mahákávyas which is thus defined:—सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः । सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः । एकवंशभवा भूपाः कुलजा बहवोऽपि वा । शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते । * * * इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥ See also काव्यादर्श, Bibli. Ind. series, p. 16 verses 14-19.

St. 1. आसीत् Construe अतिभोगभाराद् दिवः अवन्यां अवतीर्णा दिव्या नगरीव समृद्ध्या पुरां परार्ध्या क्षत्रानलस्थानशमी अयोध्येति पुरी आसीत्. अवन्यां, Expl:—अवति, अव्यते वा इत्यवनी [illegible]यां, 'On the earth.' अतिभोगभारात्—Analyse अतिशयितो भोगानां भार[illegible]स्मात्, 'From excessive or extraordinary load or burden of (multifarious) articles of enjoyment.' दिव्या, Expl:—दिवि भवा दिव्या, 'celestial.' 'Heavenly.' क्षत्रानलस्थानशमी—Analyse क्षत्रः अनल इव क्षत्रानलः तस्य स्थानं या शमी वृक्षविशेषः तद्वदित्, 'Like a S'amí tree, an asylum or abode of fire of क्षत्र race'. वह्नित्रत् प्रदीप्तक्षत्रियाणां शमीवाश्रयभूता इत्यर्थः । The S'amí tree supposed to contain fire is a well known fact to be often met with in Sanskrit literature. शम्या अग्न्याश्रयत्वं लोके सुप्रसिद्धं. Or it may be analysed as, यद्वा । क्षत्ररूपानलस्य क्षत्रियरूपवह्नेः आश्रयभूतशमीरूपायोध्येति, 'Ayodhyá wearing the form of शमी which was an asylum or abode of the fire in the form of the क्षत्रिय race.' *Cf.* R. III. 9. "शमीमिवाभ्यन्तरलीनपावकां." समृद्धिः Expl:—संपूर्णा ऋद्धिः समृद्धिः, or सम्यगतिशयेनर्द्धिः समृद्धिः 'Thorough or great prosperity.' अयोध्या *f.*—The modern Oude. The capital of इक्ष्वाकु the founder of the solar dynasty and afterwards of almost all

kings of that line. It is one of the seven sacred cities of the A'ryas. They are:—" अयोध्या मथुरा माया काशी कांचिरवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः." The exact site of this ancient capital has not yet been discovered by the archæological surveyors. The metre of this canto is उपजाति, a mixture of इन्द्रवज्रा and उपेन्द्रवज्रा. It is thus defined:—"अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इत्थं किलान्यस्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम." In the odd feet the gaṇas are:—त त ज ग ग and in the even ज त ज ग ग. अतिभोगभाराद् दिवः अवन्यामवतीर्णा दिव्या नगरीव, 'Like a celestial city which had come down from heaven to the earth on account of excessive (or extraordinary) load or burden of (multifarious) articles of enjoyment,' (i. e. thrown down under the unbearable load of various articles of enjoyment). समृद्ध्या पुरां परार्ध्या क्षत्रानलस्थानशमी अयोध्येति पुरी आसीत्,—'There was a city of the name of अयोध्या, the most excellent of the towns by reason of its prosperity, resembling a शमी tree, an asylum or abode of the fire of the क्षत्र race'.

St. 2. यत्—Construe यत्सौधभृंगारसरोजरागरत्नप्रभाविच्छुरितः पौरांगनावक्त्रकृतावमानः शशांको रोषाद् लोहितत्वं जगाम इव. यत्सौध°—Analyse यस्याः अयोध्यायाः सौधानां उपरि ये भृंगाराः कनकालुकाः तेषु (खचितानां) सरोजरागरत्नानां पद्मरागाणां प्रभाभिः कान्तिभिः विच्छुरितः, 'Overspread with splendour of rubies set on the golden pitchers placed on the terraces of its palaces'. पौरांगना°—Analyse पुरे भवाः पौरास्तेषामंगनानां योषितां वक्त्रैर्मुखैः कृतोऽवमानो यस्य तथोक्तः शशांकः, 'Dishonoured or put to shame by the (exquisitely beautifnl) faces of the ladies of the citizens'. यत्सौधभृंगारसरोजरागरत्नप्रभाविच्छुरितः पौरांगनावक्त्रकृतावमानः शशांकः रोषाद् लोहितत्वं जगाम इव—'Being slighted by (the transcending beauty of the) faces of the ladies of the citizens the moon, covered over (or overspread) with splendour of rubies set on the golden pitchers placed on the terraces of its palaces, became reddish-pale as if from anger' (i. e. with the feeling of jealousy).

St. 3. कृत्वापि—Construe समृद्ध्या सर्वस्य मुदं कृत्वा अपि कांचनतोरणस्थरत्नांशुभिर्भिन्नतमिस्रराशिः या निशासु अभिसारिकाणां हर्षाय [पर्याप्ता] नाभूत्। अभिसारिकाणां—'To women who meet their lovers by assignation'. 'To women who go to meet their lovers or keep an assignation'. Expl:—अभिसरन्ति नक्तं प्रियपार्श्वे स्वेच्छया व्रजन्तीति. The word is thus defined:—" या दूतिकागमनकालमपालयन्ती लौल्येन सा स्मरजरार्तिपिपासितेव। निर्याति वल्लभजनाधरपानलोभात् सा कथ्यतेकविवरैरभिसारिकेति।" "अभिसारयते कान्तं या मन्मथवशंवदा। स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका". कांचनतोरण-

स्थरत्नांशुभिः Analyse कांचनस्य तोरणानि कांचनतोरणानि तत्रस्थाः ये रत्नानां अंशवः तैः, 'By means of the rays of jewels inlaid in golden-arches.' भिन्नतमिस्रराशिः—Analyse भिन्ना तमिस्राणां राशिर्यया, 'Dissipated the mass of darkness'. समृध्द्या सर्वस्य मुदं कृत्वा अपि अभिसारिकाणां हर्षाय नाभूत्—'Though giving joy to every one by its prosperity, the city did not bring (complete) delight to the अभिसारिका, since it dissipated the mass of darkness by means of the rays of jewels inlaid in golden arches at (every) night'.

St. 4. चीनांशुकैः—Construe या अभ्रलिहां गृहाणां उदग्रशृंगाग्रभोगापहितैः चीनांशुकैः विटंककोटिस्खलितेन्दुसृष्टनिर्मोकपट्टैरिव बभासे. चीनांशुकैः—Analyse चीनानां अंशुकानि चीनांशुकानि तैः 'By reason of the pieces of silk-woven cloth of China'. The Indian A'ryás, it is reported, had an early communication with the Chinese, Arabs, Greeks and other foreign peoples. The Commercial intercourse between these foreign countries and India can positively be traced to B. C. 1500 or even earlier'. अभ्रलिहां—Analyse अभ्राणि लिहन्तीति अभ्रलिहः तेषां, 'Sky-licking'. उदग्र°—Analyse उदग्राणि च तानि शृंगाणि च तेषां अग्रभागेषु उपहितैः, 'Placed on the foremost parts of the lofty summits'. विटंक *m. n.* Expl:—विशेषेण टंक्यन्तेऽत्र। "टकिबन्धने" (चु. प. से.) "हलश्च" (३-३-१२१) इति घञ्. Derived from टक् (टंकू) *vt.* 10. U. 'to bind.' It means, 'Dove-cot,' 'a wooden aviary built on the top of a house,' (काष्ठादिरचितपक्षिगृहस्य), 'the loftiest point.' विटंककोटि°,–Analyse विटंकानां कपोतपालिकानां कोटयः ताभिः स्खलितो यः इन्दुश्चन्द्रः तेन सृष्टाः विसृष्टाः निर्मोकपट्टाः तैः तादृशैः, 'As if they were the stripes of cast-off skin abandoned by the moon which stumbled over the piercing points of the dove-cots.' The idea of the moon being obstracted in his heavnley course by the loftiest points of sky-licking palaces is often met with in the Champûs, Mágha and other artificial poems. या बभासे—'The city shone forth with its sky-licking palaces, on the foremost parts of the lofty summits of which were fixed the pieces of silk-woven China-cloth, as if, they were the stripes of cast off skin abandoned by the moon which stumbled over the piercing points of dove-cots (built on them).'

St. 5. दिदृक्षुः Construe यत्खातहंसः सरसीमन्तर्दिदृक्षुर्नभ्रमलंघ्यं समुदीक्ष्य दृढकौञ्चकुञ्जभागच्छिदो भार्गवमार्गणस्य सस्मार नूनं. अलंघ्यं Expl:—लंघितुमशक्यं अलंघ्यं, 'Insurmountable.' 'Impassable.' 'Difficult to be crossed.' दिदृक्षुः Expl:—द्रष्टुमिच्छुः दिदृक्षुः, 'Wishing to see.' 'Longing to see.' यत्खातहंसः Analyse यस्याः खातस्य हंसः यत्खातहंसः 'A swan dabbling

in the moat.' दृढकौञ्च'—Analyse कौञ्चस्य कुञ्जभागः कौञ्चकुञ्जभागः । दृढश्चासौ कौञ्चकुञ्जभागश्च दृढकौञ्चकुञ्जभागः तस्य छिदः दृढकौञ्चकुञ्जभागच्छिदः, 'Breaking asunder the hard portion of the caves of the कौञ्च mountain.' कौञ्च or क्रौञ्च *m.* 'A mountain, part of the Hima'laya range, situated in the eastern part of the chain on the north of Asam. भार्गवमार्गणस्य—Analyse भार्गवस्य परशुरामस्य मार्गणः सायकः तस्य तादृशस्य, 'An arrow of Paras'uráma.' An object to सस्मार. Mark the root स्मृ governing genitive object. भार्गव, otherwise called परशुराम, was the son of the sage जमदग्नि, and was according to the legend the sixth incarnation of Vishṇu. While young he cut off the head of his mother Reṇuká at the desire of his father. While he was away from home his father was slain by the sons of Kártavîrya. Paras'uráma, to avenge his father's unmerited fate, vowed to extirpate the Kshatriyas and "thrice seven time did he clear the earth of the regal race." He was afterwards defeated by Ráma and is believed to be still practising austerities on the Mahendra mountain. Being jealous of Kártikeya he is said to have once pierced the क्रौञ्च mountain right through with his arrows. He is one of the seven men that come under the category of चिरजीविन्. "अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः." यत्खातहंसः सरसीमन्तर्दिदृक्षुर्वप्रमलंघ्यं समुदीक्ष्य—'A swan, dabbling in the moat outside the city wished to see the lake lying within (it), but seeing that the rampart was hard to be crossed, thought of Paras'uráma's arrow breaking asunder the hard portion of the caves of the कौञ्च mountain.'

St. 6. स्वबिम्बं—Construe यस्यां गृहाणां आदर्शभित्तौ ततं स्वबिम्बमालोक्य रथ्यासु कृतवन्ध्यघाताः रदिनः अरिद्विपानां मदामोदं प्रमाणं चक्रुः. स्वबिम्बं—Analyse स्वस्य बिम्बं स्वबिम्बं तत् 'One's own reflected image.' 'Reflected shadow.' आदर्शभित्तौ—Analyse आदर्शवत् भित्तिः आदर्शभित्तिः तस्यां । यन्त्रादिकृत्रिमसाधनैः निघृष्य आदर्शवत् संस्कृतायां उपलभित्तौ, 'The smooth glossy stone-wall receiving reflected images like a mirror.' The stones of the walls were given a high polish by rubbing their surface with sand-papers and such other means so as to receive reflected images on them. कृतवन्ध्यघाताः—Analyse कृताः वन्ध्यघाताः येषां ते, 'Whose blows were made ineffectual or useless'. प्रमाणं—'An authoritative guide.' 'An authoritative standard.' (इयत्ता). मदामोदं—Analyse मदस्य आमोदः मदामोदः तं, 'Diffusive perfume of the juice exuding from the temples of elephants when in rut.' For the

construction *Cf.* R. II. 46. " अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्." अरिद्विपानां—Analyse अरयश्च ते द्विपाश्च अरिद्विपाः तेषां अरिद्विपानां प्रतिकुंजराणां, ' Of the hostile elephants.' रदिनः अरिद्विपानां मदामोदं प्रमाणं चक्रुः, 'Having seen their own images reflected (*lit.* stretched on) in the mirror-like glossy walls of its mansions, the elephants, whose blows (to the hostile elephants) were made ineffectual, made the diffusive perfume of the rutting-juice of rival elephants an authoritative guide (for them) in the streets.' The elephants began to strike blows on their own images reflected in the glossy walls taking them to be the rival elephants. But when their blows turned ineffectual they thought there were no hostile elephants; because their own reflected images (which they took for real elephants) did not give out the diffusive perfume which generally exudes from the temples of such wild elephants.

St. 7. लग्नैकभागं—Construe यत्र सितहर्म्यश्रृंगे लग्नैकभागं मन्देन समीरणेन विकृष्य दीर्घीकृतं बालमृणालशुभ्रमभ्रं ध्वजकृत्यं करोति. लग्नैकभागं—Analyse लग्नः एकभागो यस्य तद् लग्नैकभागं, ' A portion of which clung to or stuck to.' सितहर्म्यश्रृङ्गे—Analyse हर्म्यस्य श्रृंगं हर्म्यश्रृंगं । सितं च तद् हर्म्यश्रृंगं च सितहर्म्यश्रृंगं तस्मिन् तादृशे, ' On the white top of a palace.' बालमृणालशुभ्रं—Analyse बालं च तद् मृणालं च बालमृणालं तद्वत् शुभ्र, ' White like a fresh lotus. ' ध्वजकृत्यं—Analyse ध्वजस्य कृत्यं ध्वजकृत्यं, ' Office or function of a flag.' यत्र अभ्रं ध्वजकृत्यं करोति—' Where a cloud, white like a fresh lotus, with a portion clinging to the white top of a palace, being dragged out by a gentle breeze and thus made long, performs the function of a flag.'

St. 8. प्रवालशीर्षा—Construe यस्यां प्रवालशीर्षाः मुक्तामयांगावयवाः सुवर्णं वदनं वहन्त्यः विधात्रा विहिताः युवतयः वपुषः प्रकर्षमागुः. प्रवालशीर्षाः Analyse प्रवालं (प्रवालं) कमनीयकेशपाशयुक्तं शीर्षं मूर्धा यासां ताः, ' Bearing on their head a charming band of hair.' As applied to रत्न, प्रवाल means 'coral,' प्रवालाः विद्रुमाः शीर्षाणि यासां ताः, ' Having their heads made of corals' i. e. having their heads decoarted with corals. मुक्तामयांगावयवाः —Analyse मुक्तामयाः आमयेन रोगविशेषेण मुक्ताः अंगावयवाः प्रत्यवयवाः अंगोपांगानि वा यासां ताः, 'Having all their limbs free from disease,' or 'having all their limbs and minor limbs free from disease.' अंगानां पाणिपादादीनां अवयवाः अंगुल्यादयः तेषां रोगाभावे अंगानामपि नैरोग्यमापन्नं. As applied to रत्न, मुक्तामयाः मैक्तिकविकाराः मुक्ताप्रचुराः वा अंगावयवाः यासां ताः, ' Having their limbs full of pearls ' i. e. having all their limbs decorated with pearls. सुवर्णं—Analyse शोभनो वर्णो यस्य तत् सुवर्णं,

सुवर्णं वदनं, 'Faces bearing a lovely complexion.' As applied to रत्न, सुवर्णं वदनं means, 'golden faces.' वपुषः प्रकर्षमापुः —'Secured bodily excellence.' *Cf.* R. III. 34. " वपुःप्रकर्षादजयद्गुरुं रघुः." युवत्यः रत्नैरिवापुर्वपुषः प्रकर्षम्—' The young women made by the Creator in this city, who were wearing heads on which were charming bands of hair, had all their limbs free from disease and possessed beautiful faces, attained bodily excellence like jewels.'

St. 9. आलिंग्य—Construe तुंगं वडभीविटंकमालिंग्य पुष्करेषु विश्राणितात्मध्वनि सितं शारदमभ्रवृन्दं यत्सौधकान्तेः संविभागमिव वव्रे. वडभीविटंक—Analyse वडभीनां विटंको वडभीविटंकः तं, ' The loftiest point of the top-room.' विश्राणितात्मध्वनि—Analyse विश्राणितो दत्तः आत्मनो ध्वनिः गर्जितं येन तत् ' Have their thunders transferred to.' यत्सौधकान्तेः —Analyse यस्याः सौधानां कान्तिः यत्सौधकान्तिः तस्याः तथोक्तायाः, ' The brightness or splendour of its palaces.' शारदं Expl:—शरदः इदं शारदं, ' Autumnal'. अभ्रवृन्दं—Analyse अभ्राणां वृन्दं अभ्रवृन्दं, ' A cluster of clouds.' वव्रे—Derived from the root वृ *vt.* 9. A. सेट्, ' To accept ', ' to resort to ', ' to assismilate into &c. ' शारदमभ्रवृन्दं यत्सौधकान्तेः संविभागमिव वव्रे—' Having clasped the lofty points of the top-rooms of palace-turrets, and having transferred (or mixed) its thunders to those of the पुष्कर drums, the white antumnal cluster of clouds assimilated (*lit.* accepted or resorted to) itself, as it were, into a portion of the beauty of the palaces.' The poet means to say that the clouds themselves became a decorated upper story of the palaces at Ayodhyá.

St. 10. आसन्न°—Construe यस्यां आसन्नजीमूतघटासु कांचनपिंजरासु पताकासु तता विद्युन्निभा विवृत्तिः शिखिनामुदग्रं तोषं मुहुस्ततान. आसन्नजीमूतघटासु—Analyse आसन्नाः समीपवर्तिनो जीवनानां मूता बंधा आसन्नजीमूताः निकटमागता मेघास्तेतां घटाः पंक्तयो यासु तासु आसन्नजीमूतघटासु, ' To which the lines of clouds had come close.' विद्युन्निभाविद्युत्समा, 'Like the flash of lightning. ' कांचनपिंजरासु—Analyse कांचनवत् पिंजरः पीतरक्तवर्णा यासां ताः तासु तथोक्तासु, ' Having a tawny-brown (or reddish-yellow) colour like that of gold.' विवृत्तिः—' Turning round,' 'revolution,' 'rolling.' तताविस्तृता, 'Spread on,' 'stretced,' 'manifested. ' पताकासु तता विवृत्तिः शिखिनामुदग्रं तोषं ततान—' In which the rolling to and for that is often manifested on the golden tawny-brown flags with (a back-ground of) the lines of clouds impending near, excessively heightened the joy of peacocks.'

St. 11. यत्र—Construe यत्र क्षतोद्बृंहिततामसानि रत्नाश्मनीलोपलतोरणानि निशासु भ्रमतो नारीजनस्य विभाभिः क्रोधप्रमोदौ विदधुः. क्षतोद्बृंहिततामसानि,

Analyse क्षतानि च उद्बृंहितानि च क्षतोद्बृंहितानि तादृशानि तामसानि यैस्तानि 'The darkness whereof was dissipated and grown respectively.' Dissipated by रक्ताश्मभिः and grown by नीलोपलैः, and hence the rise of क्रोध and प्रमोद in succession. रक्ताश्मनीलोपलतोरणानि—Analyse रक्ताश्च ते अश्मानश्च रक्ताश्मानः। नीलाश्च ते उपलाश्च नीलोपलाः। रक्ताश्मनीलोपलानां तोरणानि रक्ताश्मनीलोपलतोरणानि, 'Arches or arch-gates built of red and black stones (or marbles).' क्रोधप्रमोदौ—Analyse क्रोधश्च पमोदश्च क्रोधप्रमोदौ 'Anger and delight.' नारीजनस्य—Analyse नार्य एव जनो नारीजनः तस्य, 'To the multitude of women.' विभाभिः 'By means of the bright splendour.' यत्र रक्ताश्मनीलोपलतोरणानि विभाभिर्नारीजनस्य क्रोधप्रमोदौ विदधुः 'Where, by means of their bright splendour, the arch-gates built of red and black marbles, the darkness whereof was dissipated and grown respectively, provoked anger and gave delight to multitudes of women wandering at night.'

St. 12. तत्र Construe प्रभावैर्भानुनिभः क्षत्रान्वयैः अलंघ्यं अन्यक्ष्मानाथमानं [अत एव] जयमानं ओजो बिभ्रत् पंक्तिरथाभिधानो भुवो भर्त्ता तत्र अभवत्. पंक्तिरथाभिधानः Analyse पंक्तिरथो दशरथोऽभिधानं यस्य सः, 'Having the name of दशरथ.' An epithet of दशरथ, *Cf.* R. IX 74. "कृतवान्पंक्तिरथो विलंघ्य यत्". भानुनिभःसूर्यसमः, 'Resembling the sun.' 'Like the sun.' अलंघ्यं Expl:—लंघितुमशक्यं अलंघ्यं, 'Insurmountable', 'impassable,' 'inviolable'. अन्यक्ष्मानाथमानं—Analyse अन्येषां क्ष्मा अन्यक्ष्मा। अथ वा। अन्या चासौ क्ष्मा च अन्य क्ष्मा। तां नाथति तच्छीलं, 'Having a habit or disposition of becoming master of the land under the sway of other kings or habituated to become the master of the land other than his own.' जयमानंजयशीलं, 'Given to conquer'. 'Habituated to conquer.' In the epithets अन्यक्ष्मानाथमानं and जयमानं the termination that is employed is चानश्. "ताच्छील्यवयोवचनशक्तिषु चानश्' Pâṇi. III-2-129. 'The affix चानश् comes after a verb in expressing 'habit,' 'standard of age' and 'ability.' The word ताच्छील्य means 'habit' or 'disposition'; वयः means the condition of body such as infancy, youth &c. शक्ति means 'capacity to do a thing.' As भोगं भुंजानः 'habituated to enjoy;' कवचं बिभ्राणः 'Wearing an armour (of the age at which armour may be worn)'; शत्रुं निघ्नानः 'able to destroy his foe.' क्षत्रान्वयैरलंघ्यं जयमानमोजो बिभ्रत्—'In it was a lord of the earth by name दशरथ, resebling the sun, by reason of his majestic grandeur, and holding an everconquering power inviolable by (other) princes born in the क्षत्रिय race,—the power habituated to rule over the land under the sway of other kings.'

St. 13. अखण्डमानः Construe मनुजेश्वराणां मान्योऽखण्डमानो गुणज्ञो राजा मनोज्ञैर्गुणजैः शरदभ्रशुभ्रैर्यशोभिर्दिशो रजतावदाताश्चकार. अखण्डमानः Analyse न खण्ड; अखण्डः । अखण्डः मानः यस्य स अखण्डमानः, 'Of an unimpeachable honour (character).' मनुजेश्वराणां—Analyse मनुजानां ईश्वरः मनुजेश्वरः तेषां, 'To the lords of men.' मनुजेश्वराणां मान्यः Adorable to the lords of people. *Cf.* R. II. 44. "मान्यः स मे स्थावरजंगमानां.' गुणज्ञः Analyse गुणान् जानानीति गुणज्ञः, 'knowing or judging of merits'. 'Appreciating merits.' गुणजैः Analyse गुणेभ्यः जातानि तैः, 'Born of merits.' 'Sprung from merits.' शरदभ्रशुभ्रैः—Analyse शरदः अभ्राणि शरदभ्राणि तद्वत् शुभ्राणि तैः तादृशैः, 'White like autumnal clouds.' रजतावदाताः—Analyse रजतवत् अवदाताः रजतावदाताः, 'White like silver.' राजा दिशो रजतावदाताश्चकार,—'That king of an unimpeachable honour, adorable to the lords of people, judging of merits, made the quarters white like silver with his fame agreeable to the mind, as sprung from his merits and looking bright like the autumnal clouds.'

St. 14. जिगीषुः—Construe अभ्यस्तसमस्तशास्त्रज्ञानोपरुद्धेन्द्रियवाजिवेगः सः जिगीषुः अजनन्दनः आजौ अजय्यान् अन्तः षड्द्विपः पूर्वं विजिग्ये. अभ्यस्तसमस्त°—Analyse अभ्यस्तानि समस्तानि शास्त्राणि तेषां ज्ञानेन उपरुद्धाः इन्द्रियरूपाः ये वाजिनः तेषां वेगो येन स अभ्यस्तसमस्तशास्त्रज्ञानोपरुद्धेन्द्रियवाजिवेगः, 'By whom the speed of horses in the form of his organs of sense was obstructed by the wisdom accruing from his study of all S'ástras.' अजय्यान्—Analyse जेतुमशक्यान् अजय्यान्, 'Difficult to be overcome.' अजनंदनः—Analyse अजस्य नन्दनः, 'Aja's son.' अन्तः—'Belonging to the inner organs.' *Cf.* Ragh XVII. 45. "अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः । अतः सोऽभ्यन्तरान्नित्यान्षट्पूर्वमजयद्रिपून् ॥" षड्द्विषः—Analyse षट् च ते द्विषश्च तान्, 'Six enemies,'=षड्वर्गः viz. काम 'desire,' क्रोध 'wrath, लोभ 'covetousness,' मोह 'bewilderment,' मद 'pride,' and मत्सर envy.' *Cf.* Bhatti. I. 2. "व्यजेष्ट षड्वर्गमरंस्त नीतौ." Kirát. I. 9. "कृतारिषड्वर्गजयेन." Also Kámandaka's Nítisára I. 55. "कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा। षड्वर्गमुत्सृजेदेनमस्मिन् त्यक्ते सुखी नृपः॥ आजौ अजय्यान् षड्द्विषः असौ पूर्वं विजिग्ये—'That son of Aja, whose speed of horses in the form of organs of sense was obstructed by wisdom accruing from his study of all S'ástras, striving to conquer (the regions) first overthrew the six enemies lying within (his mind) and hard to be put down in an open battle.'

St. 15. बलिं—Construe बलिप्रतापापहविक्रमेण त्रैलोक्यदुर्लंघ्यसुदर्शनेन अनन्तभोगाश्रयिणापि तेन पुरुषोत्तमेनालसत्वं न तेने. बलिप्रतापापहविक्रमेण—Analyse

बलिः करः उपहारश्च तेन प्रकृष्टतापानां प्रजादिकष्टानां अपहन्ता शमकः विक्रमः पराक्रमो यस्य तेन तादृशेन, 'Who had a power to tranquilize (*lit.* to remove) the most painful effects (or hardships) caused by his taxations (or presents given to him)'. As applied to पुरुषोत्तम or विष्णु the compound may be analysed as:–प्रकर्षण तापः प्रतापः तं अपहन्तीति प्रतापापहः। बलिर्दैत्यस्तस्य प्रतापापहः तापनाशनः विक्रमः पराक्रमः यस्य स तेन तादृशेन, 'Whose striding over was able to destroy the power of Bali'. बलि *m.*—A mighty demon, son of विरोचन and the grandson of प्रल्हाद. He conquered the gods who prayed to Vishṇu for succour. The latter was then born on the earth as Vámana and prayed Bali to give him as much earth as he could step over in three steps. This request being granted Vishṇu assumed a mighty form and covered the earth by the first step and the heaven by the second. No room being left for the third, Vàmana planted his foot on Bali's head and sent him down to Pátala. त्रैलोक्यदुर्लंघ्यसुदर्शनेन–Analyse त्रैलोक्येऽपि लोकत्रयेऽपि दुर्लंघ्यं लंघितुं दुष्करं सुदर्शनं स्वसाक्षात्कारो यस्य तेन तादृशेन 'Whose presence cannot be avoided or transgressed even in three worlds'. So awe-inspiring was his presence. As applied to पुरुषोत्तम or विष्णु the expression may be analysed as:–त्रलोक्येऽपि लोकत्रयेऽपि लंघितुं धर्षितुं दुष्करं सुदर्शनं नाम विष्णोश्चक्रं यस्य तेन तथोक्तेन, 'He whose Sudars'ana weapon was hard (or difficult) to be braved even in three worlds'. अनंतभोगाश्रयिणा—Analyse अनन्तो निरतिशयो भोगः सुखास्वादनं तदाश्रयते इति अनन्तभोगाश्रयी तेन तथोक्तेन, 'Clung (or given up) to the unsurpassed pleasures.' As applied to विष्णु it may be analysed as, अनन्तः शेषो नाम नागस्तस्य भोगः (आभोगः) देहस्तं आश्रयते इति अनंतभोगाश्रयी तेन शेषशायिना, 'One who lies on the body of a serpent named अनंत'. पुरुषोत्तमेन—Analyse पुरुषेषु उत्तमः पुरुषोत्तमः तेन, 'Best of men'. As applied to विष्णु, पुरुषोत्तम means, 'the Supreme Being.' तेन पुरुषोत्तमेनालसत्वं न तेने—'Though given up to the unsurpassed pleasures (of the world), though with such a presence that it could not be avoided even in three worlds, and though possessed of a power to tranquilize the hardships (of his subjects) caused by his taxations, that best of men did not (at all) give scope to idleness'.

St. 16. दण्डः Construe ततो भुवं जिगीषोस्तस्य विहितांगमर्दः कम्पं वितन्वन् तापैकहेतुर्दंडस्तीव्रो ज्वर इव त्रिदशाधिपस्यं दिशमाविवेश. विहितांगमर्दः Analyse विहितः कृतः अंगानां मर्दो येन तादृशः, 'Which has effected the crushing of bodily limbs'. As applied to ज्वर, it means 'producing a peculiar uneasy sensation in bodily limbs.' तापैकहेतुः Analyse तापस्य

एकहेतुः तापैकहेतुः, ' The sole object of torments.' As applied to ज्वर, it means 'the unique source of producing fever.' त्रिदशाधिपस्य—Analyse त्रिदशानां अधिपः त्रिदशाधिपः तस्य, ' Of Indra, the lord of thrice ten gods'. तस्य दण्डः त्रिदशाधिपस्य दिशं तीव्रो ज्वर· इवाविवेश—' The army of him, who was striving for conquest of the world, which was effecting the crushing of bodily limbs (or human frames), producing a tremor and was the sole object of torments, advanced to the eastern quarter like a fever of a violent type.'

St. 17. समुद्रं—Construe नितान्तसंतापितपूर्वकाष्ठः समुद्रमुल्लंघ्य गतः तदीयं तेजोऽभिधानः गुरुः अग्निराशिः कटाहे नृपं प्रोत्स्वेदयामास. अग्निराशिः Analyse अग्नेः राशिः अग्निराशिः, 'A heap of fire.' नितान्तसंतापितपूर्वकाष्ठः —Analyse नितान्ता संतापिता नितान्तसन्तापिता। नितान्तसंतापिता पूर्वकाष्ठा येन स नितान्तसंतापितपूर्वकाष्ठः, ' Which has exceedingly scorched up (or harassed, distressed) the eastern quarter.' कटाह *m.*—Name of an island probably the Katái of the Mahomedans or Chinese, in the Malay Archipelago near यवद्वीप or Java, Bali &c. अग्निराशिः कटाहे नृपं प्रोत्स्वेदयामास—'Under the title of his lustrous valour, a large heap of fire, which had (before) exceedingly scorched (or harassed) the eastern quarter (now) crossed the ocean and made the king to sweat in the continent of Katáha.'

St. 18. भुजंग°—Construe तेन नृवरेण भुजंगसंप्रार्थित सेव्यवेला कांचीगुणाकर्षितसार्थलोका कर्कशयत्नभोग्या दक्षिणा दिक् वेश्या इव भुक्ता. भुजंगसंप्रार्थितसेव्यवेला—Analyse भुजंगैः सर्पैः संप्रार्थिता सेव्यवेला मनोहरं समुद्रकूलं यस्याः सा, ' The beautiful or lovely strand of which was earnestly asked for (or prayed for) by serpents '. As applied to वेश्या the compound may be analysed as, भुजंगैः विटैः संप्रार्थिता सेव्यवेला रतिसमयः यस्याः सा, ' To whom an appointment of time for (Rati) pleasure was asked for by paramours '. कांचीगुणाकर्षितसार्थलोका—Analyse काञ्च्याः दक्षिणदिग्वर्तिन्याः पुर्याः गुणैः धर्मद्रविणसंव्यवहारादिभिः आकर्षिताः सार्थाः संघीभूताः (सप्रयोजनाश्च) लोकाः यस्यां सा, 'To which flocked a concourse of people being attracted by religious or trading purposes at कांची.' As applied to वेश्या the compound may be analysed as, कांचीगुणैर्मेखलादामभिराकर्षिताः सार्थलोका धनवन्तो यया सा, ' By whom rich people have been drawn by the string of her zone '. काञ्ची *f.*—' Name of a celebrated anceient city situated in the south of the Indian peninsula and one of the seven sacred cities of the Hindus; they are " अयोध्या मथुरा माया काशी कांचिरवंतिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ". कर्कशयत्नभोग्या—Analyse कर्कशयत्नैः खड्गादिभिः प्रखरोपायैः भोक्तुं

योग्या । अथ वा । स्वायत्तीकर्तुं योग्या, ' Tributes whereof were to be wrung out by having recourse to swords, ' or ' worthy of being subjugated by having recourse to swords '. As applied to वेश्या the compound may be analysed as, कर्कशयत्नैः निर्दयोपायैः भोक्तुं योग्या, ' To be enjoyed in a brutal manner. ' *Cf.* Vámana's काव्यालंकारसूत्रवृत्तिः, 4-3-7. " आकृष्टामलमण्डलाग्ररुचयः सन्नद्धवक्षःस्थलाः सोमाष्णो व्रणिता विपक्षहृदयप्रोन्माथिनः कर्कशाः । उद्वृत्ता गुरवश्च यस्य शमिनः श्यामायमानाननाः योधा वारवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥ " कर्कश *m.*—'A sword '. भोग *m.*—' Exacting tributes,' or 'enjoyments'. भोगः करग्रहः । अथ वा । रतिः तेन नृवरेण दक्षिणा दिक् वेश्येव भुक्ता—'Like a courtezan, the Southern Quarter was enjoyed by that lord of men, the tributes whereof were wrung out by having recourse to his sword, to which flocked a concourse of people being attracted by religious or trading purposes at काञ्ची, and the beautiful strand of which was earnestly sought after by serpents '. The poet means to say that the southern people made a strong opposition to his advancing forces, but seeing that they could not withstand the force of the pouring numbers of the enemies and their superior military tactics, they laid down their arms and submitted to the concqueror, king Das'aratha.

St. 19. विनिर्जितः—Construe युधि असुरासुप्रघसायुधस्य अस्य शरेण घातं लब्ध्वा विनिर्जितोऽपि मनस्वी यावनेन्द्रः आत्मानमन्यैरसमानमानं मेने. असुरासु°—Analyse असुराणां रक्षसां असवः प्राणाः तेषां प्रघसं प्रभक्षकं आयुधं यस्य स असुरासुप्रघसायुधः तस्य तादृशस्य, ' Whose weapon was voraciously devouring (or making an indiscriminate slaughter of) the lives of demons.' असमानमानं—Analyse न समानः असमानः । असमानो मानो यस्य स असमानमानः तं तथोक्तं, ' Whose sense of honour was unlike that of others,' ' whose sense of hounor was different from that of others (अन्यैः).' यावनेन्द्रः —Analyse यवनानां इन्द्रः यावनेन्द्रः, 'The leader of the Yavanas.' For Yavanas and Turushkas see our edition of Raghuvans'a, preface on the date of Kálida'sa; pp. 113-121 and further. यावनेन्द्रः आत्मानं अन्यैः असमानमानं मेने—' Having received a wound in a battle by an arrow shot by him, whose weapon voraciously devoured the lives of demons and though thus being completely vanquished, that proud leader of the Yavanas looked upon himself as one whose sense of honour was different from that of others.'

St. 20. तेजश्छलेन—Construe अथ तेजश्छलेन हुताशनेन श्रीवासरम्यं तुरुष्कं प्रदहन् [असौ] धूपैरिव आसक्तगतैर्यशोभिराशीयमन्तं सुरभीचकार. तेजश्छलेन—

Analyse तेजः छलो यस्य स तेजश्छलः तेन, Under the plea or semblance of lustrous or fiery energy.' श्रीवासरम्यं—Analyse श्रियो वासः श्रीवासः तेन रम्यः श्रीवासरम्यः तं, 'Pleasing or agreeable by having an abode of the goddess of wealth.' आसक्तगतैः —Analyse गतानि (गतान् देशान्) आसक्तानि आसक्तगतानि तैः तादृशैः, 'Attached or clung to the places behind (in its onward motion)'. आशीयं = दिक्संबंधि, 'Belonging or pertaining to a quarter.' आसक्तगतैर्यशोभिः धूपैरिव आशीयमन्तं सुरभीचकार– 'Consuming a Turkish king, inviting (or attractive) by his treasury, (*lit.* abode of wealth) by fire under the plea (or semblance) of his lustrous energy, he, like aromatic fumes, made the end of the quarter sweet-smelling by means of his fame, attached to the places already visited in its onward march (or motion).'

St. 21. परेषु°—Construe युधि अस्य [दशरथस्य] परेषुवात्यापरिवृंहितः क्रोधाभिधानश्चित्रभानुः रिपुकामिनीनामाताम्रनेत्रच्युतवारिवर्षैः शान्तिमानायि· परेषु°– Analyse इषूणां बाणानां वात्या इषुवात्या । पराणां शत्रूणां या इषुवात्या परेषुवात्या तया परिवृंहितः परिवर्धितः परेषुवात्यापरिवृंहितः, 'Swollen (*lit.* grown) by the storm (or volleys) of darts discharged by the enemies.' क्रोधाभिधानः—Analyse क्रोधः अभिधानं यस्य, 'Going by the name of wrath.' चित्रभानुः Expl:—चित्राः भानवोऽस्य, 'Possessing rays or sparks of variegated colour i. e. fire.' आताम्र°—Analyse आताम्राणि आरक्तानि नेत्राणि चक्षूंषि तेभ्यः च्युतानि गलितानि वारीणां बाष्पाणां वर्षाणि धाराः तैः तादृशैः, 'By means of showers of tears dropped down from their reddish eyes.' रिपुकामिनीनाम्—Analyse रिपूणां कामिन्यः रिपुकामिन्यः तासां 'Lovely fair ones of enemies.' रिपुकामिनीनामाताम्रनेत्रच्युतवारिवर्षैः शान्तिमानायि— 'In the battle the fire, going by the name of wrath, swollen (or terribly raged) by the storm (or volleys) of arrows discharged by his enemies, was quenched down by the showers of tears poured down from the reddish eyes of the lovely fair ones of the enemies.'

St. 22. तस्य--Construe आलोकभूमौ एकबाणासनभग्नशत्रोः तस्य चरणारविन्दे सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनान्यासेदतुः. एक°—Analyse बाणाः अस्यन्ते क्षिप्यन्ते अनेनेति बाणासनं धनुः । एकं च तद् बाणासनं च एकबाणासनं तेन भग्नः शत्रुर्येन स एकबाणासनभग्नशत्रुः तस्य तादृशस्य, 'Who has routed or vanquished the foe by a single bow.' आलोकभूमौ = आस्थानमण्डपे 'In the audience hall'. चरणारविन्दे—Analyse चरणौ एव अरविन्दे चरणारविन्दे or चरणौ अरविन्दे इव, 'Lotus-like feet (two)'. सर्व°—Analyse सर्वे च ते नरेन्द्राश्च सर्वनरेन्द्राः समस्तनृपाः तेषां मौलयो मुकुटाः तेषु यानि रत्नानि तेषां

प्रभैव आलक्तकमण्डनानि सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनानि, 'The decorations of lac made by the brightness of jewels set on the crowns of all kings.' तस्य चरणारविन्दे सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनान्यासेदतुः—' The lotus-like feet of him who had routed (or vanquished) the foe by a single bow received, in the audience hall, the decorations of lac made by the brightness of jewels set on the crowns of all kings'.

St. 23. लोकः Construe हारगौरे तदीये कीर्तिप्रताने [यशोनिचये] भुवि प्रविजृंभमाणे [प्रवर्धमाने सति] लोकः कुमुदमभिन्नकोशं निरीक्ष्य चंद्रोदयशंकितानि मुमोच. हारगौरे—Analyse हारवद् गौरः शुभ्रः हारगौरः तस्मिन्, 'White like a garland'. कीर्तिप्रताने—Analyse कीर्तिरूपः प्रतानः प्रचयः कीर्तिप्रतानः तस्मिन्, 'An unbounding expanse of his fame'. प्रविजृंभमाणे = प्रवर्धमाने, 'Rapidly expanding or spreading'. The epithet should be construed here as a predicate. अभिन्नकोशं—Analyse अभिन्नः कोशः यस्य तत्, ' With its cup (of a bud) not opened'. चंद्रोदयशंकितानि—Analyse चन्द्रस्य उदयः चन्द्रोदयः तस्य शंकितानि चन्द्रोदयशंकितानि, ' Doubt as regards the rise of the moon '. लोकः कुमुदमभिन्नकोशं निरीक्ष्य चन्द्रोदयशंकितानि मुमोच—'After having seen the buds of the moon-lotuses not burst open, the people left (all) doubts as regards the rise of the moon, when the unbounding expanse of his fame, white like a garland, was rapidly spreading over the land'. The bright splendour of his fame exactly looked like the moonlight to the naked eye and the people were led to think that that light was no other than the moonlight and hence they actually went to see whether the moon lotuses were opened.

St. 24. समस्त°—Construe तस्य उन्नतवृत्ति तेजः समस्तसामन्तनृपोत्तमांगान्यध्यास्य चूडागतपद्मरागरागच्छटाविस्फुरणच्छलेन जज्वाल. समस्त°—Analyse समस्ताश्च सामन्तनृपाश्च समस्तसामन्तनृपाः । उत्तमानि च तानि अंगानि च उत्तमांगानि । समस्तसामन्तनृपाणां उत्तमांगानि समस्तसामन्तनृपोत्तमांगानि, 'The highest or the chief part of the body of all vassal kings (i. e. their heads)'. उन्नतवृत्ति—Analyse उन्नता वृत्तिर्यस्य तत्, ' Of an elevated career '. ' Of a sublime or majestic character '. चूडा°—Analyse चूडागताः मौलिलग्नाः ये पद्मरागाः लोहितकाः तेषां रागच्छटानां रश्मिप्रवाहाणां । अथ वा । वर्णप्रसराणां विस्फुरणच्छलेन विस्फूर्तिच्छद्मना, ' under the plea (or semblance) of tremulous flashes proceeding from a stream of rays (or unimpeded course of bright colour) of the rubies set on their crowns.' तस्य तेजः चूडागतपद्मरागरागच्छटाविस्फुरणच्छलेन जज्वाल—' His fiery energy of a sublime character, having settled on the heads of all vassal kings, began to glow forth (or blaze up) under the

plea of tremulous flashes proceeding from a stream of rays of the rubies set on their crowns .'

St. 25. नरेन्द्रचन्द्रस्य—Construse महीमण्डलमण्डनस्य नरेन्द्रचन्द्रस्य तस्य यशोवितानज्योत्स्ना अरिनारीनयनेन्दुकान्तनिष्यन्दहेतुः [सन्] भुवनं ततान. नरेन्द्रचन्द्रस्य —Analyse नरेन्द्राणां चन्द्रः नरेन्द्रचन्द्रः तस्य, ' Of him who was the chief of kings.' यशोवितानज्योत्स्ना—Analyse यशोरूपं वितानं उल्लोचः यशोवितानं तस्य ज्योत्स्ना कौमुदी यशोवितानज्योत्स्ना, ' The moonlight proceeding from the expansive heavenly vault of his fame.' महीमण्डलमण्डनस्य—Analyse महीमण्डलस्य मण्डनं यस्मात् स महीमण्डलमण्डनः तस्य तादृशस्य, ' An ornament or decoration to the circumference of the earth or to the whole earth.' अरिनारीनयनेन्दुकान्तनिष्यन्दहेतुः—Analyse अरीणां वैरिणां नार्यः कामिन्यः तासां नयनान्येव नेत्राण्येव इन्दुकान्ताः चन्द्रकान्तमणयः तेषां निष्यन्दस्य प्रस्रवणस्य हेतुः, ' An object (or cause) of the flowing of the moon-gems consisting of (or made of) the eyes of the young women of his enemies.' तस्य यशोवितानज्योत्स्ना भुवनं ततान,—'The moonlight proceeding from the expansive heavenly vault, made out of fame, of him, who was the chief of kings, and an ornament of the whole earth, spread over the world becoming (at the same time) a cause of the flow of moon-gems made of the eyes of the young women of his enemies.'

St. 26. माता—Construe भवतुल्यधाम्नः इन्द्रद्विपद्भर्तृनिषूदनस्य माता भवित्री विधेया [सा] तेन समयं विदित्वा वह्नेः समक्षं विधिवदुपयेमे. भवतुल्यधाम्नः Analyse भवस्य ईश्वरस्य तुल्यं सदृशं धाम तेजो वपुर्वा यस्य स भवतुल्यधामा तस्य, ' Having a bodily strength or bodily splendour resembling that of the Supreme Being.' ' Having a fiery energy equal to that of the Supreme Being.' इन्द्रद्विपद्भर्तृनिषूदनस्य—Analyse इन्द्रस्य द्विपद् इन्द्रद्विपद् रावणपुत्रो मेघनादः तस्य भर्ता दशकण्ठः तं निषूदयतीति (युधि) हन्तीति इन्द्रद्विपद्भर्तृनिषूदनो रामः तस्य तादृशस्य, ' Of the killer in a battle of the sire of the enemy of इन्द्र (i. e. राम).' इन्द्र *m.*—Was the king of heaven and the lord of gods. It is supposed that any body, a god, a man, a giant, can raise himself to the position of Indra by performing a hundred horse sacrifices. Indra is, therefore, represented as being jealous of one who performs one hundred sacrifices and as trying to dissuade him from his object either personally or by the intervention of the nymphs of his court. He is known as the paramour of Ahalyá, the wife of गौतम, whom he once ravished. Gautama's curse on this account produced hundreds of sores in the body of इन्द्र, but these were afterwards changed into so many eyes (सहस्रनेत्र). He is described to have stolen the horse consecrated

by the king सगर, who was about to perform the horsesacrifice for the hundredth time. He is said to have killed वृत्र and बल. The former of these was a ब्राह्मण and इन्द्र had to sacrifice till he purged away his sin. It was he who cut down the wings of the mountains that once flew about to the great annoyance of the people. He is the god of rain. समयं विदित्वा— 'Knowing the proper time. 'Knowing the right moment or proper season'. विध्रेया = विनयग्राहिणी, Expl:—प्रवृत्तौ निवृत्तौ वा विनयं ग्रहीतुं शीलमस्याः, 'Preserving a refined character (or nature) both in the active or passive life'. 'modest', वह्नेः समक्षं—' In the presence of the sacred fire.' वह्नेः समक्षं तेन विधिवदुपयेमे— 'Knowing the proper season he, in presence of the sacred fire, married, agreeably to rules, an obedient princess who was to become the mother of the killer of the sire of the enemy of Indra (i. e. Ràma) and the possessor of bodily strength (or bodily splendour) like that of the Superme Being.'

St. 27. महेन्द्रकल्पस्य—Construe महेंद्रकल्पस्य [महेंद्रतुल्यस्य, महेन्द्रादीपद्नस्येति यावत्] देव्याः कृताभिषेकायाः स्फुरन्मयूखा स्फुरत्किरणा नखानां सरणिः पंक्तिः जितपद्मकोशे प्रच्छादितपद्मकुड्मले पादद्वयान्ते महाय पूजायै मुक्ता प्रक्षिप्ता मुक्तावितितिरिव मौक्तिकपंक्तिरिव विरेजे शुशुभे· महेन्द्रकल्पस्य Expl:—महेन्द्रादीपद्नस्य, 'Almost like or nearly equal to great Indra'. स्फुरन्मयूखाः —Analyse स्फुरन्तः मयूखाः यस्यां सा, 'Having the rays flashing forth.' पादद्वयान्ते—Analyse पादद्वयस्य अन्तः पादद्वयान्तः तस्मिन्, 'On the extremity of her feet.' जितपद्मकोशे—Analyse जितः पद्मानां कोशो येन स जितपद्मकोशः तस्मिन्, 'Which has eclipsed the cup of the bud of lotuses.' मुक्तावितति: Analyse मुक्तानां विततिर्मुक्तावितति:, 'A collection of pearls.' 'A quantity of pearls.' जितपद्मकोशे पादद्वयान्ते मुक्ता मुक्तावितितिरिव विरेजे—' With its rays flashing forth, the line of the nails of the queen, the wife of him, who was almost like or nearly equal to great Indra, shone forth like a quantity of pearls thrown, for worship, on extremity of the her feet, which had eclipsed the cup of the buds of lotuses'.

St. 28. लीला—Construe अत्र अस्मिन् जंघायुगले गतेर्लीला गतिविलासो निसर्गसिद्धा स्वभावसिद्धा एवास्ति । न तु मत्तो दंती गजो श्रुपितश्रोरितः । नापि हंसः चक्रांगो श्रुपितश्रोरितः । इतीव तदेतदेव [जनान् सत्यापयितुमिव] तदीयं तस्याः कौसल्यायाः जंघायुगलं प्रसृतायुग्मं तुलाकोट्यधिरोहणानि चक्रे. निसर्गसिद्धा–Analyse निसर्गात् सिद्धा निसर्गसिद्धा, 'Acquired by nature,' 'born of nature,' 'nature-born'. Appropriate to nature.' *Cf.* Uttar. I. 14. "नैसर्गिकी

सुरभिणः कुसुमस्य सिद्धा." जंघायुगलं—Analyse जंघायाः युगलं जंघायुगलं, 'A pair of legs from ankle to knee.' 'A calf of the leg'. तुलाकोट्यधिरोहणानि —Analyse तुलाकोटेः अधिरोहणानि तुलाकोट्यधिरोहणानि, 'Mounting on a balance scale.' or 'Act of putting himself to the test of an ordeal.' अत्र गतेर्लीला निसर्गसिद्धा एवास्ति न तु मत्तो दंती सुपितो नापि हंसः 'The sportiveness of gait that was manifested there (i. e. in the calves of her legs) was acquired by nature. It was not robbed of a maddened elephant nor of a swan' इतीव तदीयं जंघायुगलम् तुलाकोट्यधिरोहणानि चक्रे,—'And, in this way, in order to declare it to be true, the pair of the calves of her legs ascended the scale of a balance or underwent the test of an ordeal.' The poet means that the जंघायुगुलं itself became the standard of comparison.

St. 29. दृष्टौ—Construe तयोः ऊरुद्वयोः दृष्टौ सत्यां दर्शने सति । "दृष्टिर्ज्ञानेऽक्ष्णि दर्शने" इत्यमरः । मन्मथबाणपातैः मारशरावपतनैः [विधातुः] चक्षुः नेत्रद्वयं हतं विद्धं स्यात् । नोचेत् । चक्षुर्निमील्य पिधाय विधातुं निर्मातुं न शक्यं । तर्हि विधात्रा ब्रह्मणा तौ ऊरू कथं कृतौ निर्मितौ नु । इति तस्यां सुमतेर्वितर्कः आस. मन्मथबाणपातैः—Analyse मन्मथस्य बाणाः मन्मथबाणाः तेषां पाताः मन्मथबाणपाताः तैः 'By the descent of Cupid's arrows'. शक्यं—Goes with ऊरू though differing in gender. Such consruction is often seen in Kàlidása's works as well as in the works of classical authors of Sanskrit. *Cf.* S'a. III. 60. "शक्यमरविन्दसुरभिः कणवाही मालिनीतरंगाणाम् । अंगैरनंगतप्तैरविरलमालिंगितुं पवनः." Vámana in his अलंकारसूत्रवृत्ति gives the following remark:—"शक्तिसहोश्चेति कर्मणि यति कृते शक्यमिति रूपं भवति । विलिंगवचनस्यापि विरुद्धलिंगवचनस्यापि, कर्माभिधाने सामान्योपक्रमाद्विशेषानपेक्षायामिति । यथा, 'शक्यमोषधिपतेर्नवोदयाः कर्णपूररचना कृते तव । अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसंपुटैः कराः ॥' अत्र भाष्यकृद्वचनं लिङ्गं यथा । शक्यं च श्वमांसादिभिरपि क्षुत्प्रतिहन्तुमिति । न चैकान्तिकः सामान्योपक्रमः । तदाह । 'शक्या भंक्तुं झटिति बिसिनीकन्दवच्चन्द्रपादाः' इत्यपि भवति". No doubt the poet has closely imitated Kálidása and he was tempted to bring the genderless use of शक्यं in one of the stanzas of his Kávya. And on this ground the reading of our Tála-leaf Ms. A. appears to us the genuine reading of the poet. The verse is rather difficult and the interpretations of the stanza in question may also differ in various ways. The difficulty of interpreting the stanza will, in our opinion, be removed if we were to prefer the reading of our Tàla-leaf Ms. B. दृष्टौ सत्यां मन्मथबाणपातैश्चक्षुर्हतं स्यात्—'If the Creator's eyes were to look at them, they would be smitten

with (or hit by) the descent of love's arrows:' चक्षुर्निमील्य विधातुं न शक्यं—' Were he to close his eyes he could not create.' विधात्रा तौ ऊरू कथं नु कृतौ—'How then did the Creator frame her thighs: ' इति तस्यां सुमतेर्वितर्कः आस—' Thus were the wise at fault about her (creation).' There is indeed in fact a poetical syllogism (काव्यप्रतिज्ञा) in due form, and a rendering, in effect the same, as given above. An intelligent man can reasonably doubt how the Creator could have framed her thighs: he could not do it without shutting his eyes, since if he looked he would have been at once hit by the arrows of love and with eyes shut, he could not, of course, proceed with the work. I owe the above rendering of the passage to our distinguished Sanskritist, Pandit Vásudeva S'ástri Abhyankar of the Fergusson College, Poona, with whom I discussed the knotty points of the verse in question.

St. 30. तथा—Construe तस्य पृथुत्वं तया तथा हृतं यथा मध्यं अतिक्षयिष्णु अभवत्। इति पुनर्वृद्धिनिषेधहेतोः श्रोणी रशनागुणेन बद्धा इव. अतिक्षयिष्णु *adj.*—Expl, अतिशयितं क्षयशीलं अतिक्षयिष्णु, 'Very thin or slender.' *Cf.* Pàṇi. III—2—136. " अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचरः इष्णुच्,' The affix इष्णुच् comes after the following verbs in the sense of ' agents having such a habit &c,' as अलंकरिष्णुः 'decorating,' निराकरिष्णुः 'repudiating,' प्रजनिष्णुः 'procreating,' उत्पचिष्णुः 'apt to ripen,' उत्पतिष्णुः 'flying,' उन्मदिष्णुः 'mad,' रोचिष्णुः 'bright,' अपत्रपिष्णुः 'bashful,' वर्त्तिष्णुः 'revolving,' वर्द्धिष्णुः ' growing,' सहिष्णुः 'patient,' and चरिष्णुः 'moveable.' रशनागुणेन—Analyse रशनायाः गुणः तेन तादृशेन, ' By the band of the girdle.' 'By the string of the zone.' वृद्धिनिषेधहेतोः—Analyse वृद्धेः निषेधः वृद्धिनिषेधः तस्य हेतोः 'With the object of preventing the growth again.' तस्य पृथुत्वं तया तथा हृतं यथा मध्यं अतिक्षयिष्णु अभवत्--'She arrested its growth (*lit.* development) in such a way that her waist became very thin (or slender)'. इति पुनर्वृद्धिनिषेधहेतोः श्रोणी रशनागुणेन बद्धा इव—'With this idea her loins were girdled up, as it were, by a band (or string) of her zone in order to prevent their further growth.' Mark the expressions गुण, वृद्धि and निषेध probably terms from Pàṇini.

St. 31. अस्य—Construe भुवनत्रयेऽपि अस्योदरस्य प्रतितुल्यशोभं किमपि नास्तीति धात्रा संख्यानरेखाः इव संप्रयुक्ताः सुदत्याः तिस्रो वलयो विरेजुः. प्रतितुल्यशोभं—Analyse प्रतितुल्या शोभा यस्य तत्, ' Having a parallel beauty.' Goes with किमपि suppressed in the verse. भुवनत्रये—Analyse भुवनानां त्रयं भुवनत्रयं तस्मिन्, 'In three worlds.' संख्यानरेखाः—Analyse संख्यानस्य रेखाः संख्यानरेखाः, ' The lines of enumeration,' Enumerating streaks.'

In this compound the expression संख्यान appears to have been used particularly with a significant motive. For, the Creator, it appears, made a search for its parallel beauty in the first world, where he did not find it. He then pushed forth his search in the second, where too he did not see a counterpart of the beauty of that belly. He, at last, continued his search in the third world, but there also he was disappointed. And in this way the propriety of the expression may be accounted for as there are भुवनत्रय and तिस्रो वलयः in the verse. सुदत्याः—Analyse शोभनाः दन्ताः यस्याः सा सुदती तस्याः 'Having a beautiful set of teeth.' वलयः—The natural lines or folds of skin over the navel (especially of beautiful women). विरेजुः—'Beamed wih brightness.' धात्रा संख्यानरेखाः इव संप्रयुक्ताः सुदत्याः तिस्रो वलयो विरेजुः—'With the idea that there exists no second counterpart of a like or equal beaty to that belly even in three worlds, the three natural folds of the lady having a beautiful set of teeth, began to beam with brightness as if they were the lines of enumeration gracefully streaked on it by the Creator.'

St. 32. वयःप्रकर्षात्—Construe वयःप्रवर्षाद् उपचीयमानस्तनद्वयस्य उद्वहनश्रमेण वनजायताक्ष्याः मध्यः अत्यन्तकार्श्यं जगाम इत्येष मम तर्कः. वयःप्रकर्षात्—Analyse वयसः प्रकर्षः वयःप्रकर्षः तस्मात्, 'From a developed condition (or excellence) of age'. 'On account of the advancement of age.' उपचीयमानस्तनद्वयस्य—Analyse स्तनयोः द्वयं स्तनद्वयं । उपचीयमानं यत् स्तनद्वयं उपचीयमानस्तनद्वयं तस्य, 'A developed pair of breasts.' 'Breasts in the process of being developed.' अत्यन्तकार्श्यं—Analyse अन्तं अतिक्रान्तं अत्यन्तं । अत्यन्तं च कार्श्यं च अत्यन्तकार्श्यं, 'Excessive thinness.' 'Past a proper end or limit of emaciation.' वनजायताक्ष्याः—Analyse वने उदके जाते वनजे नीलोत्पले ते इव आयते अक्षिणी यस्याः सा, 'Having long eyes like a pair of blue lotus-flowers.' वनजं--नीलोत्पलं. 'A blue lotus-flower.' मम—Refers to the poet. For वयः प्रकर्षात्, उपचीयमान° and उद्वहनं &c. *Cf.* वपुःप्रकर्षात् R. III-34. "प्रचीयमानावयवा" R. III-7. and "आपीनभारोद्वहनप्रयत्नात्" R. II-18. उद्वहनश्रमेण—Analyse उद्वहनस्य श्रमः उद्वहनश्रमः तेन उद्वहनश्रमेण, 'Labour of carrying or lifting up.' वनजायताक्ष्याः मध्यः अत्यन्तकार्श्यं जगाम इत्येष मम तर्कः—'It is our idea that the waist of the lily-eyed lady became excessively thin (or emaciated) on account of the labour of carrying up her breasts developed along with the advancement (or excellence) of her age.'

St. 33. अरालकेश्याः—Construe अरालकेश्याः विधात्रा विधीयमाने अलके चलत्तूलिकाग्रात् च्युतस्य असितस्य बिन्दोर्मार्गरेखा इव नवरोमराजी रेजे. अरालकेश्याः—

Analyse अराला कुटिला अत एव सुन्दराः केशा यस्यास्तस्यास्तथोक्तायाः, 'Of a curled-haired damsel.' *Cf.* R. VI. 81. "भित्त्वा निराक्रामदरालकेश्याः." चलत्तूलिकाग्रात्—Analyse चलं तरलं तूलिकायाः आलेख्यकूर्चिकायाः अग्रं तस्मात्, 'From the foremost point of the painter's brush that was shaking (or unsteady).' मार्गरेखा– Analyse मार्गस्य रेखा मार्गरेखा, 'A line or streak of the path'. नवरोमराजी—Analyse नवानि च तानि रोमाणि च नवरोमाणि तेषां राजी पंक्तिः 'A line or row of fresh hair,' 'a streak of fresh hair (on the abdomen of beautiful women just above the navel, said to be a sign of puberty).' चलत्तूलिकाग्रात् च्युतस्य असितस्य बिन्दोः मार्गरेखेव नवरोमराजी रेजे—'When the hair of that curled-haired damsel were in the process of being framed by the Creator, the row of fresh hair looked splendid, as if, it were a line (or streak) of the path of a drop of the black-fluid which had fallen down from the extremity of the painter's brush that was shaking'.

St. 34. नायं—Construe अयं शशी न [किन्तु] तत्प्रतितुल्यं अन्यत् किमपि यस्मात् नौ द्वयं न विश्लेषयति । इति तर्कादिव तौ कुचचक्रवाकौ तस्याः मुखेन्दुं पश्यतः स्म । मुखेन्दुं–Analyse मुखमेव इन्दुः मुखेन्दुः तं. 'The moon-face,' 'the moon in the form of the face.' कुचचक्रवाकौ—Analyse कुचौ एव चक्रवाकौ कुचचक्रवाकौ 'Breasts in the form of Chakravâka birds.' इति तर्कादिव तौ कुचचक्रवाकौ तस्याः मुखेन्दुं पश्यतः स्म—'This is not the moon but some other object equal in merits to him; for it does not cause us both to be ever disunited: with this idea, as it were, those Chakravâka birds in the form of her breasts used to look at the moon in the form of her face.'

St. 35. निर्जिग्यतुः—Construe सुश्लिष्टसंधी शुभविग्रहौ तन्व्याः तौ भुजौ यदि सच्छिद्रवृत्तं दीर्घसूत्रं बालमृणालनालं निर्जिग्यतुः तत्र किं किल चित्रं. बालमृणालनालं—Analyse मृणालस्य नालं मृणालनालं । बालं च मृणालनालं च बालमृणालनालं, 'A stalk of a fresh lotus.' Mark the wellknown plays upon the following words. सच्छिद्रवृत्तं—Analyse छिद्रैः सहितं सच्छिद्रं । सच्छिद्रं च तद् वृत्तं च सच्छिद्रवृत्तं, 'Having a porous and round form.' It also means 'of a blemished character,' of a bad conduct,' (सदोपचरितं). दीर्घसूत्रं—Analyse दीर्घाणि सूत्राणि यस्य तत्, 'Having long fibers in the interior of a lotus cup.' It also means 'dilatory,' 'slow,' 'tedious,' (चिरक्रियं) । सुश्लिष्टसंधी—Analyse सुश्लिष्टाः संसक्ताः संधयः जतुकफोणिमणिबंधादयः ययोः तौ, 'Having well-built joints.' 'Having joints gracefully framed in a symmetrical proportion.' The compound may also mean, 'Having a treaty of peace minutely embracing all political expedients.' शुभविग्रहौ—Analyse शुभौ विग्रहौ ययोस्तौ, 'Having beauti-

ful fingers (organs);' or 'having a graceful expanse.' It also means, 'with an extraordinary quality, or energy of military tact.' तन्व्यास्तौ भुजौ यदि बालमृणालनालं निर्जिग्यतुस्तत्र किं किल चित्रं,—'What wonder is there if indeed those arms of that delicate lady having joints gracefully framed, with beautiful palms and fingers, excelled the stalk of a fresh lotus having a porous and round form, with long fibers in the interior of the lotus cup.'

St. 36. कान्तिप्रकर्ष—Construe संध्याघने बद्धपदं कान्तिप्रकर्षं दशनच्छदेन हरन्त्याः तस्याः गृहोद्यानसरोगतस्य अंबुरुहस्य रागो हस्तस्थः एव. कान्तिप्रकर्ष—Analyse कान्तेः प्रकर्षः कान्तिप्रकर्षः तं, 'Excellence of beanty.' 'Eminence or superioricy in loveliness.' दशनच्छदेन—Analyse दशनानां छदः दशनच्छदः तेन, 'By means of the covering of the teeth i. e by means of the lips.' संध्याघने—Analyse संध्यायाः घनः संध्याघनः तस्मिन्, 'On a cloud making its apperence at twilight.' बद्धपदं Analyse बद्धं पदं येन स बद्धपदः तं, 'Which has set its foot on,' or 'having its foot fixed on.' गृहोद्यानसरोगतस्य—Analyse गृहस्य उद्यानं गृहोद्यानं तस्मिन् सरः गृहोद्यानसरः तत्र गतः तस्य, 'Belonging to the lake situated in the garden of her palace.' गत 'gone', when used at the end of compounds, does not necessarily imply motion; it not unfrequently expresses 'relationship,' 'connection,' 'position' &c. *Cf.* S'á. I. वयमपि तावद्भवत्यौ सखीगतं किमपि पृच्छामः "We too, ask you, maidens, a few particulars respecting (about) your friend." S'á. IV. भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति, "She does not pay any attention even to herself, owing to her (being deeply absorbed in) thinking about her husband." Mál. I. आं स जनो देव्याः पार्श्वगतश्चित्रे दृष्टः "Oh, she was seen by the side of the queen, in a picture. &c." हस्तस्थः—Analyse हस्ते तिष्ठतीति हस्तस्थः, 'Staying in the hand,' 'being in hand,' 'held,' 'grasped,' i. e. 'in one's own power or subjection,' 'self-dependent.' By this epithet the redness of the palm of her hands as well as her lips is indicated. अंबुरुहस्य—Analyse अंबुनि रोहतीति अंबुरुहः तस्य. 'Growing in water.' 'A waterlily.' 'A lotus.' कान्तिप्रकर्षं हरन्त्यास्तस्याः अंबुरुहस्य रागः हस्तस्थः एव,—'She who stole away (i. e. inherited) the excellence of beautiful splendour that had set its foot (or settled) on an evening (dry) cloud, by her red lips, had already in her hand the red hue of the water-lily belonging to (i. e. which had grown in) the garden lake of her palace.'

St. 37. आसीत्—Construe तद्वक्त्रचंद्रस्य चन्द्रमसश्चायं विशेषः आसीत्। [यत्] पूर्वः सकलं कुरंगं बिभर्ति द्वितीयस्तु तस्यैव [कुरंगस्य] नेत्रद्वितयं बिभर्ति. तद्वक्त्रचन्द्रस्य—Analyse तस्याः वक्त्रं तद्वक्त्रं तदेव चन्द्रः तस्य, 'Her moon-

face.' 'The moon of her face.' सकलं—Analyse कलाभिः सहवर्तमानः सकलः तं तथोक्तं 'With all his digits'; 'having his entire form.' Goes with कुरंगं. कुरंगः 'A deer." The moon is supposed to bear the mark of a black deer on her surface. नेत्रद्वितयं—Analyse नेत्रयोः द्वितयं नेत्रद्वितयं तद् तादृशं, 'A pair of eyes.' पूर्वः सकलं कुरंगं बिभर्ति द्वितीयस्तु तस्यैव नेत्रद्वितयं—'This was the only difference (विशेषः) between the moon and the bright face moon of hers that the former (पूर्वः) bore a mark of the entire form of a black deer while the latter (द्वितीयः) simply a pair of eyes of that deer (of the moon).'

St. 38. कांतिश्रिया—Construe कांतिश्रिया निर्जितपद्मरागं मनोज्ञगंधं द्वयमेव [लोके] शस्तं। जलेषु नवप्रबुद्धं जलजं स्थलेषु [च] तस्याः वदनारविन्दं. कान्तिश्रिया—Analyse कान्तेः श्रीः कान्तिश्रीः तया कान्तिश्रिया शोभासंपत्त्या, 'By reason of the excellence of beauty.' निर्जितपद्मरागं—Analyse निर्जितः पद्मरागो मणिविशेषो येन तत्, 'Which has eclipsed a gem called ruby,' मनोज्ञगन्धं—Analyse मनोज्ञो मनोहरो गन्धो यस्य तत्, 'Having an agreeable smell.' 'Of a sweet smell.' नवप्रबुद्धं Analyse नवं च तद् प्रबुद्धं च नवप्रबुद्धं, 'Newly opened.' 'Lately opened.' जलजं—Analyse जले जातं जलजं, 'A lotus.' वदनारविन्दं—Analyse वदनमेव अरविन्दं वदनारविन्दं, 'Lily like face.' जलेषु नवप्रबुद्धं जलजं स्थलेषु तस्याः वदनारविन्दं द्वयमेव शस्तं—'Two things only excelling the gem called ruby by the excellence of beauty and possessing a sweet smell were said to be most praiseworthy (in the world); the newly opened lotus in waters and her lotus-like face on land.'

St. 39. इन्दीवरस्य—Construe इन्दीवरस्य अस्याः नेत्रोत्पलस्यापि एतदन्तरं। यतः एकं हिमांशोः त्विषोऽपि न सहते। अपरं मुखाख्यं शशांकं आक्रम्य तस्थौ. नेत्रोत्पलस्य—Analyse नेत्रे एव उत्पलं नेत्रोत्पलं तस्य, 'Eyes in the form of a lotus.' इन्दीवर and उत्पल belong to one and the same class of blue lotuses known as कुवलय. But here the poet refers to them as the sun lotuses. कुवलयं चंद्रविकासि, पद्मं तु सूर्यविकासि, इत्यनयोर्भेदः। इन्दीवर is derived from the root इन्द् I. P. सेट्. *Cf.* इन्दी लक्ष्मीः। तस्या वरमिष्टम्॥ Pandit Bandhyopádhyáya has the following remark on the word आक्रम्य, " इहाक्रम्यपदेन नेत्रयोर्विशालता व्यज्यते। इन्दीवरपदं प्रकृते कमलाभिप्रायेण कुमुदजातिश्चन्द्रबन्धुत्वात्." हिमांशोः—Analyse हिमाः अंशवः यस्य स हिमांशुः तस्य, 'Of the moon.' मुखाख्यं—Analyse मुखं आख्या यस्य स मुखाख्यः तं, 'Going by the name of face.' शशांकं—Analyse शशः अंके यस्य शशांकः तं तादृशं, 'Bearing the mark of a hare, i. e. the moon.' यतः एकं हिमांशोः त्विषोऽपि न सहते। अपरं मुखाख्यं शशांकमाक्रम्य तस्थौ—'This is the difference between the lotus flower and also

the lotus in the form of her eye that the former (एकं) does not bear even the splendonr of the moon, while the latter (अपरं) remains pervading the moon, known by the name of face.'

St. 40. युग्मं—Construe असितलोचनायाः भ्रुवोर्युग्मं चञ्चलजिह्मपक्ष्मसंपर्कभीत्या प्रोन्नम्य दूरोत्सरणं विधित्सु मध्येन तस्थौ इति मे वितर्कः. चञ्चल°—Analyse चञ्चलानि च जिह्मानि च चञ्चलजिह्मानि तानि पक्ष्माणि चञ्चलजिह्मपक्ष्माणि तेषां संपर्काद् भीतिः चञ्चलजिह्मपक्ष्मसंपर्कभीतिः तया, 'From fear of receiving the contact (or association) of unsteady and squinting (or crooked) eyelashes.' The implied sense of the expression चञ्चल is, 'fickle,' 'libertive'; that of जिह्म is 'false,' 'dishonest,' 'deceitful,' 'morally crooked' &c.; and that of पक्ष्मन् is, 'hair,' these have generally a croocked form, hence it may mean, crooked by nature. असितलोचनायाः—Analyse असिते कृष्णे लोचने नयने यस्याः सा तस्यास्तथोक्तायाः, 'Of the dark-eyed lady.' प्रोन्नम्य *ger.*—उत्थ.य, 'Having got up,' 'having risen up,' 'raising itself up.' दूरोत्सरणं—Analyse दूरं उत्सरणं दूरोत्सरणं, 'Keeping itself at a long (or respectable) distance.' भ्रुवोर्युग्मं—'A pair of eyebrows.' इति मे वितर्कः—'This is what I think of it.' 'This is my idea of it.' मध्येन तस्थौ Expl:—मध्येन मध्यभागेन तस्थौ उत्थितं बभूव, 'Stood up by the middle part.' 'Raised itself up by the middle curve.' It means that both the extremities of the eyebrows remained fixed or firm in their usual position, while the middle line of the eyebrow curve stood higher, i. e. had prominently risen up (making of course a graceful digit of the crescent moon or the beautiful curve of a rainbow; thus carefully avoiding the contact or association of the squinting eyelashes). The Sanskrit poets generally describe the beauty of eyebrows as having a graceful form or shape similar to that of a rain-bow or the digit of the crescent moon. भ्रुवोर्युग्मं चञ्चलजिह्मपक्ष्मसंपर्कभीत्या प्रोन्नम्य दूरोत्सरणं विधित्सु मध्येन तस्थौ.—'From fear of coming into contact with the unsteady and squinting eyelashes, the pair of the eyebrows of that dark-eyed queen rose up and with a desire of keeping itself at a long distance did stand up by the middle line (or curve); this is my idea of it.' This is also one of the difficult or knotty verses of the poem. And the above explanation may serve for the gist of the verse.

St. 41. तत्केश°—Construe तत्केशपाशावजितात्मबर्हभारस्य शिखिनो वनेषु वासः " तिरश्चामति चेतो जातु लज्जां स्पृशति " इति जनस्य शंकां चक्रे. तत्केश°—Analyse तस्याः कोसलराजपुत्र्याः केशानामलकानां पाशैरवजितः अधरीकृतः आत्मनो बर्हाणां पक्षाणां भारो यस्य तस्य तादृशस्य, 'Whose cluster (*lit.* burden)

of feathers was eclipsed (or surpassed) in beauty by her ornamental braid of hair.' शिखिनो वनेषु वासः—'The abode of peacocks in forests.' तिरश्चामपि चेतो जातु लज्जां स्पृशति—'The mind even of lower animals may perhaps entertain (*lit.* touch) the feeling of shame.' *Cf.* Ku. I. 48. "लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः । तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्यः ॥" इति जनस्य शंकां चक्रे—'Such was the doubt that crossed the mind of the people.' तिरश्चामपि चेतो जातु लज्जां स्पृशति इति जनस्य शंकां चक्रे,—"The mind even of the lower animals may, perhaps, brood on the feeling of shame;" 'such, in fact, was the doubt that was passing in the minds of the people on seeing the forest abode of peacocks whose cluster of feathers was eclipsed in beauty by her ornamental braid of hair.'

St. 42. अन्या—Construe जितसिद्धकन्या तादृग्गुणा अन्यापि कन्या तस्य देवी बभूव । यस्याः दोषोऽपि भुवनत्रयस्य रक्षोभयनाशहेतुर्बभूव. जितसिद्धकन्या—Analyse जिताः सिद्धानां कन्याः यया सा जितसिद्धकन्या, 'One who has surpassed the daughters of the Siddhas in beauty (or loveliness).' The Siddhas are a class of semi-devine beings supposed to be of great purity and holiness, and said to be especially characterized by the eight supernatural faculties; viz:—"अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः" &c., to which is sometimes added कामावसायित्वं and many others; even twenty six others are sometimes added, i. e. दूरश्रवणं, सर्वज्ञत्वं, मनोयायित्वं, वह्निस्तंभः, जलस्तंभः, वायुस्तंभः, क्षुत्स्तंभः, पिपासास्तंभः, निद्रास्तंभः &c.; according to some authority the Siddhas inhabit, togetherwith the Munis &c., the भुवर्लोक or middle region between the earth and the sun; according to Vishṇupurāṇa 88 thousand of them occupy the regions of the sky north of the sun and south of the seven *Ri*shis, they are regarded as immortal, but only in the sense of living to the end of a Kalpa; in the latter mythology they appear to be sometimes confused with the साध्याः, whose place they seem occasionally to take. तादृग्गुणा—Analyse तादृशो गुणाः यस्याः सा, 'Possessing merits or qualities similar to those of the princess of the Kosala king.' According to the poet the daughter of the Kekaya king is said to have possessed qualities or merits similar to those possessed by the princess of the king of the Kosalas. भुवनत्रयस्य—Analyse भुवनानां त्रयं भुवनत्रयं तस्य भुवनत्रयस्य, 'To the three worlds.' रक्षोभयनाशहेतुः—Analyse रक्षोभ्यः दानवेभ्यः भयस्य नाशः तस्य हेतुर्निदानं,

'The source of the removal of the terror arising from demons.' जितसिद्धकन्या तादृग्गुणा अन्यापि कन्या तस्य देवी बभूव,—'Another daughter, who on her part, had surpassed the daughters of the Siddhas in beauty and had, qualities similar to those of the Kosala princess, became also his queen.' यस्याः दोषोऽपि भुवनत्रयस्य रक्षोभयनाशहेतुर्बभूव, —'Even her fault (or wicked disposition) became the source of the removal of the terror arising from demons to the three worlds'.

St. 43. सुमंत्रसूतस्य—Construe द्विजेन ब्राह्मणेन अग्नौ हुतभुजि संनिहिते सति सुमंत्रसूतस्य सुमंत्रनामा सूतः सारथिर्यस्य तथोक्तस्य राज्ञो दशरथस्य पाणिग्रहं विवाहे करग्रहणं लंभितया संप्रापितया सुमित्रया भवहस्तसक्तहस्तांबुजायाः। भवस्य शूलपाणेः हस्तः करः तत्र सक्तं लग्नं हस्तांबुजं करकमलं यस्याः तस्याः तथोक्तायाः भवान्याः मृडान्याः पुण्यं पावनं वपुः शरीरं आललंबे आश्रितं. सुमंत्रसूतस्य—Analyse सुमंत्रनामा सूतः सारथिर्यस्य तथोक्तस्य, 'Having for his charioteer Sumantra.' पाणिग्रहं—Analyse पाणेः ग्रहः पाणिग्रहः तं, 'Taking hand in a marriage.' भवहस्तसक्तहस्ताम्बुजायाः—Analyse भवस्य शूलपाणेः हस्तः करः तत्र सक्तं लग्नं हस्ताम्बुजं करकमलं यस्याः तस्याः तथोक्तायाः, 'Whose lotus like hand was attached to the hand of the god S'iva.' Pandit Bandhyopádhyáya has the following remark in defence of the epithet सुमंत्रसूतस्य,—'अत्र दशरथतात्पर्येण सुमंत्रः सूतो यस्येति वक्रगत्याश्रयणं चिरार्थकत्वात्प्रकृतानुपयोगाच्च दोषापादकमिति तु न शक्यं, स, म, त, रेत्यक्षरश्लेषगुणानुगुण्येन वैशेषिकगुणत्वसंभवात्। तद्विवाहयात्रायां सुमंत्रस्यैव सारथित्वसूचनार्थत्वाच्च'। But the defence, in our opinion, is not so very convincing. सुमित्रया भवहस्तसक्तहस्ताम्बुजाया भवान्या पुण्यं वपुराललम्बे—'After having been made to accept in marriage the hand of the king (Das'aratha) whose charioteer was Sumantra, in presence of the sacred fire by the Brahmaṇa priest, Sumitrá assumed the auspicious body of Bhaváni whose lotus like hand was joined to that of S'iva.'

St. 44. तासु—Construe प्रजार्थी प्रजानामधिपः चारित्रकुलोन्नतासु तासु देवीषु अदृष्टपुत्राननवन्ध्यदृष्टिः [अत एव] चिन्ताहतात्मा [सन्] कालं निनाय प्रजानामधिपः—'The lord of the people., *Cf.* R. II. 1. "अथ प्रजानामधिपः प्रभाते." प्रजार्थी—Analyse प्रजाः एव अर्थो अस्य स प्रजेप्सुः 'Whose object was to get progeny.' 'Wishing to have progeny.' 'Longing for issue.' चारित्रकुलोन्नतासु—Analyse चारित्रेण उन्नतं कुलं यासां ताः तासु तथोक्तासु, 'Whose high family was renowned for good name, (or reputation, chastity).' अदृष्टपुत्राननवन्ध्यदृष्टिः —Analyse अदृष्टं अनवलोकितं पुत्रस्य आत्मजस्य आननं मुखारविन्दं तस्माद् वन्ध्या मोघा निष्फला वा दृष्टिर्यस्य स तादृशः, 'Whose eye-sight had become useless (*lit.* barren) on account of his not

having seen the face of a son.' चिन्ताहृतात्मा—Analyse चिन्तया आहृतः आत्मा यस्य सः, 'Whose heart was taken up by anxiety.' प्रजार्थी प्रजानामधिपः अदृष्टपुत्राननवन्ध्यदृष्टिः सन् कालं निनाय—'That lord of the people, ardently longing for progeny, whose eye sight had become useless by reason of his not having seen the face of a son (born) to those queens of his, whose high family was renowned for good name, passed his time with his heart wholly taken up by anxiety on that account.'

St. 45. स्वरक्षितव्यं—Construe [अथ] कदाचित् गोप्ता श्वगणिप्रचारैः विशोधितं कुञ्जभुवो हिमस्य नगस्य स्वरक्षितव्यं गहनं जगत्याः प्रभवे तस्मै जगाद. Paraphrase, शुनां विश्वकद्रूणां गणः स एषामस्तीति श्वगणिनः श्वग्राहिणः। तेषां प्रचारः संचरणादिव्यापारैः विशोधितं दस्युतस्करदावाग्न्यादीनां दूरापसारणेन परिसृष्टं कृतं। कुंजभुवो लतादिपिहितोदरस्य। हिमस्य नगस्य हिमाद्रेः। स्वरक्षितव्यं स्वरक्षणयोग्यं। गहनं वनं। गोप्ता तद्वनरक्षकः। कदाचित् तस्मै जगत्याः प्रभवे भुवो भर्त्रे राज्ञे दशरथाय। जगाद प्रणामपुरःसरं निवेदयामास। व्यपगतानलदस्युतया मृगयायोग्यं वनमस्तीति सूचितवानित्यर्थः। स्वरक्षितव्यं—Analyse स्वस्य रक्षितव्यं स्वरक्षितव्यं, 'Ought to be preserved by himself.' श्वगणिप्रचारैः—Analyse श्वगणिनः श्वग्राहिणः तेषां प्रचाराः तैः तादृशैः, 'By wanderings of persons who allowed packs of dogs to pass through (or to go about) it.' *Cf.* R. IX. 53. "श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः." कुञ्जभुवः—Analyse कुञ्जानां भूः यस्य तस्य तादृशस्य. 'Having sites of bowers.' गोप्ता कदाचित् तस्मै जगत्याः प्रभवे जगाद—'Once on a time a forest guard of the snowy mountain, reported to the lord of the earth that the forest of the Himálaya mountain, having sites of bowers, which was under his care, had been cleared by the roamings of persons having packs of hounds.' The poet means to say that a forest guard informed the king that the forest on the slopes of the Himálaya was cleared of the bands of robbers &c., and that the king might hold his hunting excursions at any time he pleased.

St. 46. विधेयचित्तः—Construe अनेद्युः चलितव्यधेषु विधेयचित्तः हलायुधाभः अन्यायनिवृत्तवृत्तिः स मृगेन्द्रगामी कुतूहलेन मृगयां जगाम. विधेयचित्तः—Analyse विधेयं स्वाधीनं। दृढसंलग्नमिति यावत्। चित्तं मनोवृत्तिर्यस्य सः, 'Having his mind under his own control.' 'Having his mind subject to his will power,' i. e. firmly fiixed on, firmly joined together. चलितव्यधेषु—Analyse चलिताः व्यधाः वेधनव्यापाराः वेधनलक्ष्या वा चलितव्यधाः तेषु तादृशेषु, 'On objects aimed at for wounding or striking in motion.' 'To hunt animals in motion.' चलितव्यधेषु विधेयचित्तः—

'Having firmly fixed his mind or made up his mind to hunt animals in motion.' 'Firmly intent on striking or hunting animals in motion.' हलायुधाभः—Analyse हलायुधस्य बलभद्रस्य आभा इव आभा यस्य सः, 'Looking like Balabhadra.' *Cf.* R. II–10. "मरुत्सखाभं." अनेद्युः—'On the next day.' 'On the following day.' *Cf.* R. II–26. "अन्येद्युरात्मानुचरस्य भावं." अन्यायनिवृत्तवृत्तिः—Analyse अन्यायेभ्योऽकार्येभ्यो निवृत्ता विमुखा वृत्तिः मनसः प्रवृत्तिर्यस्य सः, 'Possessing a propensity of mind totally averse to unlawful actions.' मृगेन्द्रगामी Expl:—मृगेन्द्रवत् गन्तुं शीलमस्य सः, 'Having gait like that of a lion.' *Cf.* R. II. 30. "ततो मृगेन्द्रस्य मृगेन्द्रगामी." Buddha-Charita VII. 2. "स राजसूनुर्मृगराजगामी." अन्येद्युः स मृगेन्द्रगामी कुतूहलेन मृगयां जगाम—'Having a propensity of mind totally averse to unlawful actions, looking like Balabhadra, with a gait like that of a lion and having firmly fixed his mind to hunt animals in motion, that king, prompted by curiosity, went out on a hunting expedition next day.'

St. 47. पुत्रीकृतान्—Construe यो हिमवान् शिशुत्वे ईश्वरया स्नेहेन पुत्रीकृतान् चित्रपुष्पाभरणाभिरम्यान् बालवृक्षान् नप्तृनिव उत्संगदेशेन चिरं बभार. पुत्रीकृतान्—पुत्रत्वेन स्वीकृतान्, 'Adoptd as sons.' *Cf.* R. II. 36, "पुत्रीकृतोऽसौ वृषभध्वजेन." ईश्वरा (री) 'An epithet of Durgá.' बालवृक्षान्—Analyse बालाश्च ते वृक्षाश्च बालवृक्षाः तान्, 'Small trees.' 'Young plants.' यः—The relative pronoun referred to, in this as well as in the subsequent five stanzas, alludes to the mountain Himálaya. चित्रपुष्पाभरणाभिरम्यान् Analyse चित्राणि च तानि पुष्पाणि च तेषां आभरणेन अभिरम्याः तान् तथोक्तान्, 'Looking most charming by their ornamental coat of flowers of various colours.' उत्संगदेशेन चिरं बभार—'He supported them on his lap (or on his sloping sides or regions) for a long time as if they were his grand children.' उत्संगदेशेन—Analyse उत्संग एव देशः उत्संगदेशः तेन तादृशेन, 'On his lap or sloping regions.' यो नप्तृनिव बालवृक्षान् उत्संगदेशेन चिरं बभार—'That mountain Himàlaya reared those small trees (or young trees) on its lap (or sloping regions) for a long time as if they were his grand children which through aflection were adopted as her sons by Durgá in her childhood and which then looked most charming by their ornamental coat of flowers of various colours.'

St. 48. वातेन—Construe घनानां पटले वातेन कृष्टे दृष्टाः धातुप्रतानाः मुग्धाय गंधर्ववधूजनाय यस्य त्वचाप्युद्धरणाभिशंकां प्रतरन्ति. धातुप्रतानाः—Analyse धातूनां प्रतानाः प्रचयाः धातुप्रतानाः, 'The layers or strata of the mineral substances.' उद्धरणाभिशंकां—Analyse उद्धरणस्य अभिशंका उद्धरणाभिशंका तां,

'A doubt or suspicion about uprooting (or peeling of the skin).' गंधर्ववधूजनाय-Analyse गंधर्वाणां वध्वः गंधर्ववध्वः ताः एव जनः तस्मै गंधर्ववधूजनाय 'In the minds of the daughters of the Gandharvas.' 'To the Gandharva daughters.' प्रतरन्ति—Derived from प्रतॄ *vt.* (सेट्) 1. P. 'To raise,' 'to spread,' 'to create,' 'to strengthen,' &c. तॄ with प्र, like तॄ with वि, is generally construed with the dative instead of the locative. *Cf.* Ku. I. 4. It appears that the poet employs this expression simply for the sake of alliteration. दृष्टाः धातुप्रतानाः मुग्धायगंधर्ववधूजनाय यस्य त्वचामुद्धरणाभिशंकां प्रतरन्ति—'The layers (or strata) of the mineral substances, that were seen when the coat of snow was torn away by the stormy winds, raised a doubt in the minds of the artless (or simple) daughters of the Gandharvas about the stripping of its (the mountain's) skin' (i. e. the peeling of its barks or its rinds).

St. 49. यः—Construe दरीमुखादर्धविनिर्गतांगैर्नागैः कृष्यमाणेषु मृगेषु प्रसारितास्यो यः स्वयमेव जिह्वां वितत्य सत्त्वान् ग्रासीकरोति इव. दरीमुखात् Analyse दर्याः मुखं दरीमुखं तस्मात्, 'From the mouths or openings of the caves.' अर्धविनिर्गतांगैः—Analyse अर्धानि विनिर्गतानि अंगानि येषां तैः, 'Nearly half of their bodies have come out.' प्रसारितास्यः—Analyse प्रसारितं आस्यं येन सः, 'One which has widely opened its mouth.' सत्त्व *m n.*—'Living creatures,' 'animals.' ग्रासीकृ—'To make a mouthful of, 'to swallow.' वितत्य *ger.*—'Having stretched out.' नागैः कृष्यमाणेषु मृगेषु प्रसारितास्यो यः स्वयमेव जिह्वां वितत्य सत्त्वान् ग्रासीकरोति इव—'When the animals were drawn in by huge serpents nearly half of whose bodies had come out of the openings of the caves, the mountain, with its month widely opened as if, in person, (or itself) swallows the animals, stretching out its tongue.'

St. 50. नागांगना°—Construe नागांगनारत्नमरीचिजालध्वस्तांधकारप्रकरस्य यस्य रात्रिंदिवसंविभागं निकुञ्जपद्माकरपद्मखण्डैर्विदन्ति. नागांगना°—Analyse नागानां काद्रवेयाणां अंगनाः स्त्रियः तासां रत्नानां मरीचयः किरणाः तेषां जालैः समूहैः ध्वस्तः अंधकारस्य प्रकरः संहतिः येन तस्य तादृशस्य, 'Which dispelled (or dissipated) the mass of darkness by means of multitudes of rays of diamonds worn on their bodies by the ladies of the Nâgas'. A Nâga is a fabulons serpent-demon so called, as he has a human face with the tail of a serpent, (the race of these beings is said to have sprung from Kadru, wife of Kas'yapa (or from Surasá) in order to people Pátála, one of the regions below the earth, their city is called Bhogavatî). According to the poet these

semi-divine fairies generally haunt the mountain Himavat. मनुष्याकारः फणलांगूलयुक्तो देवयोनिभेदः. The females of the race are described as very beautiful. The Nâgas had " corporeal constitutions capable of (sexually) attracting and being attracted by human beings and yet they were not without the serpentine furniture of the hood and the venomous fang." निकुञ्ज°—Analyse निकुंजेषु ये पद्माकराः तेषां पद्मखण्डानि निकुञ्जपद्माकरपद्मखण्डानि तैः तथोक्तैः, ' By means of the clusters of lotuses grown in large ponds under the spacious bowers (of the mountain) '. रात्रिंदिवसंविभागं—Analyse रात्रौ च दिवा च रात्रिंदिवं तस्य संविभागः तं तादृशं, 'Division of the day and night.' As for the Dvandva compound *Cf.* नक्तं च दिवा च नक्तंदिवं. अहनि च दिवा च अहर्दिवं &c. यस्य निकुञ्जपद्माकरपद्मखण्डैः [नागांगनाः] रात्रिंदिवसंविभागं विदन्ति—'They calculate the division of the day and night by means of the clusters of lotuses grown in large ponds under its (i. e. of the mountain) spacious bowers, where the mass of darkness has been dissipated by reason of the multitude of rays of diamonds worn on their bodies by the fairies of the Nâgas.'

St. 51. धातु°—Construe धातुप्रभालोहितपक्षयुग्मः श्रीमद्गुहालंकृतचारुपृष्ठः भासुरचन्द्रकान्तः यः दिव्यस्य चन्द्रकिणः रूपश्रियं बिभर्ति. धातु°—Analyse धातूनां गैरिकादीनां प्रभाभिः कान्तिभिः लोहितं रक्तं पक्षयोः पार्श्वयोः युग्मं यस्य सः, 'One whose sides or slopes have become red by the light or splendour of metallic substances.' श्रीमद्गुहा°—Analyse श्रीमतीभिः प्रशस्ताभिः गुहाभिः कंदराभिः अलंकृतं मण्डितं चारु शोभनं पृष्ठं यस्य सः, 'One whose uppermost part or upper side is adorned by beautiful and spacious caves.' दिव्यस्य *adj.* Expl:–दिवि भवः दिव्यः तस्य, 'Divine,' 'supernatural,' 'wounderful.' चन्द्रकिन् *m.*— 'A peacock.' रूपश्रियं—Analyse रूपस्य श्रीः रूपश्रीः तां, 'Perfection of form,' 'excellence of beauty,' 'perfection of handsomeness,' 'excellence of elegance.' An object to बिभर्ति. भासुरचन्द्रकान्तः—Analyse भासुरश्चासौ चन्द्रश्च भासुरचन्द्रः । भासुरचन्द्रवत् कान्तः उज्ज्वलः स्वच्छो वा, 'Perfectly white like the brilliant moon.' Because the peaks of the mountain Himavat are always covered over with snow. The compound may be analysed as, भासुरैः चन्द्रकान्तमणिभिः युक्तो वा, 'Studded with brilliant moon-gems.' The epithets पक्षः, गुहा and भासुरचन्द्रकान्तः also convey double sense. When applied to the mountain, पक्षः means, ' slopes or sides of a mountain,' गुहा means, 'a cavern or valley' and भासुरचन्द्रकान्तः means, 'bright like the brilliant moon', or studded with bright moon stones.' When applied to the peacock of

Kàrtikeya (स्कन्दस्य चन्द्रकिणः पक्षे), पक्ष means, 'wings or feathers.' गुह means, 'Kàrtikeya' and भासुरचन्द्रकान्त means, 'one having a bright extremity of feathers full of the shapes (or forms) of eyes. ' In this sense analyse चन्द्रकः पिच्छगतोज्ज्वलनेत्राकारचिह्नविशेषः तस्यान्तो भासुरो यस्य सः. भासुरचन्द्रकान्तो यः दिव्यस्य चन्द्रकिणः रूपश्रियं बिभर्ति ' Which with its sides (or slopes) red with metallic substances, with its uppermost part decorated by beautiful and spacious caves and with its perfect whiteness like that of the brilliant moon, exhibits the excellence of beauty of the heavenly peacock (of गुह)'.

St. 52. तस्य—Construe निर्झररेणुविद्धैर्वातैर्विधूतागरुपादपान्ते तस्य मैनाकगुरोर्निकुंजे धनदप्रभावः अधिज्यधन्वा [धनुर्ज्यां] क्वणन् चचार. निर्झररेणुविद्धैः—Analyse निर्झराणां रेणवः निर्झररेणवः तैः विद्धाः निर्झररेणुविद्धाः तैः, 'Surcharged by the watery sprays (or particles) of mountain torrents.' विधूतागरुपादपान्ते-Analyse विधूताः अगरुपादपानां अन्ताः यस्य तस्मिन् विधूतागरुपादपान्ते, ' The aloe trees on the borders of which were set in motion (or were shaking)'. अधिज्यधन्वा-Analyse अधिकृते ज्ये यस्मिन् तत् अधिज्यं । अधिज्यं धनुर्येन सः, 'One who has his bow strung.' 'One whose bow-string is stretched (or is up).' *Cf.* R. II. 8. " अधिज्यधन्वा विचचार दावम् " धनदप्रभावः—Analyse धनदस्य कुबेरस्येव प्रभावो यस्य स तथोक्तः 'Having a power like that of Kubera.' 'Whose might was equal to that of Kubera.' He is said to have his abode on the Kailása peak of the Himàlaya mountain. मैनाकगुरोः—Analyse मैनाकस्य गुरुः मैनाकगुरुः तस्य मैनाकगुरोः, ' Of the sire of the mountain Mainàka.' मैनाक *m.*—A mountain stated in the Mahàbhárata to be north of Kailása; so called as being the son of हिमवत् and मेनका. When, as the poets sing, इन्द्र clipped the wings of the mountains, this is said to have been the only one which escaped. This mountain, according to some, stands in Central India, and, according to others, near the extremity of the Peninsula. तस्य मैनाकगुरोर्निकुंजे धनदप्रभावः अधिज्यधन्वा क्वणन् चचार— ' Having a power like that of Kubera, with his bow strung, the king, twanging the string of his bow, began to roam about in the arbours of that sire of Mainàka, the aloe trees on the borders of which were violently shaking by the stormy wind, surcharged with the watery sprays of mountain-torrents.'

St. 53. तूणीरतः—Construe चपलेतरात्मा रंगतुरंगः धन्वी तूणीरतः इषुं तूर्णं विकृष्य चापे [च] संधाय क्वचिन्मृगाणां मार्गं पुरतः आशु रुन्धे स्म. चपलेत-

रात्मा—Analyse चपलाद् इतरः आत्मा यस्य स चपलेतरात्मा, 'Having a nature or natural temperament other than fickle' (i. e. of a steady mind). 'Of a firm disposition.' रंगत्तुरंगः—Analyse रंगन् तुरंगो यस्य स तादृशः 'Riding on a galloping or leaping horse'. रङ्गत् Present Participle derived from the root रग् *vi.* (रगि गतौ, Udàtta) I. P. to go,' 'to walk,' 'to move,' 'to leap' &c. (रङ्गति) *Cf.* Panini III. 1. 134. रंगत्तुरंगो धन्वी क्वचिन्मृगाणां मार्गं पुरतः आशु रुन्धे स्म—' Instantly drawing an arrow from the quiver and fixing it on his bow-string that celebrated bowman of a firm mind, with his horse galloping about, immediately began to obstruct the path of wild animals in front'.

St. 54. उत्कर्ण—Consrue राजा ईषन्निपातेन शरेण विदर्शिताभ्याहतकन्दुकोत्थं उत्कर्णं उत्पुच्छयमानं पारिप्लवाक्षं मृगशाववृन्दं आसे [दूरीचकारेत्यर्थः]. उत्कर्ण—Analyse उद्गतौ कर्णौ येषां तत्, ' Having their ears erect.' ' With ears erect.' उत्पुच्छयमानं—' With tails uplifted. ' ' Lifting up their tails.' A present participle derived from the Denominative verb in the Atm. (उत्पुच्छयते). आसे—' Drove out. ' ' Frightened away '. ' Threw away.' Derived from the root अस् *vt.* 4. P. (सेट्) generally with any preposition Ubhayapada. But the poet seems to have used it in Atm. without any preposition. विदर्शित°—Analyse विदर्शितं च अभ्याहताः ताडिताः ये कन्दुकाः गेन्दुकाः तैः उत्थं च, ' Which was pointed out and which had got up by balls being struck against it. ' पारिप्लवाक्षं—Analyse पारिप्लवे अक्षिणी येषां तत्, ' Of swimming eyes.' मृगशाववृन्दं Analyse मृगाणां शावाः मृगशावाः तेषां वृन्दं, ' A herd of young antelopes (or forest animals).' राजा पारिप्लवाक्षं मृगशाववृन्दं आसे—' By the feeble descent of an arrow the king scared away a herd of young antelopes (or wild animals) which was pointed out to him and which rose up by balls being struck against the deer in it which had swimming eyes, erect ears and tails lifted up'.

St. 55. मध्यं—Construe उत्तुंगबलस्त्वं करेण मम मध्यं मा प्रसभं पीडयस्व इति मनुवंशकेतोः विकृष्टचापेन अभिमुखं विवक्षुणा इव नेमे. उत्तुंगबलः—Analyse उत्तुंगं बलं यस्य स उत्तुंगबलः 'Having an extraordinary strength or power.' The propriety of employing उत्तुंग in a compound like this does not appear so very happy, because उत्तुंग generally implies 'loftiness,' 'height' &c., and also 'the swelling of a river or a stream,' but not in the sense in which the poet employs it. The word may perhaps figuratively give the poet's required sense. *Cf.*

S'is'u. IV. 38. "उत्तुंगस्तनभरभंगभीरुमध्याम्." विवक्षुणा Expl:-वक्तुमिच्छुः विवक्षुः तेन, 'Wishing to speak,' 'about to address.' अभिमुखं *adv.*—Analyse मुखं अभि अभिमुखं, 'Towards the face.' i. e. in front. विकृष्टचापेन—Analyse विकृष्टश्चासौ चापश्च विकृष्टचापः तेन, 'By the bowstring excessively drawn.' मनुवंशकेतोः—Analyse मनोः वंशः मनुवंशः तस्य केतुः तस्य तादृशस्य, 'To the eminent person in the race of Manu (*lit.* to the standard or banner of Manu's race).' नेमे—Mark the impersonal use of the intransitive root नम् in the लिट् or the Perfect. Such construction is often met with in Bhatti, Bhάravi and Mágha. *Cf.* Kir. III.30. "इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे । तं राजराजानुचरोऽस्य साक्षात्प्रदेशमादेशमिवाधितष्ठौ. " XVI. 35. " द्यौरुन्ननामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर्मयूखैः । क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः. " S'i's'u. III. 61. " बाणाहतव्याहतशंखशक्तेरासत्तिमासाद्य जनार्दनस्य । शरीरिणा जैत्रशरेण यत्र निःशङ्कमूषे मकरध्वजेन. " The idea of the verse is beautiful. The bow being excessively drawn both the ends of it came close so as to give it the form of a mouth, standing in the same line, opposite to the king's face and, as if, actually addressing its prayers to the king. उत्तुंगवलस्त्वं करेण मम मध्यं मा प्रसभं पीडयस्व—'Thou art, O king, exceedingly strong, please do not forcibly inflict pain to my waist (*lit.* middle part) by thy hand.' इति मनुवंशकेतोः विकृष्टचापेन अभिमुखं विवक्षुणा इव नेमे—'Wishing, as it were, to say these words, the bow of that eminent person of Manu's race, the string of which was excessively drawn, lowly bent infront of him.'

St. 56. खम्—Construe नृपेण विद्धोऽपि पूर्वाहितवेगवृत्त्या एणवरः खमुत्पपात । प्रीत्या स्वर्लोकं यातुः अन्तःकरणस्य अनुयात्रां कर्तुकामः इव । एणवरः—Analyse एणेषु वरः, 'An excellent black antelope.' 'A leader of an antelope herd.' Severel kinds of antelopes are thus defined in छन्दोग०—" अनृचो माणवो ज्ञेयः एणः कृष्णमृगः स्मृतः । रुरुर्गौरमुखः प्रोक्तः शंबरः शोण उच्यते." पूर्वाहितवेगवृत्त्या—Analyse पूर्वं आहिता वेगस्य वृत्तिः पूर्वाहितवेगवृत्तिः तया, 'By reason of the force of the speed that was already imparted.' अनुयात्रा *f.*—' That which is reguired for a journey.' 'Retinue.' 'Attendance'. नृपेण विद्धोऽपि पूर्वाहितवेगवृत्त्या एणवरः खमुत्पपात—' Though wounded by the king, that leader of an antelope herd flew up in the air (or sky) by reason of the force of the speed that was already imparted.' प्रीत्या स्वर्लोकं यातुः अन्तःकरणस्य अनुयात्रां कर्तुकामः इव—'Wishing, as it were, to be in attendance through affection, on the heart proceeding to the heavenly world.'

St. 57. अन्योन्य°—Construe अन्योन्यवक्त्रार्पितपल्लवाग्रग्रासं कुरंगयुग्मं प्रियानुनीतौ इष्टचाटुचेष्टस्य नृवीरस्य घाताभिरतिं भृशं निरासे. *Cf.* R. IX. 57, 58, 67. अन्योन्य°—Analyse अन्योन्यस्य वक्त्रयोः अर्पितः पल्लवाग्राणां ग्रासो येन तत्, 'Which has put mothfuls of the ends of young shoots of grass (or tender sprouts) into the mouths of one another.' नृवीरस्य—Analyse नृणां वीरः नृवीरः तस्य तादृशस्य, 'Of the man-hero.' कुरंगयुग्मं—Analyse कुरंगयोः युग्मं कुरंगयुग्मं, 'A pair of antelopes.' 'A pair of deer.' प्रियानुनीतौ—Analyse प्रियाणां अनुनीतिः प्रियानुनीतिः तस्यां तयोक्तायां, 'With respect to the courtesy for his beloveds.' 'With regard to the conciliatory acts towards his beloveds.' इष्टचाटुचेष्टस्य—Analyse इष्टाः चाटुचेष्टाः यस्मै स इष्टचाटुचेष्टः तस्य तादृशस्य, 'Who had a liking for elegant humouring (or agreeable flattery or coaxing insinuations).' घाताभिरतिं—Analyse घाते अभिरतिः घाताभिरतिः तां तादृशीम्, 'Delighting in making a slaughter (of animals).' 'Taking pleasure in killing (animals).' निरासे—Derived from अस् *vt.* 4. U. (सेट्) with निर्, 'to evict,' 'to expel,' 'to banish,' 'to keep off,' 'to turn out,' 'to drive away,' 'to cast out' &c. प्रियानुनीतौ इष्टचाटुचेष्टस्य नृवीरस्य घाताभिरतिं भृशं निरासे—'A pair of antelopes which was putting mouthfuls of the ends of young shoots of grass into the mouths of one another forcibly evicted the pleasure in the slaughter of animals of that man-hero, who had a frequent liking for elegant humouring in the conciliation of beloveds.'

St. 58. ऋज्वागता—Construe मुहुः ऋज्वागता मृगाणां पंक्तिः पूर्वस्य मुखे मुक्तेन सद्यः परेषामन्तरेषु समं दृष्टेन तस्य (दशरथस्य) शरेण ग्रथिता इव रेजे. ऋज्वागता—Analyse ऋजुरागता ऋज्वागता, 'Come into a straight line.' अन्तरेषु समं—'In an even line between the intervening spaces or intervals.' Rájasundara one of the expositors of the Kávya reads तेन for तस्य. तेन then means तेन शरेण, 'by that arrow,' or तेन दशरथेन मुक्तेन, 'discharged or hit by the king Das'aratha.' मुहुः ऋज्वागता मृगाणां पंक्तिः ग्रथितेव रेजे—'A row of deer which had repeatedly come into a straight line shone as if strung together.' पूर्वस्य मुखे मुक्तेन सद्यः परेषामन्तरेषु समं दृष्टेन तस्य (दशरथस्य) शरेण—'By means of a thread of his arrows hit into the mouth of the foremost antelope and instantly seen in an even line between the intervals of other antelopes.'

St. 59. आधावतः—Construe धनुर्धरेण तेन आधावतो महिपस्य मध्येललाटं मुक्तः अस्खलवेगो बाणः दृढदेहभेदे लांगूलसारत्वं इयाय. धनुर्धरेण—Analyse

धरतीति धरः। धनुषः धरः धनुर्धरः तेन तादृशेन, 'By that bowman.' 'By that bearer of a bow.' 'By him who was armed with a bow.' 'By that archer.' मध्येललाटं *adv.* Analyse ललाटस्य मध्यं मध्येललाटं, 'In the middle of forehead.' *Cf.* S'is'u. III. 33. "मध्येसमुद्रं." महिषस्य—'Of a wild buffalo;' generally known as गवल or गवय or the Gayal, गवा in Maràthi. अस्कन्नवेगो—Analyse न स्कन्नः अस्कन्नः। अस्कन्नो वेगो यस्य स तादृशः,. 'Whose speed had not slackened.' 'Of an unimpeded speed.' दृढदेहभेदे—Analyse दृढश्चासौ देहश्च दृढदेहः तस्य भेदः तस्मिन्, 'In the split of the body which was strongly built.' लांगूलसारत्वं—Analyse लांगूलस्य सारत्वं लांगूलसारत्वं, 'The substance or strength of a tail.' लांगूलसारत्वमियाय—'Assumed the substance of a tail i. e. became a new tail on the forehead of the buffalo.' अस्कन्नवेगः बाणः आधावतः महिषस्य दृढदेहभेदे लांगूलसारत्वं इयाय—'An arrow of unimpeded speed, hit on the middle of the forehead of a fleet buffalo, by that bowman, assumed the form of a tail in the split of its hard body.'

St. 46. अमार्दवं—Construe अमार्दवं अतिस्तब्धं गुणेनापि न नामितं ईशेन दर्शितस्नेहं अग्रहं नीचं जनमिव [तद्धनुरादाय चक्रीचकारेत्युत्तरेणान्वयः]. अमार्दवं—Analyse अविद्यमानं मार्दवं यस्य तदमार्दवं कठिनं, 'Hard.' 'Stiff.' 'Inflexible.' When applied to नीचं जनं, अमार्दवं is equivalent to अविनीतं, 'Badly trained.' 'Badly brought up.' 'Ill-mannered.' अतिस्तब्धं—Analyse अतिशयितं स्तब्धं अतिस्तब्धं दृढं 'Excessively firm.' 'Very strong.' As applied to नीचं जनं, अतिस्तब्धं is equivalent to अतिधृष्टं, 'Very impudent.' 'Excessively rude.' गुणेनापि न नामितं means, ज्याद्वारापि नमयितुमशक्यं, 'Difficult to bend down even for stringing.' दर्शितस्नेहं—Analyse दर्शितः स्नेहः यस्मिन् तत् दर्शितस्नेहं कृतप्रीतिं, 'To which favour was shown.' ईशेन दर्शितस्नेहं means, 'Highly favoured by S'iva.' As applied to नीचं जनं, ईशेन दर्शितस्नेहं means, 'Highly esteemed by a king.' अग्रहं, Expl:—ग्रहीतुमयोग्यं अग्रहं, 'Incapable of holding.' As applied to नीचं जनं, अग्रहं means, विद्यागुत्कर्षोपदेशादिनापि सन्मार्गे व्यापारयितुमशक्यं, 'Incapable of being brought to a right path by sound instructions replete with learning.' अमार्दवं—'He bent that bow which was hard, very strong, difficult to bend down

even for stringing, highly favoured by S'iva, and incapable of being handled like a man of low birth.'

St. 47. चक्रीचकार—Construe कर्णान्तावतंसितनखद्युतिर्दाशरथिः सीताक्रयधनं तद्धनुरादाय चक्रीचकार. कर्णान्ता°—Analyse कर्णस्य श्रोत्रस्य अन्तः कर्णान्तः तस्मिन् कर्णान्ते अवतंसिता कर्णाभरणीकृता नखानां द्युतिः कान्तिर्येन स कर्णान्तावतंसितनखद्युतिः, 'Who had turned the splendour of his nails into an ornament to his ear.' दाशरथिः, Expl:—दशरथस्य गोत्रापत्यं पुमान् दाशरथिः, 'Son of Das'aratha.' सीता°—Analyse सीतायाः क्रयः सीताक्रयः तस्य धनं सीताक्रयधनं, 'Money for the purchase of Sítà.' चक्रीचकार—'The son of Das'aratha, who had turned the splendour of his nails into an ornament for his ear, took up and bent that bow, which was the price for the purchase of Sítà.'

St. 48. ततः—Construe ततो रामस्य यशोघोषणडिण्डिमः चापभङ्गसमुद्भवः त्रासकरो नादः दिशः ससर्प. त्रासकरः—Analyse त्रासं करोतीति त्रासकरः, 'Inspiring terror.' चाप°—Analyse चापस्य भङ्गः चापभङ्गः तस्मात् समुद्भवो यस्य स चापभङ्गसमुद्भवः, 'Having its source in the breaking of the bow.' 'Sprung from the breaking of the bow.' यशोघोषण°—Analyse यशसो घोषणं यशोघोषणं तस्य डिण्डिमः यशोघोषणडिण्डिमः, 'A drum that proclaims his glory.' ततः—'Then a terrior-inspiring sound, sprung from the breaking of the bow and which was a drum that prolaimed the glory of Ráma, pervaded (or filled) the quarters.'

St. 49. क्षेत्र°—Construe गुणस्य क्षेत्रभूमिः अखिला असौ सीतया सहिता वप्रैर्वृता सद्यः फलवती पुरी प्रचकम्पे. क्षेत्रभूमिः—Analyse क्षेत्राणां भूमिः क्षेत्रभूमिः, 'An expanse of land fit to be cultivated.'. गुणस्य क्षेत्रभूमिः means, 'The land that gives birth to virtues (or merits).' सीतया सहिता वप्रैर्वृता means, सीतया जानक्या सहिता वप्रैः नगरप्राचीरैर्वृता, 'Encircled (or surrounded) by the city-rampart including the daughter of Janaka.' When applied to क्षेत्रभूमिः the expression means, सीतया लाङ्गलपद्धत्या सहिता वप्रैः केदारवृतिभिर्वृता, 'The field-land, being furrowed, was environed by the basins for water.' फलवती means, सुखाद्युपलब्धिमती, 'Procuring happiness, and articles of enjoyments.' As applied to क्षेत्रभूमिः, फलवती means, शस्यसमृद्धिमती, 'Possessing richness of corn (i e. rich in corn).' अखिला—When applied to क्षेत्रभूमिः means, अप्रहता, 'Untilled.' 'Uncultivated.' 'Waste.' क्षेत्र°—'The whole of this city, the site that gives birth to merits, which was environed by its ramparts including Sítà and was immediately procuring happiness and articles of enjoyments, began to quake.'

St. 50. रोम°—Construe रोमोद्भेदापदेशेन हृदि अङ्कुरितं हर्षं अश्रुस्रवेण सिञ्चन् महीपतिः मुनिमाह स्म. रोम°—Analyse रोम्णां उद्भेदः स एव अपदेशः रोमोद्भेदापदेशः तेन तादृशेन, 'Under the plea of displaying (*lit.* breaking out of) the bristling of the hair of the body.' अङ्कुरितं *adj.*—'Sprouted.' अश्रुस्रवेण—Analyse अश्रूणां स्रवः अश्रुस्रवः तेन तादृशेन, 'By streaming down of tears.' महीपतिः—Analyse मह्याः पतिः महीपतिः, 'Lord of the earth.' आह स्म—Is equivalent to उवाच or बभाषे. रोम°—'Shedding by the flow of tears the joy sprouted in his mind under the plea of displaying the bristling of the bodily-hair, the lord of the earth began to address the sage.'

St. 51. प्रौढे—Construe यच्चापभङ्गदेयं सीमन्तिनीधनं मे प्रार्णं प्रौढेऽपि वयसि प्रायः तपसि स्पृहां रुणद्धि. चाप°—Analyse चापस्य भङ्गः चापभङ्गः तन देयं चापभङ्गदेयं, 'Fit to be given (or bestowed on) by the breaking of the bow.' प्रार्णं *n.*—'The principal or chief debt.' *Cf.* Páṇi. VI. 1. 89. and the Vàrtika thereto "प्रवत्सतरकम्बलवसनार्णदशानामृणे," 'The वृद्धि is the single substitute when the word ऋण following प्र, वत्सतर, कम्बल, वसन, ऋण and दश.' As प्रार्णं 'principal debt,' वत्सतरार्णम् 'the debt of a steer,' कम्बलार्णम् 'debt of a blanket,' वसनार्णम् 'debt of a cloth,' &c. सीमन्तिनीधनं—Analyse सीम्नोऽन्तः सीमन्तः सोऽस्त्यस्याः सीमन्तिनी। सीमन्तिनीरूपं धनं सीमन्तिनीधनं, 'Money in the form of a female.' *Cf.* Páṇi. VI. 1. 94. and the Vártika thereto "शकन्ध्वादिषु पररूपं वाच्यं." The पररूप subtitution takes place in the case of शकन्धुः &c. As शक + अन्धुः = शकन्धुः, कुल + अटा = कुलटा, सीम + अन्तः = सीमन्तः 'hair;' when not referring to 'hair', the form is सीमान्तः. प्रौढे—'That principal debt of mine, the wealth in the form of a female, which ought to be paid after the breaking of the bow, thwarts, as a rule, the intention of practising the religious austerities even in old age.'

St. 52. तत्—Construe विक्रमक्रयलम्भितं तत् [प्रार्णं] रामस्य दास्यं गतम्। अस्य ह्रस्वद्वितीये ऊर्मिलामपि मे [मया] न्यस्तां विद्धि. विक्रम°—Analyse विक्रमस्य क्रयः विक्रमक्रयः तेन लम्भितं विक्रमक्रयलम्भितं, 'Secured (or obtained) by the price of heroism.' ह्रस्वाद्वतीये—Analyse ह्रस्वेषु द्वितीयः ह्रस्वद्वितीयः तस्मिन् तादृशे, 'On the second of his younger brothers.' ऊर्मिला *f.*—Was the daughter of Janaka, sister of Sítá, wife of Lakshmaṇa and mother of Gandharvì Somadá. तत्—'The chief debt which has been purchased at the price of heroism has now assumed (*lit.* gone to) the servitude of Ráma.' 'Know, O sage, that I have bestowed even my Urmilá on the second (i. e. Lakshmaṇa) of his younger brothers.'

St. 53. शोकाख्यं—Construe अस्य [जनकस्य] वैदेह्याः [संबन्धि] विवाहपरिलम्बजं शोकाख्यं हृच्छल्यं स तपस्यन् अस्तुकारेण निचकर्ष. शोकाख्यं—Analyse शोक एव आख्या यस्य तत् शोकाख्यं, 'Bearing the name of grief.' वैदेह्याः, Expl:—विदेहस्य गोत्रापत्यं स्त्री वैदेही तस्याः वैदेह्याः, 'Relating to (or pertaining to) Vaidehí.' 'About Vaidehí.' विवाह°—Analyse विवाहस्य परिलंबाज्जातं विवाहपरिलम्बजं, 'Consequent on the delay of marrige.' Sprung from the putting off of her marrige.' हृच्छल्यं—Analyse हृदः शल्यं हृच्छल्यं, 'A dart of the mind.' 'Mental-arrow.' अस्तुकारेण, Expl:—अस्तु इति शब्दः अस्तुकारः तेन अस्तुकारेण, 'By saying 'so be it.' According to some अस्तुं करोतीति अस्तुकारः तेन अस्तुकारेण, 'By an efficacious medicament.' 'By the talismanic power.' अस्तुं is here the *acc.* of अस्तु 'Producing that which the physician promises shall be.' शोकाख्यं—'That sage, who was practising the religious austerities, extracted the dart of his heart, going by the name of grief consequent on the delay of the marriage of Vaidehì, by an efficacious medicament (or by a talismanic elixir)'.

St. 54. अथ—Construe अथ राजद्वयमनोरथः अन्यराजन्यप्रीतिप्रशमनो दूतास्थितो रथः अयोध्यां प्रायात्. दूतास्थितः—Analyse दूतैः आस्थितः दूतास्थितः, 'Occupied by the messengers.' राज°—Analyse राज्ञोः द्वयं राजद्वयं तस्य मनोरथः राजद्वयमनोरथः, 'A vehicle of the mind of both the kings.' अन्य°—Analyse अन्ये ये राजन्याः तेषां प्रीतिं प्रशमयतीति अन्यराजन्यप्रीतिप्रशमनः, 'Pacifying (or tranquilizing) the fondness (for Sítá) of other princes.' अथ—'Then a car, the vehicle of the mind of both the kings, occupied by the messengers and pacifying the fondness (for Sìtà) of other princes, was sent to Ayodhyá.'

St. 55. यत्—Construe रघुपतिरूपनिर्जितः [रामरूपेण निर्जितोऽपि] असौ [मदनः] वैलक्ष्यक्षतकृतसंमदावसादः [लज्जाघातकृतहर्षनाशो] यत्नासीत् [यन्नाभूत्] तद्भूतभर्त्रा [शङ्करेण] लालाट्यज्वलनरयेण [स्वीयभालस्थवह्निदाहेन । करणेन] हृदयभुवः [मनोभुवः] नैरात्म्यं [अनङ्गत्वं] शिवाय [कल्याणाय] सृष्टं [कृतं]. रघुपति°—Analyse रघूणां पतिः रघुपतिः तस्य रूपेण सौन्दर्येण निर्जितः रघुपतिरूपनिर्जितः, 'Put to shame by the extraordinary beauty of the lord of the Raghus.' वैलक्ष्य°—Analyse वैलक्ष्यस्य क्षतं तेन कृतः संमदस्य अवसादः यस्य स वैलक्ष्यक्षतकृतसंमदावसादः, 'Having want of energy (or joy) consequent on the sore of disgrace (or unnaturalness).' लालाट्य°—Analyse ललाटे भवः लालाट्यः । लालाट्यः यः ज्वलनः वह्निः तस्य रयः दाहः तेन लालाट्यज्वलनरयेण, 'By the flame of the fire of forehead.' भूतभर्त्रा—Analyse भूतानां भर्ता भूतभर्ता तेन भूतभर्त्रा, 'By the lord of the evil-

beings.' 'By S'iva.' नैरात्म्यं—Analyse निर्गतः आत्मा यस्य स निरात्मा तस्य भावः नैरात्म्यं, 'Bodilessness.' 'Non-existence.' (निरात्मा means, 'having no separate soul or no individual existence'). हृदयभुवः—Analyse हृदये भूः उत्पत्तिर्यस्य स हृदयभूः तस्य हृदयभुवः मनोभुवः, 'Of the mind-born.' 'Of the fancy-born.' The metre of this and the next two verses is प्रहर्षिणी, which is thus defined :—"म्नाशाभिर्मनजरगाः प्रहर्षिणीयम्." The Gaṇas are, म न ज र and a long syllable, Translate:—'That there was no want of joy (or energy) consequent on the sore of disgrace in Madana though he was put to shame by the extraordinary beauty of the lord of the Raghus, was due to the boon of non-existence conferred on the mind-born god by the lord of evil-beings when he burnt him by the flame of the fire of his forehead.'

St. 56. पीन°—Construe पीनांसः विशालः उरस्तटः क्षामं मध्यमं तच्छरीरं नियतं व्यथयति इति धात्रा स्वयमनुचिन्त्य अस्य देहः लम्बबाहुस्तम्भाभ्यां दृढं यन्त्रितः इव. पीनांसः—Analyse पीनौ अंसौ यस्य स पीनांसः, 'Having fleshy shoulders.' 'Having fat shoulders.' उरस्तटः—Analyse उरसः तटः उरस्तटः, 'Possessing sloping globes of breast.' लम्बबाहु°—Analyse लम्बौ च तौ बाहू च लम्बबाहू तावेव स्तम्भौ लम्बबाहुस्तम्भौ ताभ्यां लम्बबाहुस्तम्भाभ्यां, 'By means of pillars of long arms.' पीन°—'The broad slopes of the breast associated with the fleshy shoulders may (perhaps) decidedly inflict pain on the thin middle part of that body : with this thought in his mind the Creator, as it were, firmly bound up his body by means of the pillars (or props) of long arms.'

St. 57. नेत्र°-Construe उष्णद्युतिकरकुंकुमानुलिप्तः व्याकोशारुणवनजप्रभाविशेषः तेन नेत्रान्ताधरकरपल्लवप्रभाभिः निर्जित्य पादयोः अधस्ताद् आहितः इव. नेत्र°-Analyse नेत्रयोः अन्तौ नेत्रान्तौ। नेत्रान्तौ च अधरश्च करपल्लवश्च नेत्रान्ताधरकरपल्लवाः तेषां प्रभाः नेत्रान्ताधरकरपल्लवप्रभाः ताभिः तादृशीभिः, 'By the splendour of sprout-like hands, lower lip, and the extremities of eyes.' उष्ण°—Analyse उष्णद्युतेः रवेः कराः रश्मयः त एव कुङ्कुमं तेन अनुलिप्तः उष्णद्युतिकरकुङ्कुमानुलिप्तः, 'Besmeared with the saffron-paste consisting of the rays of the sun.' व्याकोश°—Analyse वने जले जातानि वनजानि कमलानि। अरुणानि रक्तानि तानि वजनानि अरुणवनजानि। व्याकोशानि विकसितानि यानि अरुणवनजानि व्याकोशारुणवनजानि तेषां प्रभायाः विशेषः व्याकोशारुणवनजप्रभाविशेषः, 'Excellent splendour of the full-blown red lotuses.' नेत्र°—'After having eclipsed the excellent splendour of the full-blown red lotuses enveloped in the saffron-powder of the rays of the sun, by means of the splendour of sprout-like hands, netherlip and

the extremities of his eyes, he, as it were, put it under the soles of his feet.'

St. 58. ज्ञानं—Construe विलोचनं ज्ञानं चेति विमलवृत्तिगुणस्वभावे तदीये प्रथिते उभे नेत्रे [स्तः] । तयोरेकं श्रुतिपथस्य समीपमात्रं यातम् । अन्यत् [च] अखिलश्रुतिपारं प्रपन्नं. विमल°—Analyse वृत्तिश्च गुणश्च स्वभावश्च वृत्तिगुणस्वभावाः । विमलाः वृत्तिगुणस्वभावाः ययोः ते विमलवृत्तिगुणस्वभावे, 'Possessing clean (or spotless) movement, quality and nature.' श्रुति°—Analyse श्रुत्योः पन्थाः श्रुतिपथः तस्य श्रुतिपथस्य, 'Of the range of the ear.' समीपमात्रं—Analyse सङ्गताः आपः यस्मिन् तत् समीपम् । समीपमेव समीपमात्रं, 'Very close.' 'Very near.' अखिलश्रुतिपारं—Analyse अखिलाश्च ताः श्रुतयश्च अखिलश्रुतयः तासां पारं अखिलश्रुतिपारं, 'To the other end of all Vedas.' The metre of this and the next verse is वसन्ततिलकं. For the definition and its Gaṇas see notes on V. 61. विलोचनं ज्ञानं चेति विमलवृत्तिगुणस्वभावे तदीये पथिते उभे नेत्रे स्तः—'Knowledge and the विलोचन (i. e. the eye) both these are his celebrated eyes, having clean (or spotless) movement, quality and nature.' तयोरेकं श्रुतिपथस्य समीपमात्रं यातं—'One of these two (i. e. the physical eye) has gone to the nearest range of his ear (i. e. he had long eyes).' *Cf.* R. IV. 13. "कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने । चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना." अन्यत् [च] अखिलश्रुतिपारं प्रपन्नं—'And the other has reached the other end of all the Vedas (i. e. the mental eye).'

St. 59. इत्थं—Construe इत्थं वराश्रयकथेषु जनेषु [सत्सु] घर्मसलिलास्पदगण्डलेखा सीता शशिनिर्मलदन्तकान्तिज्योत्स्नानिषिक्तदशनच्छदपल्लवेन नम्रेण मुखेन तस्थौ. वराश्रयकथेषु—Analyse वरमाश्रयतीति वराश्रयाः । वराश्रयाः कथाः येषां ते वराश्रयकथाः तेषु तादृशेषु, 'Narrating of the stories relating to (or referring to) the bridegroom.' घर्म°—Analyse घर्मात् सलिलं घर्मसलिलम् घर्मसलिलं आस्पदं घर्मसलिलास्पदं तदेव गण्डयोः लेखा यस्याः सा घर्मसलिलास्पदगण्डलेखा, 'Having (or bearing) the line on her cheek the site of the perspiration from heat.' शशि°—Analyse शशिनः इव निर्मला दन्तानां कान्तिरेव ज्योत्स्ना तया निषिक्तः दशनच्छदः एव पल्लवो यस्य तत् शशिनिर्मलदन्तकान्तिज्योत्स्नानिषिक्तदशनच्छदपल्लवं तेन तादृशेन, 'Possessing sprout-like lips sprinkled over with the moon-light splendour of white teeth resembling the moon.' इत्थं—'While the people were thus narrating the stories relating to the bridegroom, Sitá, bearing the line on her cheek which was the site of the perspiration from heat, stood with her face hung down, displaying the sprout-like lips sprinkled over with the moon-light splendour of white teeth resembling the bright moon.'

CANTO VII.

St. 1. ततः—Construe ततः सा धरित्रीतनया गुरोः अलङ्घ्यं [अत एव] गरीयः शासनं प्राप्य स्थपत्यशुद्धान्तजनैः परीता [सती] व्रतिनो नमस्यां कर्तुं जगाम. धरित्रीतनया—Analyse धरित्र्याः तनया धरित्रीतनया, 'The daughter of the earth,' (i. e. सीता). धरित्रीतनया [or सीता] was the daughter of Janaka, king of Mithilá. She is called earth-born, as having been turned up from the soil of a piece of land specially reserved for sacrifices by a plough (देवयजनसंभवा). She was married to Ràma and accompnied him to the wilderness. While there Rávaṇa carried her off by force to Lankà. She scornfully rejected the address of Rávaṇa who tried to violate her chastity. She was finally rescued by Ràma, but had to pass through a severe ordeal before she was received by her husband. She was again repudiated by Ràma while in an advanced condition of pregnancy (कठोरगर्भा). She then took refuge with Vàlmîki and at his hermitage was delivered of कुश and लव whom the sage brought up. अलङ्घ्यं, Expl:—लंघितुमशक्यं अलङ्घ्यं, 'Inviolable.' 'Not to be transgressed.' 'Venerable.' स्थपत्य *m.* [or स्थपति *m.*]—'A guard or attendant of the women's apartment.' 'A chamberlain.' स्थपत्यशुद्धान्तजनैः—Analyse शुद्धान्ते जनाः शुद्धान्तजनाः । स्थपत्याश्च ते शुद्धान्तजनाश्च स्थपत्यशुद्धान्तजनाः तैः तादृशैः, 'By chamberlains and attendants in the inner apartments of the palace of a king.' नमस्या *f.*—'Adoration. The metre of this canto is उपजाति. For definition &c, see notes on I. 1. ततः—'Then after having received the important and inviolable order from her sire that daughter of the earth, surrounded by the chamberlains and attendants in the inner apartments of the palace, proceeded to adore the sage (*lit.* to do the adoration of the ascetic).'

St. 2. सुखेन—Construe गजकुम्भपीनस्तनावकृष्टा [सा] महर्षेः चरणौ सुखेन नत्वा भूयः तमेव भरमुद्वहन्ती यत्नं प्रतिपद्य समुन्ननाम. गज°—Analyse गजस्य कुम्भौ गजकुम्भौ ताविव पीनौ स्तनौ ताभ्यां अवकृष्टा गजकुम्भपीनस्तनावकृष्टा, 'Bent down by the full-breats resembling the temples of an elephant.' महर्षेः—Analyse महांश्चासौ ऋषिश्च महर्षिः तस्य तादृशस्य, 'Of the great sage.' सुखेन°—After having easily, bowed down at the feet of the great sage, she, bent down by the full-breasts resembling the temple-

sides of an elephant again bearing that very burden, rose up with great efforts (*lit.* having recourse to efforts).'

St. 3. सत्यं—Construe यद् अस्याः प्रविभाव्यरागो दृष्टिप्रवेकः कृष्णवर्त्मा सत्यं खलु । तद् [तस्माद्] धनदोपमस्य भर्तुः स्नेहेरितं धैर्यन्धनं [सा सीता] तेन [कृष्णवर्त्मना] ददाह. प्रविभाव्यरागः—Analyse प्रकर्षण विभाव्यः प्रविभाव्यः । प्रविभाव्यो रागो यस्मिन् स प्रविभाव्यरागः, 'Betraying a highly remarkable love.' 'Betraying a clear indication of love.' When applied to कृष्णवर्त्मा the compound means, 'Having its red flame plainly visible.' दृष्टिप्रवेकः—Analyse दृष्टेः प्रवेकः दृष्टिप्रवेकः, 'The most excellent side-glances.' प्रवेकः, Expl:-प्रविच्यते इति प्रवेकः, 'Most excellent.' 'Chief.' 'Choicest.' Derived from विच् *vt.* 7. U. (अनिट्), 'To divide.' 'To separate.' कृष्णवर्त्मा, Expl:—कृष्णो धूमो वर्त्मास्य, 'Fire which leaves behind a black track.' स्नेहेरितं-Analyse स्नेहेन ईरितं स्नेहेरितं 'Arising from love.' Directed through love. 'When applied to कृष्णवर्त्मा the compound may be analysed as, स्नेहेन तैलेन ईरितं वर्धितं, 'Made larger by pouring oil.' धनदोपमस्य—Analyse धनदः कुबेरः उपमा यस्य धनदोपमः तस्य तादृशस्य, 'Resembling the lord of wealth.' 'Like the lord of wealth,' i. e. Kubera. धैर्येन्धनं-Analyse धैर्यमेव इन्धनं धैयन्धनं, 'Fuel in the form of patience.' Translate:—'Since her excellent glances, manifesting love, were in truth fire itself; therefore, she, with them, consumed the fuel in the form of patience, directed through love, of him who resembled the lord of wealth.'

St. 4. विन्यस्त°—Construe विन्यस्तपीनस्तनहेमकुम्भा तद्धृदयोपकार्या मनोभुवः तत्प्रथमप्रवेशे स्वेदाम्बुभिः सिक्तापि तत्र रजो नो शशाम. विन्यस्त°—Analyse पीनौ च स्तनौ च पीनस्तनौ । हेम्नः कुम्भौ हेमकुम्भौ । विन्यस्तौ पीनस्तनावेव हेमकुम्भौ यस्यां सा विन्यस्तपीनस्तनहेमकुम्भा, 'In which are fixed the golden pitchers of full breasts'. *Cf.* R. II. 36. "यो हेमकुम्भस्तननिःसृतानां." स्वेदाम्बुभिः—Analyse स्वेदस्य अम्बूनि स्वेदाम्बूनि तैः तादृशैः, 'By the water of sweat.' तद्धृदयोपकार्या-Analyse तस्याः हृदयमेव उपकार्या तद्धृदयोपकार्या, 'A royal tent or palace made of her heart.' मनोभुवः—Analyse मनसि भूः उत्पत्तिर्यस्य स मनोभूः तस्य तादृशस्य, 'Of the mind-born god.' 'Of the fancy-born god.' तत्प्रथमप्रवेशे—Analyse प्रथमश्चासौ प्रवेशश्च प्रथमप्रवेशः स एव प्रथमप्रवेशः तत्प्रथमप्रवेशः तस्मिन् तादृशे, 'That only was the first admission.' 'That only was the first entrance.' At the time of marriage when a bridegroom gets the first admission into the house of a bride the gates of the mansions are generally decorated with arches, and garlands of flowers. The ground on the outside of the door is generally sprinkled over with sandal-water and on it figures are marked with the powder

of pearls or of powdered white-stones (रांगोळी) intermixed with the powder of turmeric, saffron powder, गुलाल or red powder, बुक्का or fragrant black powder, and the female servants are stationed on both the sides of the door with golden-pitchers full of water, cocoanuts and auspicious lamps and other things in their hands in order to receive the bridegroom. रजस् *n.*—'Dust or passion.' 'Menstrual excretion.' Translate:—'The dust of passion (lying on the ground) of the royal tent of her heart in which were fixed the golden pitchers of full breasts, though sprinkled over with the water of her sweat, did not settle down, because that only was the first admission of the mind-born god.'

St. 5. तुष्टः—Construe अविपन्नधाम्नः शैवस्य चापस्य भंगात् सुबाहुशत्रुं आलिंग्य स्मरः तुष्टो नु । विशालदृश्या तया प्रयुक्तः [प्रेरितः सन्] तं विहस्तं चक्रे नु. अविपन्नधाम्नः—Analyse न विपन्नं अविपन्नं । अविपन्नं धाम यस्य स अविपन्नधामा तस्य तादृशस्य, 'Having power (i. e not contaminated or uninjured).' शैवस्य, Expl:-शिवस्य अयं शैवः तस्यः तादृशस्य, 'Of one which belongs to S'iva.' सुबाहुशत्रुं—Analyse सुबाहुर्नाम मारीचसहचरो रक्षोविशेषः तस्य शत्रुं रामभद्रं, 'To the enemy of Subàhu a favourite general of मारीच' (i e. Ràma). विहस्तं—Analyse विगतः हस्तः यस्य स विहस्तः प्रतिपत्तिमूढः तं तादृशं, 'Handless.' 'Helpless.' 'Confounded.' विशालदृश्या–Analyse विशाला दृष्टिर्यस्याः सा विशालदृष्टिः तया तादृश्या, 'By her having long eyes.' 'By her having large eyes.' अविपन्नधाम्नः शैवस्य चापस्य भङ्गात् सुबाहुशत्रुमालिङ्ग्य स्मरस्तुष्टो नु—'Was the god of love pleased after having embraced the enemy of Subáhu, when he broke the bow of S'iva having its power uninjured?' विशालदृष्ट्या तया प्रयुक्तः सन् तं विहस्तं चक्रे नु—'Or impelled by her of large eyes was he made helpless?'

St. 6. विधातृ°—Construe विधातृमुख्यैरपि दृश्यरूपं तस्याः रूपं अर्धनिरीक्षितेन निरूप्य मनस्वी गुण्यः स भूम्ना मनसैव एवं गणयाम्बभूव. विधातृमुख्यैः—Analyse विधाता मुख्यो येषु ते विधातृमुख्याः तैः तादृशैः, 'By those among whom the god ब्रह्मा is the best.' 'By the principal gods like ब्रह्मा.' दृश्यरूपं, Expl:—प्रशस्तं रूपं दृश्यरूपं, 'Covetingly marked.' 'Marked with great interest.' *Cf.* Páṇi. V. 3. 66: "प्रशंसायां रूपप्." 'The affix रूपप् (रूप) comes without change of connotation after a stem (nominal or verbal) denoting praise.' 'As वैयाकरणरूपः 'a celebrated grammarian.' अर्धनिरीक्षितेन—Analyse अर्धं च तद् निरीक्षितं च अर्धनिरीक्षितं तेन तादृशेन, 'With a side-long glance.' एवं = वित्रक्षमाणं. गुण्यः, Expl:—प्रशस्ताः गुणाः सन्ति अस्य स गुण्यः, 'Endowed with virtues.' मनस्विन् *m.*, Expl:—प्रशस्तं मनोऽस्त्यस्य, 'High minded.' 'Strong-

minded.' ' *Cf.* Pāṇi. V. 2. 121. "अस्मायामेधास्रजो विनिः" ' After a stem ending in अस्, and after माया, मेधा and स्रज् comes the affix विनि (विन्) in the sense of मतुप् (possessive affixes indicating greatness, deprecation, praise &c). *Vide* Si. Kau. " भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संबन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः". Translate:—'After having seen, with a side-long glance her natural beauty covetingly marked even by principal gods like ब्रह्मा, that strong-minded prince, endowed with special virtues, considered the following about her, simply by his mind, of high character.'

St. 7. प्रसीद—Construe प्रसीद ते वदनामृतांशुः अखण्डं ताराधिपं एवं मा परिभूद् इति तारातति: प्रियायाः दीप्रनखच्छलेन पादे पतिता इव. अखण्डं—Analyse अविद्यमानः खण्डः यस्य स अखण्डः तं अखण्डं, ' Not frgmentary.' ' Entire.' ' Whole.' ताराधिपं—Analyse ताराणां अधिपः ताराधिपः तं तादृशं, ' The ruler of the stars.' ' The moon.' वदनामृतांशुः—Analyse अमृताः अंशवः यस्य स अमृतांशुः । वदनमेव अमृतांशुः वदनामृतांशुः, "The face-moon.' तारातति:—Analyse ताराणां ततिः तारातति:, ' A cluster of stars.' दीप्र°—Analyse दीप्राणि च तानि नखानि च दीप्रनखानि तेषां छलः तेन तादृशेन, ' Under the plea of bright nails.' दीप्र—'Bright,' 'brilliant.' *Cf.* Pâṇi. III. 2. 167. "नमिकम्पिस्म्यजसकमहिंसदीपो रः," ' The affix र comes in the sense of ' the agent having such a habit &c' after the verbs नम् ' to bow,' कम्प् ' to shake,' स्मि ' to smile,' अजस् ' not to cease,' कम् ' to desire,' हिंस् 'to injure,' and दीप् ' to shine.' Thus, नम्रं काष्ठं ' soft wood;' कम्प्रा शाखा 'shaking branch;' स्मेरं मुखं 'smiling face;' अजस्रं जुहोति ' he sacrifices perpetually;' कम्रा युवतिः ' a beautiful maiden;' हिंस्रं रक्षः ' the injuring राक्षस;' दीप्रं काष्ठं 'brilliant wood.' प्रसीद—' Be kind: let not thy face-moon thus bring disgrace on the entire ruler of the stars.' 'With this thought the cluster of stars, as it were, prostrated before the feet of my beloved under the plea of bright nails.'

St. 8. कृष्ट्वा–Construe कृशवृत्तिमध्यं नितान्तं कृष्ट्वा गुर्वी श्रोणिः मास्म च्छिनद् इति प्रचिन्त्य विधात्रा तदूरुद्वयशातकौम्भस्तम्भद्वयेन धृता इव. कृशवृत्तिमध्यं–Analyse कृशा वृत्तिर्यस्य तत् कृशवृत्ति । कृशवृत्ति च मध्यं च कृशवृत्तिमध्यं, ' Naturally thin round waist.' तदूरुद्वय°—Analyse ऊर्वोर्द्वयं ऊरुद्वयम् । तस्याः ऊरुद्वयं तदूरुद्वयम् । तदेव शातकौम्भस्य स्तम्भद्वयं तदूरुद्वयशातकौम्भस्तम्भद्वयं तेन तादृशेन, ' By means of a pair of golden props made of her two thighs'. शातकौम्भ *n.* Expl:- शतकुम्भे पर्वते भवं शातकौम्भं, ' Gold.' *Cf.* Pāṇi. IV. 3. 53. "तत्र भवः," ' An affix अण् comes after a word in the 7th case in construction, in the sense of 'who stays there.' Also VII. 3. 20. "अनुशतिकादीनां च," ' Before a Taddhita affix having an indicatory ञ्, ण् or क् the वृद्धि

is substituted before the first vowel of both members of the compounds अनुशतिक &c.' According to the list given in the अनुशतिकगण the formation should be शतकुम्भे भवं शातकौम्भं and not शातकुम्भम्. क्षीरस्वामी one of the oldest commentators on अमरकोश also supports the reading of our Mss. A. B. C. कृष्ट्वा—'After having exceedingly lessened (or tightened) the naturally thin round waist, with the thought that the large hips should not be separated from it, the Creator supported it, as it were, by means of a pair of golden props made of her two thighs.'

St. 9. तत्—Construe सोष्मं प्रकृत्या कठिनं स्तनयोर्द्वयं यत् तापं तनोति तदस्तु । अनिन्द्यवृत्तेः [अस्याः] मध्यस्थमपि एतद् वलित्रयं मां दहति इति चित्रं. सोष्मं—Analyse उष्मेण सह सोष्मं, 'Warm.' मध्यस्थं—Analyse मध्ये तिष्ठतीति मध्यस्थं, 'Standing or being in the middle.' 'Neutral,' 'Belonging to neither party or both parties'. अनिन्द्यवृत्तेः—Analyse अनिन्द्या वृत्तिर्यस्याः सा अनिन्द्यवृत्तिस्तस्याः तादृश्याः, 'Of a faultless conduct.' 'Of a faultless mode of life.' वलित्रयं -Analyse वलीनां त्रयं वलित्रयं, 'A collection of three natural folds or lines on the skin of the belly.' Translate:— 'Let it be that the pair of breasts, naturally hard and warm, drag (or push) me to burning pain; but that these natural folds on the skin of the belly of her of faultless conduct, though standing in the middle (neutral or indifferent) burn me is (no doubt) a wonder.'

St. 10. स्तनौ—Construe सुदत्याः निःशेषवक्षस्तटबद्धबिम्बौ स्तनौ कुम्भप्रतिमौ नु । नवयौवनस्य पीनौ पिण्डौ शरीराद् अतिरिक्तवन्तौ न्यस्तौ नु. कुम्भप्रतिमौ—Analyse कुम्भौ प्रतिमा प्रतिबिम्बं ययोस्तौ तादृशौ, 'Reflected images of pitchers.' सुदत्याः—Analyse शोभनाः दन्ताः यस्याः सा सुदती तस्याः सुदत्याः, 'Of one having a beautiful set of teeth.' निःशेष°—Analyse निःशेषो यो वक्षसः तटः तस्मिन् बद्धौ बिम्बौ याभ्यां तौ तादृशौ, 'The orbs of which have been fixed on the entire surface of the chest.' नवयौवनस्य—Analyse नवं च तद् यौवनं च नवयौवनं तस्य तादृशस्य, 'Of the fresh youth.' अतिरिक्तवन्तौ—Analyse अतिशयेन रिक्तवन्तौ अतिरिक्तवन्तौ, 'Left with or as a surplus.' 'Left apart.' 'Redundant.' सुदत्याः निःशेषवक्षस्तटबद्धबिम्बौ स्तना कुम्भप्रतिमौ नु—'Are these breasts of the bride, having beautiful set of teeth, the orbs of which have been fixed on the entire surface of the chest, the reflected images of pitchers ?' नवयौवनस्य पीनौ पिण्डौ शरीराद् अतिरिक्तवन्तौ न्यस्तौ नु—'Or are these the fleshy lumps (or balls) of fresh youth kept aside from the body as being redundant portions ?'

St. 11. विभाति—Analyse तन्व्याः शरीरजन्मानलधूमरेखा नवरोमराजिः अन्योन्यबाधिस्तनमण्डलस्य मध्यस्य धात्रा विहिता सीमेव विभाति. *Cf.* Ku. I. 38, 39, 40. तस्याः प्रविष्टा नतनाभिरन्ध्रं रराज तन्वी नवरोमराजिः । नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ॥ ३८ ॥ मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला । आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् ॥ ३९ ॥ अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम् । मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥ ४० ॥ नवरोमराजिः—Analyse नवा रोम्णां राजिः नवरोमराजिः, 'The line of the fresh bodily hair.' शरीर°—Analyse शरीरे जन्म यस्य स शरीरजन्मा । शरीरजन्मा चासौ अनलश्च शरीरजन्मानलः तस्य धूमस्य रेखा शरीरजन्मानलधूमरेखा, 'A line of smoke of the fire in the form of the body-born' i. e. Kàma. अन्योन्य°—Analyse स्तनयोः मण्डलं स्तनमण्डलम् । अन्योन्यं बाधते इति अन्योन्यबाधि । अन्योन्यबाधि च तद् स्तनमण्डलं च अन्योन्यबाधिस्तनमण्डलं तस्य तादृशस्य, 'Of the orbs of breasts that press each other.' विभाति—'A row of the fresh hair on the body of the beautiful girl which was a line of smoke of the fire in the form of the body-born (i. e.Káma) seems, as it were, a boundary made by the Creator, of the middle part of the orbs of breasts which were pressing each other.'

St. 12. याति—Construe विवृद्धदीप्तिः एष अङ्गदोऽपि यत्र न्यसनेन अनङ्गदत्वं याति । चारुप्रकोष्ठस्य भुजद्वयस्य मदनस्य दाने तथा हि शक्तिः. अङ्गदः, Expl:—अङ्गं दयते । दायति द्यति वा इत्यङ्गदः. Either derived from दे *vt.* I A. (अनिट्) 'To protect', 'to guard,' or from दै *vt.* or *vi.* I. P. (अनिट्) 'To purify 'to cleanse', or from दो *vt.* 4. P. (अनिट्) 'To cut.' 'To mow'. *Cf.* Páṇi. III. 2. 3. विवृद्धदीप्तिः—Analyse विवृद्धा दीप्तिर्यस्य स विवृद्धदीप्तिः, 'Having the splendour enhanced.' अनङ्गदत्वं—Analyse न अङ्गदः अनङ्गदः तस्य भावः अनङ्गदत्वम् । इत्यर्थेन विरोधः । 'Absence of अङ्गद (arm-let).' अनङ्गं मदनं ददातीति अनङ्गदः तस्य भावः अनङ्गदत्वम् । इत्यर्थेन विरोधपरिहारः । 'The condition of exciting passion.' चारुप्रकोष्ठस्य—Analyse चारुः प्रकोष्ठः यस्य स चारुप्रकोष्ठः तस्य तादृशस्य, 'Of one having beautiful fore-arms.' भुजद्वयस्य-Analyse भुजयोर्द्वयं भुजद्वयं तस्य तादृशस्य, 'Of the pair of arms.' याति—'Even the arm-let, with its splendour enhanced attains the state of exciting love by being placed on her arms; for that pair of arms, having beautiful fore-arms, possesses such power in rousing passion.'

St. 13. वक्त्रेन्दु°—Construe चन्द्रः अस्याः वक्त्रेन्दुलीलां अनुयातुं कलान्तराणि प्रतिपद्य पूर्णोऽपि साधर्म्यविशेषशून्यः [सन्] शोकादिव क्रमेण हानिं याति. वक्त्रेन्दुलीलां—Analyse वक्त्रमेव इन्दुः वक्त्रेन्दुः तस्य लीला वक्त्रेन्दुलीला तां तादृशीं, 'The play of the face-moon.' कलान्तराणि—Analyse अन्याः कलाः कलान्तराणि, 'Different digits or different phases.' साधर्म्य°—Analyse साध-

र्म्यस्य विशेषः साधर्म्यविशेषः तेन शून्यः साधर्म्यविशेषशून्यः, 'Void of the excellence of common character.' 'Void of the excellence of the community of property (or common property).' क्रमेण शोकाद् हानिं यातीव—' Gradually he goes to decay as if through grief. ' वक्त्रेन्दु°—'In order to imitate the play of her face-moon, the moon, having attained the different phases and thus though full, being void of the excellence of the common property (with her face), gradually goes to decay as if through grief. '

St. 14. मृगाङ्गनानां—Construe पूर्वं मृगाङ्गनानां नयनानि नीलानि नीरजानि च विधाय कृतप्रयोगेण विधात्रा आयताक्ष्याः नेत्रद्वयं पुनः सृष्टं नु. मृगाङ्गनानां—Analyse मृगानां अङ्गनाः मृगाङ्गनाः तासां मृगाङ्गनानां, 'Of the female antelopes.' नीरजानि—Analyse नीराज्जलाज्जातानि नीरजानि, 'Sprung from water (i. e. lotuses).' कृतप्रयोगेणः—Analyse कृतः प्रयोगः येन स कृतप्रयोगः तेन तादृशेन, 'By one who had made the experiments.' नेत्रद्वयं—Analyse नेत्रयोर्द्वयं नेत्रद्वयं, 'A pair of eyes.' आयताक्ष्याः—Analyse आयते अक्षिणी यस्याः सा आयताक्षी तस्याः आयताक्ष्याः, 'Of the long-eyed damsel.' मृगाङ्गनानां—' First, after having created the eyes of the female-deer and then the blue-lotuses sprung from water, was it that the pair of eyes of that long-eyed damsel was again created by the Creator who had (already) made the experiments ?'

St. 15. अन्वेति—Construe अस्याः कमनीयं आयतनम्रलेखं भ्रुवोर्युगमं हरेण रोषेण मध्ये कृत्तस्य मन्मथकार्मुकस्य छेदद्वयं कान्त्या अन्वेति. आयतनम्रलेखं—Analyse आयता नम्रा लेखा यस्मिन् तद् आयतनम्रलेखं, 'The lines in which were long and bent down at points.' छेदद्वयं—Analyse छेदस्य द्वयं छेदद्वयं, 'A pair of the portion that was cut.' मन्मथ°—Analyse मन्मथस्य कार्मुकं मन्मथकार्मुकं तस्य तादृशस्य, 'Of the bow of the god of love.' कार्मुक *n.*, Expl:—कर्मणे प्रभवतीति कार्मुकं, 'A bow.' *Cf.* Pāṇi. V. 1. 103. "कर्मणि उकञ्" 'The affix उकञ् (उक) comes after the word कर्मन् in the same sense of 'able to effect that.' This debars ठञ्. As कर्मणे प्रभवति = कार्मुकं धनुः. This word कार्मुकं means always a 'bow,' and is never employed to designate anything else. अन्वेति—' Her charming pair of eyebrows the lines in which were long and bent down at points, imitates, in loveliness, two pieces of the bow of the god of love, cut down in the middle by S'iva in wrath. '

St. 16. असर्पतां—Construe अस्याः भ्रुवौ आपतितालकान्तपर्यन्तकान्ति श्रुतिमूलं अक्ष्णोः तरलत्वं वक्तुं असर्पतां नु । इमे दृष्टी भ्रूयुगमकौटिल्यं वक्तुं असर्पतां नु. आपतिताल°—Analyse अलकानां अन्ताः अलकान्ताः । आपतितानां अल-

इदमसंगतम्

कान्तानां पर्यन्ता कान्तिः यस्य तद् आपतितालकान्तपर्यन्तकान्ति, 'Displaying the splendour extending to the ends of hair which were hanging down.' श्रुतिमूलं—Analyse श्रुत्योर्मूलं श्रुतिमूलं, 'Root of the ears.' भ्रूयुग्मकौटिल्यं—Analyse भ्रुवोर्युग्मं भ्रूयुग्मं तस्य कौटिल्यं भ्रूयुग्मकौटिल्यं 'Curliness or crookedness of the pair of eyebrows.' कौटिल्यं, Expl:— कुटिलस्य भावः कौटिल्यं, 'Crookedness or curliness of hair.' अस्याः भ्रुवौ आपतितालकान्तपर्यन्तकान्ति श्रुतिमूलं अक्ष्णोः तरलत्वं वक्तुं असर्पतां नु—'Was it that her eyebrows came to the roots of her ears; having the splendour extending to the ends of hair hanging down, in order to tell the tremulousness of the eyes ?' इमे दृष्टी भ्रूयुग्मकौटिल्यं वक्तुं असर्पतां नु—'Or was it that yonder two eyes of hers came there to speak of the crookedness of the pair of eyebrows ?'

St. 17. तन्व्याः—Construe तन्व्याः मनोज्ञस्वरनैपुणेन विनिर्जितः रोषविलोहिताक्षः अन्यपुष्टः शोकेन प्रसक्तचिन्ताहितं कार्ष्ण्यं वहतीति मन्ये *Cf.* Ku. I. 45. "स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि । अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना ॥" मनोज्ञस्वर°—Analyse मनोज्ञश्चासौ स्वरश्च मनोज्ञस्वरः तस्मिन् नैपुणं तेन तादृशेन, 'By reason of the proficiency in the sweet charming voice.' रोष°—Analyse रोषेण विलोहिते अक्षिणी यस्य स रोषविलोहिताक्षः, 'With his eyes red from anger.' प्रसक्त°—Analyse प्रसक्ता या चिन्ता तया आहितं प्रसक्तचिन्ताहितं, 'Brought on by the constant anxiety.' अन्यपुष्टः—Analyse अन्यैः काकादिभिः पुष्टः अन्यपुष्टः 'Nourished by strangers'. 'Fostered'. 'The Indian cuckoo.' कार्ष्ण्यं, Expl: - कृष्णस्य भावः कार्ष्ण्यं, 'Black colour'. 'Blackness.'. Translate:—'Being entirely vanquished (or eclipsed) by reason of the proficiency in sweet charming voice of the beautiful damsel the cuckoo, I think, wears the black colour, through grief, brought on by constant (heart-corroding) anxiety.'

St. 18. पुष्पायुधः—Construe सीताकृति रत्नं वीक्ष्य पुष्पायुधः स्वात्मनि शस्त्रपातान् कुर्वीत । यदात्मयोनेरशुधानां मयि तीव्रा व्यापृतिः तत्र चित्रीयते. *Cf.* Ku. VII. 67. "न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य । व्रीडादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः" ॥ पुष्पायुधः—Analyse पुष्पाण्येव आयुधं यस्य स पुष्पायुधः, 'Flower-armed god.' शस्त्रपातान्—Analyse शस्त्राणां पाताः शस्त्रपाताः तान् तादृशान्, 'Strokes or fall of weapons.' सीताकृति—Analyse सीतायाः आकृतिः यस्मिन् तत् सीताकृति, 'Having the form of Sitâ.' चित्रीयते—*Denom. 3rd per. sing.* (चित्रमाश्चर्यं करोति) 'To cause wonder.' 'To wonder.' सीताकृति रत्नं वीक्ष्य पुष्पायुधः स्वात्मनि शस्त्रपातान् कुर्वीत—'After seeing the jewel in the form of Sitâ the flower-armed god should fitly direct the strokes of weapons towards

himself.' यदात्मयोनेरायुधानां मयि तीव्रा व्यापृतिः तन्न चित्रीयते—'That there should be a fierce hurling of weapons of the self-born (i. e. Kàma) on me is no matter for wonder.'

St. 19. सति—Construe तस्य अतिगुरुप्रतर्के चेतसि सत्यथ नरेन्द्रः मुनिं प्राह स्म। भवतः स्नुषा तीर्थादनूनौ पादौ प्रणम्य शुद्धान्तमुपैतीति. अतिगुरुप्रतर्के—Analyse अतिशयितः गुरुः प्रतर्कः यस्मिन् तत् अतिगुरुप्रतर्कं तस्मिन् तादृशे, 'Having very great serious thoughts.' नरेन्द्रः—Analyse नराणां इन्द्रः नरेन्द्रः 'The lord of people.' तीर्थात्, Expl:—तीर्यते इति तीर्थं or तीर्यते अनेन वा तीर्थं तस्मात् तादृशात्, 'From a holy place.' Derived from तॄ *vt.* 1. P. (सेट्) 'To cross over.' *Cf.* Uṇàdisûtra "पातृतुदिवचिरिचिसिचिभ्यस्थक्." स्नुषा, Expl:—स्नौतीति स्नुषा, 'A daughter-in-law.' Derived from स्नु *vi.* 2. P (सेट्) 'To drip,' 'to trickle,' 'to flow.' *Cf.* Uṇàdisûtra "स्नुव्रश्चिकृत्यृषिभ्यः कित्." तस्य अतिगुरुप्रतर्के चेतसि सत्यथ नरेन्द्रः मुनिं प्राह स्म—'When such (as described before) serious thoughts were passing in his mind, the lord of the people spoke the following words to the sage.' भवतः स्नुषा तीर्थादनूनौ पादौ प्रणम्य शुद्धान्तमुपैतीति—'Your daughter-in-law saluting your feet, not inferior to a sacred pool, will proceed to the inner apartment of the palace.'

St. 20. कलत्र—Construe कलत्रभारेण तथा कुचद्वयस्य स्थाम्ना मन्थरविक्रमायास्तस्याः गतिमन्थरत्वे सोऽसौ राजपुत्रोऽपि तृतीयहेतुरासीत्. कलत्रभारेण—Analyse कलत्रस्य भारः कलत्रभारः तेन तादृशेन, 'By the burden of the hip and loins.' कलत्र *n.*, Expl:—गडति गड्यते वा इति कलत्रं. Derived from गड् *vt.* 1 P. (सेट्) 'To sprinkle,' 'to water,' 'to bear,' 'to carry.' *Cf.* Uṇàdisûtra "गडेशदेश्च कः" इत्यत्रन्। डलयोरेकत्वम्। कलं त्रायते वा or कडति कड्यते वा. Derived from कड् *vi.* 1. P. (सेट्) 'To be intoxicated,' 'to be mad.' बाहुलकादत्रन्. *Vide* रभसः, "दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः." कुचद्वयस्य—Analyse कुचयोः द्वयं कुचद्वयं तस्य तादृशस्य, 'Of the pair of breasts.' स्थाम्ना—'By the weight.' 'By the force.' 'By the power.' मन्थरविक्रमायाः—Analyse मन्थरः मन्दः विक्रमो गमनं यस्याः सा मन्थरविक्रमा तस्याः मन्थरविक्रमायाः, 'Of one having a gentle gait.' गतिमन्थरत्वे—Analyse गतेः मन्थरत्वं गतिमन्थरत्वं तस्मिन् तादृशे, 'Slowness of walking (or moving).' राजपुत्रः—Analyse राज्ञः पुत्रः राजपुत्रः, 'A prince.' तृतीयहेतुः—Analyse तृतीयश्चासौ हेतुश्च तृतीयहेतुः, 'Third object.' 'Third cause.' Translate:—'To the slowness of walking of her, whose gait of moving was gentle, by reason of the burden of the hip and loins, as well as by the weight of the pair of her breasts, might also be added (or attributed) this prince, as the

third cause.' Because her mind was obsorbed in this beautiful prince she was walking slowly that she might see him over and over again.

St. 21. अनुव्रजन्तं—Construe अनुव्रजन्तं परिवारवर्गं तं किञ्चित् प्रत्याहरन्ती तिर्यग्विवृत्ताननचन्द्रबिम्बा अर्धनिरीक्षितेन रामं जघान किल नाम. परिवारवर्गं—Analyse परिवाराणां वर्गः परिवारवर्गः तं तादृशं, 'A multitude of retinue.' 'A class of retinue.' तिर्यग्विवृत्ता°—Analyse तिर्यग् विवृत्तं आननमेव चन्द्रबिम्बं यया सा तिर्यग्विवृत्ताननचन्द्रबिम्बा, 'Having the disc of the face-moon turned behind a little.' अर्धनिरीक्षितेन—Analyse अर्धं च तन्निरीक्षितं च अर्धनिरीक्षितं तेन तादृशेन, 'By half a glance (i. e. by a side-long glance).' Translate:—'Verily addressing something to the multitude of retinue that was walking behind her, she, it is said, with the disc of her face-moon turned behind a little, struck Ràma with her side-long glance.'

St. 22. तस्यां—Construe राघवाभ्यां सह गतायां तस्यां भुवो भर्ता तं संयमिनं ततः विप्रैः ततस्य सत्रस्य अकृशं ऋद्धिसारं द्रष्टुं स्वयं निनाय. राघवाभ्यां, Expl:-रघोः अपत्यं पुमांसौ राघवौ ताभ्यां राघवाभ्यां, 'In company with the descendants of Raghu.' ऋद्धिसारं—Analyse ऋद्धेः सारः ऋद्धिसारः तं तादृशं, 'The essence of his prosperity.' 'The essence of his Royal Fortune.' अकृशं—Analyse न कृशः अकृशः तं अकृशं, 'Not decreased or lessened.' 'Full.' तस्यां—'When she departed, the lord of the earth himself took that sage accompanied by the two descendants of Raghu, from there to see the undiminished essence of the prosperity of the continued sacrificial session performed by the sacrificial priests.'

St. 23. दूरः—Construe देहेन दूरेऽपि वियोगवह्नेः प्रवर्धिताधिः स्फुटतीति भीतः [सन्] तद्रक्षणायैव कृतप्रयत्नो रामस्तस्या हृदयं न मुमोच. वियोगवह्नेः—Analyse वियोगरूपो वह्निर्वियोगवह्निस्तस्मात् तादृशात्, 'From the fire in the shape of separation.' प्रवर्धिताधिः—Analyse प्रवर्धितश्चासौ आधिश्च प्रवर्धिताधिः 'The mental agony which was made to grow.' तद्रक्षणाय—Analyse तस्य रक्षणं तद्रक्षणं तस्मै तद्रक्षणाय, 'For its preservation.' 'In order to protect it.' कृतप्रयत्नः—Analyse कृतः प्रयत्नः येन स कृतप्रयत्नः, 'One who has made efforts.' दूरः—'Though standing at a distance, with his body, being afraid lest the mental agony, which was fed by the fire of separation, would issue forth (or be developed), Ràma, who had made efforts only for its preservation, did not leave her heart.'

St. 24. याते—Construe नयनाभिरामे रामे याते च शून्याः दिशो दृष्ट्वा फलं किमस्ति इतीव पद्मायतलोचनायाः विलोचने नेत्रजलं रुरोध. नयनाभिरामे—Analyse

नयनयोः अभिरामः नयनाभिरामः तस्मिन् तादृशे, 'Delightful (or pleasing) to the eyes.' पद्मायतलोचनायाः—Analyse पद्ममिव आयते लोचने यस्याः सा पद्मायतलोचना तस्याः पद्मायतलोचनायाः, 'Having the eyes long like a lotus.' नेत्रजलं—Analyse नेत्रयोर्जलं नेत्रजलं, 'Eye-water (i. e. tears).' याते—'When Ráma, the delightful object to her eyes, had departed, what was the use of seeing the vacant quarters ? With this thought, as it were, the flow of tears in her eyes obscured her sight who had eyes long like a lotus.'

St. 25. कृते—Construe मया [वलयेन] पाणिग्रहणे कृतेऽपि इयं बाला परत्र [रामे] आहितरागवृत्तिर्जाता इति कृशाङ्ग्याः तस्याः वलयं रोषेण यथा [इव] कराग्रं ससर्ज. पाणिग्रहणे—Analyse पाणेः ग्रहणं पाणिग्रहणं तस्मिन् तादृशे, 'Taking by the hand.' 'Taking hold of the hand.' 'Marrying.' 'Marriage' (the joining of the bride and bride-groom's hands forming part of the ceremony). परत्राहितरागवृत्तिः—Analyse परत्र रामे आहिता रागस्य वृत्तिर्यया सा परत्राहितरागवृत्तिः, 'The force or action of whose love was directed elsewhere' (i. e. towards Ráma). वलय *n.*—Is here equivalent to विवाहकौतुकं or मङ्गलकङ्कणं or कङ्कणसूत्रं. It is a thread-ring worn by the bride-groom round the wrist before the beginning of the marriage ceremony. *Cf.* अश्वलायनगृह्यपरिशिष्ट, Bib. Ind. series, p. 287. "अथ वधूवरौ स्वशेखरंपुष्पं क्षीरघृतेनाप्लाव्य परस्परतिलकं कुरुतः कण्ठे स्रजश्चाबध्नतः कौतुकसूत्रं च करे बध्नीयाताम्." *Cf.* also Náráyana Bhaṭṭa's प्रयोगरत्नाकर under कौतुकविधिः, Poona, edi. p. 23. No express injunctions are prescribed as to the number of days that it should be worn after the marriage ceremony. It is genearlly taken away after the third day since the celebration of the marriage. It might, however, be worn for three or twelve days or even for a year, which is the longest term prescribed for the married couple to observe ब्रह्मचर्य or celibacy after the marriage rite. *Cf.* As'valáyana Gṛihya Sûtra, I, Adh. 8, Kaṇḍiká 10, 11, 12, "अक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनौ स्याताम्" ॥ १० ॥ "अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं" ॥ ११ ॥ "संवत्सरं वैक ऋषिर्जायत इति" ॥ १२ ॥ 'From that time they should eat no saline food, they should be chaste, wear ornaments, sleep on the ground three nights or twelve nights;' 'or one year (according to) aome (teachers); thus, they say, a *Rishi* will be born (as their son).' कृशाङ्ग्याः—Analyse कृशान्यङ्गानि यस्याः सा कृशाङ्गी तस्याः तादृश्याः, 'Of the girl with a slender shape (or form).' कराग्रं——Analyse करस्य अग्रं कराग्रं, 'The extremity of the hand.' 'Fingers.' Translate:—'Though I have taken hold of her hand (in marriage) yet this young damsel has transferred her

feeling of love elsewhere; ' ' with this thought the thread-ring on the wrist of that slender-shaped girl allowed itself to fall from her fingers as if from anger. '

St. 26. संताप°—Construe सन्नताङ्ग्याः हृदि कामाहितः संतापवह्निः खेदविलोहितेन नेत्रद्वयेन बहिःप्रवृत्तज्वालावलिरिव सखीभिः संविविदे. संताप°—Analyse संतापस्य वह्निः संतापवह्निः, ' Fire produced from great heat (or affliction). ' Fire produced from exciting passion.' सन्नताङ्ग्याः—Analyse सन्नतानि अङ्गानि यस्याः सा सन्नताङ्गी तस्याः सन्नताङ्ग्याः, ' Of her whose round limbs were gracefully bent down (or stooping).' कामाहितः—Analyse कामेन आहितः कामाहितः, ' Placed by the god of love '. Put in by the god of love. ' खेद°—Analyse खेदेन विलोहितं खेदविलोहितं तेन तादृशेन, ' By it red with grief. ' नेत्रद्वयेन—Analyse नेत्रयोर्द्वयं नेत्रद्वयं तेन तादृशेन, ' By the pair of her eyes. ' बहिःप्रवृत्त°—Analyse बहिः प्रवृत्ता ज्वालानां आवलिर्यस्य स बहिःप्रवृत्तज्वालावलिः, ' Having the line of flames burst out. ' Translate:—'The fire of exciting passion, put by the god of love in the heart of her, having graceful limbs, and having the line of flames burst out, as if by the pair of her eyes red with grief, was discovered by her female friends.'

St. 27. याता—Construe अङ्गजाग्नितप्ते तद्धृदये चिरं निवासात् सा तानवं याता नु । उत स्वकीये हृदि निविष्टं तं ऊढ्वा श्रमजं तनुत्वं गता नु. तानव *n*.—'Thinness. ' ' Spareness. ' अङ्गज°—Analyse अङ्गाज्जातः अङ्गजः । अङ्गजश्चासौ अग्निश्च अङ्गजाग्निः तेन तप्तं तस्मिन् तादृशे, ' *Heated* by the fire sprung from intoxicating passion or love. ' तद्धृदये—Analyse तस्य हृदयं तद्धृदयं तस्मिन् तद्धृदये रामहृदये, ' In his heart, ' (i. e. in the heart of Ráma). श्रमजं—Analyse श्रमाज्जातं श्रमजं, ' Consequent on labour (or exhaustion).' अङ्गजाग्नितप्ते तद्धृदये चिरं निवासात् सा तानवं याता नु—' Was it that she attained thinness (or emaciation) from a long stay in his (Ràma's) heart heated by the fire sprung from intoxicating passion ?' उत स्वकीये हृदि निविष्टं तं ऊढ्वा श्रमजं तनुत्वं गता नु—' Or bearing him in her own heart, who had already entered it, has she attained spareness consequent on labour ?'

St. 28. दूरे—Construe परिकल्पवृत्त्या रामो दूरेऽपि अस्मिन् [मम हृदये] दृश्यते किं । अथ वा स्थितेऽपि [रामे] मे पापाद् [रामस्य] प्रवासः प्रतिभाति किं । इति तस्याः विविधः विकल्पः आस. परिकल्पवृत्त्या—Analyse परिकल्परूपा संकल्परूपा वृत्तिः चित्तवृत्तिः परिकल्पवृत्तिः तया तादृश्या, 'By the force of fancy.' 'By the strength of will. ' परिकल्पवृत्त्या रामो दूरेऽपि अस्मिन् [मम हृदये] दृश्यते किं—' Is Ràma seen in this heart of mine, though at a distance simply by the strength of will ?' अथ वा स्थितेऽपि रामे मे पापाद् रामस्य प्रवासः

प्रतिभाति किं—'Or though he is present (in my heart), is it, through sin, that it seems to me that he is abroad (or is away from me)?' इति तस्याः विविधः विकल्पः आस—'Such was her fancy of various forms.'

St. 29. मृदु°—Construe मृदुप्रवालास्तरणेऽपि शिलातले सा तन्वी पुष्पकेतोः असृक्स्रवार्द्रे शरतल्पमध्ये वर्तमानेव धृतिं नैव सिषेवे. मृदु°—Analyse मृदवश्च ते प्रवालाश्च मृदुप्रवालाः तेषां आस्तरणं तस्मिन् तादृशे, 'On the bed of soft new leaves.' *Cf.* R. VIII. 57. "नवपल्लवसंस्तरेऽपि ते." These fresh leaves have also a reddish tinge and look like blood. शिलातले—Analyse शिलायाः तलं शिलातलं तस्मिन् तादृशे, 'On a marble slab.' असृक्स्रवार्द्रे—Analyse असृजां or अस्नां स्रवः । असृक्स्रवः तस्मिन् तादृशे, 'Wet (or moist) by the dripping (or trickling) of blood.' शरतल्पमध्ये—Analyse शराणां तल्पः शरतल्पः तस्य मध्ये शरतल्पमध्ये, 'In the middle of the couch of the arrows.' पुष्पकेतोः—'Of the god of love.' मृदु°—'That delicate damsel, though lying on a bed of soft new leaves, spread on a marble slab, did not, at all get ease, as if, lying on the Cupid's sofa, made of arrows, wet by the dripping of blood.'

St. 30. तुषार°—Construe तुषाररश्मेः [चन्द्रस्य] उदयेऽपि तस्याः नेत्रोत्पलं मुखच्छद्मनि चन्द्रे दीर्घकालं अभ्यासतो नु प्रियचिन्तया नु नो मुकुलीबभूव. तुषाररश्मेः—Analyse तुषाराः रश्मयो यस्य स तुषाररश्मिः तस्य तादृशस्य, 'Having cool rays' (i. e. the moon). नेत्रोत्पलं—Analyse नेत्रमेव उत्पलं नेत्रोत्पलं 'Eye-lotus.' मुकुलीभू—'To close.' 'To contract.' मुखच्छद्मनि—Analyse मुखमेव छद्म मुखच्छद्म तस्मिन् मुखच्छद्मनि, 'Under the plea of the face.' 'In the guise (or garb) of the face.' दीर्घकालं Analyse दीर्घश्चासौ कालश्च दीर्घकालः तं यथा स्यात्तथा, 'For a long time.' प्रियचिन्तया—Analyse प्रियस्य चिन्ता प्रियचिन्ता तया प्रियचिन्तया, 'On account of thinking of her husband.' 'By reason of reflecting on her husband.' Translate:—'Her eye-lotus did not close even after the rise of the cool-rayed moon, either through the long practice of looking at the moon in the guise of her face, or on account of the thoughts of her husband.'

St. 31. ससीकरं—Construe सखीभिः नताङ्ग्याः हृदये न्यस्तं भिन्नस्फटिकावदातं ससीकरं कदल्याः गर्भदलं पुष्पेषुबाणव्रणपट्टशोभां बबन्ध. ससीकरं—Analyse सीकरैः सह ससीकरं, 'Accompained with drizzle.' *Cf. Ritu*. II. 1 "ससीकराम्भोधरमत्तकुञ्जर°—&c." गर्भदलं-Analyse गर्भस्य दलं गर्भदलं, 'A piece torn of the interior part of.' कदली, Expl:—कन्दते कन्द्यते वा इति कदली. 'A plantain tree.' 'A Banana tree.' Derived from कद् *vt.* or *vi.* 1. A. (सेट्) 'To kill.' 'To hurt.' 'To call.' 'To cry or shed tears.' *Cf.* Uṇâdisûtra, "वृषादिभ्यश्चित्." Or केन वायुना दल्यते इति कदली

Derived from दल् *vt.* or *vi.* 1. P. (सेट्) 'To break.' 'To split.' To open.' नताङ्ग्याः—Analyse नतानि अङ्गानि यस्याः सा नताङ्गी तस्याः तादृश्याः, 'Of a beautiful lady.' भिन्न°—Analyse भिन्नश्चासौ स्फटिकश्च भिन्नस्फटिकः तद्वद् अवदातं गौरं, 'White like a broken marble.' पुष्पेषु°–Analyse पुष्पेषोः पुष्पधन्वनः बाणः तस्य व्रणः स एव पट्टः तस्य शोभा तां तादृशीं, 'Looking like a bandage tied round the wound of an arrow shot forth by the god of love.' ससीकरं—'A piece accompanied with drizzle, torn of the interior part of a banana tree, and which like a broken marble, which was placed on the heart of that beautiful damsel by her female friends, displayed the beauty of a bandage (or fillet) tied round the wound of an arrow shot forth by the god of love.'

St. 32. कस्यापि-Construe स्वपादसेवाभिरतेऽपि मयि यद्विरागः तत् कस्यापि दृष्ट्या किम् । इतीव तस्याः सन्नूपुरयोः युग्मेन अमन्दं शैथिल्यं अतानि. विरागः—Analyse विगतः रागः विरागः, 'Change of colour (or feeling).' 'Absence of colour.' 'Change of nature.' 'Indifference.' स्वपाद°—Analyse स्वस्य पादौ स्वपादौ तयोः सेवा तस्यां अभिरतः स्वपादसेवाभिरतः तस्मिन् तादृशे, 'Devoted to the service of her own feet.' शैथिल्यं, Expl:—शिथिलस्य भावः शैथिल्यं, 'Looseness.' 'Weakness.' 'Cowardice.' सन्नूपुरौ—Analyse सन्तौ नूपुरौ सन्नूपुरौ, 'Of the beautiful anklets.' अमन्दं—Analyse न मन्दं अमन्दं, 'Not slow.' 'Active.' 'Violent.' 'Important.' स्वपादसेवाभिरतेऽपि मयि यद्विरागः तत्कस्यापि दृष्ट्या किं—'Is it due to the sight of some one (by her) that she is indifferent towards me, though devoted to the service of her feet?' इतीव तस्याः सन्नूपुरयोः युग्मेन अमन्दं शैथिल्यं अतानि—'*With this thought* the pair of her good anklets showed great weakness (*timidity*).'

St. 33. सखी°—Construe सखीसमीपेऽपि सखेदवृत्तिर्दीना वैदेहसुता चन्द्रातपैरपि अनुतापभाजा देहेन कतिचिद् दिनानि कथञ्चिन्निनाय. सखीसमीपे—Analyse सखीनां समीपे सखीसमीपे, 'In the presence of female friends.' सखेदवृत्तिः—Analyse सखेदा वृत्तिर्यस्याः सा सखेदवृत्तिः, 'Having a dejected mood.' चन्द्रातपैः—Analyse चन्द्रस्य आतपाः चन्द्रातपाः तैः तादृशैः, 'By the heat of the moon.' अनुतापभाजा—Analyse अनुतापं भजतीति अनुतापभाक्-ग् तेन तादृशेन, 'By one sharing in the pain (or affliction).' वैदेहसुता—Analyse विदेहानां राजा वैदेहः तस्य सुता वैदेहसुता, 'The daughter of the king of the Videhas. Translate:-'That afflicted daughter of the king of the Videhas, having a dejected mood even in the presence of her female friends, somehow passed some days with her body sharing in the pain caused, even by the heat of the moon.'

St. 34. सार्धं—Construe अथ द्विजैः सार्धं पावनसोमपाननिर्धूतपाप्मानि सत्रनाथे क्षितिक्षितां मुख्ये प्रकृतस्य मखस्य कोटिं वीतविघ्नं ईयुषि [सति सुमंत्रसुतः

पुरं प्रपेदे इत्युत्तरेणान्वयः]. पावन°—Analyse पावनश्चासौ सोमश्च पावनसोमः तस्य पानेन निर्धूतः पाप्मा यस्य स तस्मिन् तादृशे, 'Having his sin removed (or shaken off) by the purifying सोम drink.' सत्रनाथे—Analyse सत्रस्य नाथः सत्रनाथः तस्मिन् तादृशे, 'The lord of the sacrificial session.' क्षितिक्षितां—Analyse क्षितिं क्षियन्तीति । अथ वा । क्षितिं क्षयन्ति ईशते इति । क्षितिक्षितो राजानस्तेषां तादृशानां 'Of the rulers of the earth.' 'Of the kings.' वीतविघ्नं—Analyse वीतः विघ्नः यस्मिन् तद् यथा स्यात्तथा, 'In a manner in which the obstacles (or obstructions) have departed.' 'Unobstructedly.' 'Freely.' This and the next verse form a युग्म. For the definition &c, see notes on II. 2. Translate:—'Then, while the lord of the sacrificial session, who was the chief of the rulers of the earth, having his sin removed by the purifying Soma drink, in company with the Bràhmaṇas, unobstructedly attained the eminence in the sacrifice that had been begun,—'

St. 35. जन°—Construe ततः पुरुहूतकल्पः समग्रशक्तिः सुमंत्रसूतः जनाधिनाथः अन्यत् सुतयुग्मं समादाय राज्ञो जनकस्य पुरं प्रपेदे. जन°—Analyse जनानां अधिनाथः जनाधिनाथः 'The lord of the people.' पुरुहूतकल्पः—Analyse पुरुहूताद् ईषन्न्यूनः पुरुहूतकल्पः, 'Almost like (or nearly equal to) Indra.' समग्रशक्तिः—Analyse समग्रा शक्तिर्यस्य स समग्रशक्तिः, 'Possessing all powers.' सुतयुग्मं—Analyse सुतयोः युग्मं सुतयुग्मं, 'A pair of his sons.' सुमंत्रसूतः—Analyse सुमंत्रः सूतः यस्य स सुमंत्रसूतः. 'Having सुमंत्र for his charioteer.' जन°—'That lord of the people, possessing all powers, with Sumantra for his charioteer, and almost like Indra (in prowess), took with him his two other sons and came to the city of the king जनक.'

St. 36. क्षत्रस्य—Construe क्षत्रस्य अदोषदुष्टं वैवाहिकं नक्षत्रं पुरोहितेनाभिहितं निशम्य वाहितशत्रुवीरो विधिज्ञो विधिं संपादयामास. अदोषदुष्टं—Analyse दोषैर्दुष्टं दोषदुष्टम् । न दोषदुष्टं अदोषदुष्टं, 'Not spoilt (or corrupted) by noxious (or bad) qualities.' वैवाहिकं—Analyse विवाहे साधु वैवाहिकं, 'Belonging (or relating) to marriage.' 'Matrimonial.' वाहित°—Analyse वाहिताः शत्रूणां वीराः येन स वाहितशत्रुवीरः, 'One who has caused to be borne (or conveyed) the warriors of the enemies.' विधिज्ञः—Analyse विधिं जानातीति विधिज्ञः, One who knows the prescribed rules (or forms).' क्षत्रस्य—'Hearing the declaration of the family-priest about the lunar mansion, free from fault, and favourably disposed to marriage of the क्षत्रिय race, the king who knew the prescribed rules and who had caused to be borne the warriors of the enemies, accomplished the rite.'

St. 37. स्नात°—Construe स्नातद्विजारूढमदद्विपेन्द्रस्कन्धस्थकार्तस्वरकुम्भपंक्त्या नृपस्य धिष्ण्ये समन्ताद् अच्छेदवत्पावनतीर्थतोये प्रकृते [सति]. स्नात°—Analyse स्नाताश्च ते द्विजाश्च स्नातद्विजाः तैः आरूढाः ये मदद्विपेन्द्राः स्नातद्विजारूढमदद्विपेन्द्राः । स्कन्धेषु तिष्ठन्तीति स्कन्धस्थाः । स्नातद्विजारूढमदद्विपेन्द्राणां स्कन्धस्थाः ये कार्तस्वरस्य कुम्भाः तेषां पंक्तिः तया तादृश्या, 'By the row (or line) of golden pitchers placed on the shoulders of intoxicated mighty elephants on which were mounted the Bráhmaṇas, purified by ablutions.' धिष्ण्यं, Expl:—धिष्यते धृष्णोति वा धिष्ण्यं, 'A palace.' 'A mansion.' Derived from धिष् *vi.* 3. P. (सेट्) 'To sound, 'to emit a sound,' 'to praise,' Or from धृष् *vi.* or *vt.* 5. P. (सेट्) 'To be bold or confident.' *Cf.* Uṇádisútra, "सानसिवर्णसिपर्णसिततण्डुलांकुशचपालेल्वलपल्वलधिष्ण्यशल्याः". अच्छेदवत्°—Analyse न छेदः अच्छेदः । अच्छेदः अस्ति यस्य तद् अच्छेदवत् तादृशं पावनं तीर्थतोयं यस्मिन् तत् तादृशे, 'Having the purifying sacred water sprinkled without leaving any space.' This and the next eight verses form a कुलक. For definition &c, see notes on II. 2. Translate:—'When the king's palace had the purifying sacred water sprinkled over without leaving any space all around by the row (or line) of golden pitchers placed on the shoulders of intoxicated mighty elephants on which were mounted the Bráhmaṇas purified by ablutions,—'

St. 38. रथ्यो°—Construe रथ्योभयान्ताहितशातकुम्भकुम्भस्थपङ्केरुहगन्धविद्धे सुगन्धौ कर्पूरकृष्णागरुसारधूपे गगनं तिरोदधाने [सति]. रथ्यो°—Analyse रथ्यायाः उभयान्तौ तयोः आहिताः ये शातकुम्भकुम्भाः तेषु तिष्ठन्तीति रथ्योभयान्ताहितशातकुम्भकुम्भस्थानि यानि पङ्केरुहाणि तेषां गन्धेन विद्धः तस्मिन् तादृशे, 'Penetrated by the sweet scent of the water-growing lotuses lying in the golden jars placed on both the extremities of the street.' सुगन्धौ—Analyse शोभनो गन्धो यस्य स सुगन्धिः तस्मिन् तादृशे, 'In (the fumigation) having a sweet scent.' कर्पूर°—Analyse कर्पूरश्च कृष्णागरुश्च कर्पूरकृष्णागरू तयोः सारस्य धूपः तस्मिन् तादृशे, 'In the fumigation of the essence of camphor and black aloe-wood (or agallochum).' *Cf.* R. VI. 8. "संचारिते चागुरुसारयोनौ धूपे &c." Translate:—'While the sweet scented fumigation issuing forth from the burning essence of black aloe-wood and camphor, penetrated by the sweet scent of the water-growing lotuses in the golden jars placed on both the extremities of the street, obscured the heavenly vault,—'

St. 39. चरत्—Construe नरेन्द्रसूनोः वन्द्याननिःसृतेषु जयघोषणेषु चरत्सु [तस्य] मङ्गलाय च प्रध्मातशंखध्वनिबृंहितेषु ध्वनत्सु तूर्येषु [सत्सु] वन्द्याननिःसृतेषु—Analyse वन्दिनः आननेभ्यः निःसृतानि तेषु तादृशेषु, 'Come out of

the mouths of excellent panegyrists.' नरेन्द्रसूनोः—Analyse नराणां इन्द्रः नरेन्द्रः तस्य सूनुः नरेन्द्रसूनुः तस्य तादृशस्य, 'Of the son of the lord of people.' जयघोषणेषु—Analyse जयस्य घोषणानि जयघोषणानि तेषु तादृशेषु, 'The proclamation of victory.' प्रध्मात°—Analyse प्रध्माताश्च ते शंखाश्च प्रध्मातशंखाः तेषां ध्वनिभिः बृंहितानि तेषु तादृतेषु, 'Swollen by the thundering sound of the conches that were blown out.' *Cf.* R. VI. 9. "प्रध्मातशंखे परितो दिगन्तांस्तूर्यस्वने मूर्छति मङ्गलार्थे." शंख, Expl:—शं खनति जनयति इति शंखः. Derived from खन् *vt.* 1. U. (सेट्) 'To dig.' Or शं खमस्येति वा शंखः or शाम्यत्यलक्ष्मीं वा. Hemàdri explains the word as, शमयत्यमङ्गलमिति शंखः. *Cf.* Uṇádiaûrra "शमेः खः." चरत्—'While the sounds of the proclamation of victory in honour of the son of the lord of the people were spreading after having issued forth from the mouths of excellent panegyrists and while the trumpets were making sounds swollen with the thundering sounds of the conches that were blown for the auspicious event,—'

St. 40. लाजाः—Construe संपादयतोऽपि भृत्यानाहूय लाजाः जलं दर्भं इति प्रसक्तं आविष्कृताम्रेडितशीघ्रनादे आकुलभृत्यवर्गे प्रत्युद्व्रजति [सति]. आविष्कृत°—Analyse आविष्कृतः आम्रेडितस्य शीघ्रनादो येन स तस्मिन् तादृशे, 'Who were making a quick loud noise displaying the repetition of the (same order).' आकुल°—Analyse भृत्यानां वर्गः भृत्यवर्गः । आकुलश्चासौ भृत्यवर्गश्च आकुलभृत्यवर्गः, 'A confused (or disordered) multitude of servants.' भृत्यः, Expl:—भ्रियते इति भृत्यः, A servant.' Derived from भृ *vt.* 1. U. (अनिट्) 'To support,' 'to bear.' *Cf.* Páṇi. III. 1. 112. "भृञोऽसंज्ञायाम्." 'The affix क्यप् is employed after the verb भृञ् 'to bear' when not used as a name.' Thus भृ + क्यप् = भृत्य. लाजाः—'After having called the servants, though performing their duty, when the confused multitude of servants were advancing, incessantly displaying the ripitition of quick loud noise (of the same order) with the words 'Please, get the fried-grain, water, Darbha grass &c,—'

St. 41. ज्ञातुं—Construe यामघटीजलस्य वृत्तिं मुहुर्ज्ञातुं प्रयुक्ते गतागताभ्यां उरोघातनिपातिताध्वमार्गस्थलोकेऽपि नृपदासवृन्दे धावति [सति]. याम°—Analyse यामानां घटी यामघटी तस्याः जलं यामघटीजलं तस्य तादृशस्य, 'Of the water put in a vessel measuring Yàma or three hours,' (i. e. a water-clock, यामघोषा). यामघटी having a small whole at the bottom, is generally placed on the surface of water in a गंगाळ्य in order to measure the auspicious hours of the marriage ceremony. The office

is invariably filled by an astrologer (or ज्यौतिषः). उरोघात°—Analyse उरसां घाताः उरोघाताः तैः निपातिताः अध्वनि मार्गस्थानां पथिकानां लोकाः समूहाः येन स तस्मिन् तादृशे, 'Even the clusters of travellers on the road were thrown down by the impact of their breasts.' गतागताभ्यां—Analyse गतं च आगतं च गतागते ताभ्यां गतागताभ्यां, 'By their going and coming.' ज्ञातुं—'When the multitudes of the slaves of the king, employed to know the successive turning of the water of the water-clock, were running and throwing down, with the impact of their breasts, in the confusion of their going and comming, the clusters of travellers on the road,—'

St. 42. आसन्न°—Construe महितो मुहूर्तः आसन्नभूतः। किं तावत् स्थीयते। इति वंशद्वितयस्य वृद्धेषु धीरं रामं सद्यः स्नानाय प्रगल्भं त्वरयत्सु [सत्सु]. वंश°—Analyse वंशस्य द्वितयं वंशद्वितयं तस्य तादृशस्य, 'Of the two families.' महितो मुहूर्तः आसन्नभूतः। किं तावत् स्थीयते—'The right auspicious moment is drawing near; why do you tarry so long ?' इति वंशद्वितयस्य वृद्धेषु धीरं रामं सद्यः स्नानाय प्रगल्भं त्वरयत्सु सत्सु—'In these words the elderly persons of both the families were resolutely hastening the heroic Râma for prompt bathing,—'

St. 43. उच्चैर्भृत°—Construe समं समाविष्कृतमङ्गलेषु आपूरिताशेषककुम्मुखेषु पटहध्वनेषु पटुप्रसक्तं उच्चैर्भृतान्यस्वरं उच्चरत्सु. उच्चैर्भृत°—Analyse उच्चैर्भृतो यो अन्यः स्वरः उच्चैर्भृतान्यस्वरः तं तादृशं, 'Other sounds which were highly pitched.' समाविष्कृत—Analyse समाविष्कृतानि मङ्गलानि यैः तेषु तादृशेषु, 'The auspicious prayers in which were displayed.' आपूरिताशेष°—Analyse ककुभां मुखानि ककुम्मुखानि। आपूरितानि अशेषाणि ककुम्मुखानि यैस्ते आपूरिताशेषककुम्मुखाः तेषु तादृशेषु, 'By which the entire quarter (or region) of space has been filled.' पटुप्रसक्तं—Analyse पटु च तत् प्रसक्तं च यथा स्यात्तथा, 'Incessantly sharp sounding.' पटहध्वनेषु—Analyse पटहानां ध्वनाः पटहध्वनाः तेषु तादृशेषु, 'The beating sounds of large drums.' उच्चैर्भृत°—'While the beating sounds of large drums, accompanied (at the same time) with the auspicious prayers distinctly displayed, by which the entire quarter (or region) of space was filled, were rising above the other sounds highly pitched in a manner accompanied with incessant sharp sounds,—'

S. 44. वेत्रेण—Construe तत्र च वेत्रग्रहणाधिकारे जने वेत्रेण अनुपयोगवन्ति दिदृक्षुवृन्दानि नितान्तं हुङ्कारकृता मुखेन च निरस्यमाने [सति]. वेत्र°—Analyse वेत्रस्य ग्रहणे अधिकारः यस्य स वेत्रग्रहणाधिकारः तस्मिन् तादृशे, 'Filling the office of holding the mace.' अनुपयोगवन्ति—Analyse न उपयोगवन्ति अनुपयोगवन्ति, 'Useless. 'Uninvited.' दिदृक्षुवृन्दानि—Analyse द्रष्ट-

मिच्छवः दिदृक्षवः तेषां वृन्दानि दिदृक्षुवृन्दानि, 'Multitudes of spectators (or bystanders or rabble).' हुङ्कारकृता—Analyse हुङ्कारं करोतीति हुङ्कारकृत् तेन हुङ्कारकृता, 'By one uttering a menacing sound.' नितान्तं *adv.*—'In a high degree.' 'Very much.' 'Exceedingly.' Modifying हुङ्कारकृता. Translate:—'And there when the persons employed in the office of holding a royal mace were driving away, by their staff, the multitudes of uninvited (or useless) spectators, with their mouths uttering very much the menacing words,—'

St. 45. हुङ्कार°—Construe हुङ्कारमात्रप्रथितैः अमर्षैः कराग्रस्य [च] तिर्यग् विकम्पितेन मुखरं जनौघं निवारयन्तो माशब्दिकाः तत्र वेश्मनि चेरुः. *Cf.* Ku. III. 41. "मुखार्पितैकाङ्गुलिसंज्ञयैव माचापलायेति गणान्व्यनैषीत्॥" हुङ्कार°—Analyse हुङ्कार एव हुङ्कारमात्रं तेन प्रथिताः तैः तादृशैः, 'Made known simply by menacing words.' कराग्रस्य—Analyse करस्य अग्रं कराग्रं तस्य तादृशस्य, 'Of the fingers,' (*lit.* of the extremities of the hand). जनौघं—Analyse जनानां ओघः जनौघः तं तादृशं, 'The crowd of people.' माशब्दिकाः, Expl:—मा शब्दं कुरु इति आहुः ते माशब्दिकाः, 'Those who usher preserving silence.' 'Those who command silence.' 'Prohibitors.' *Cf.* Pāṇi. IV. 4. 1. and the Vártika thereto. "ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानम्." 'After the words माशब्द &c. the affix ठक् comes in the sense 'he said that.' Thus माशब्द इत्याह=माशब्दिकः 'who says 'don't make noise.' कायशब्दिकः। This is the case of an affix added to a sentence. हुङ्कार°—'With the feelings of anger made known simply by menacing words and with sideways movement of the finger of the hand, keeping off the noisy crowd of people those officers, who command silence, walked about there in the palace.'

St. 46. केचित्—Construe क्रियासु दक्षाः केचिद् भृत्याः विधिं विधातुं उद्यतेभ्यः कुशलेतरेभ्यो वैवाहिककर्मयोग्यवस्तूनि आच्छिद्य विधानं विदधुः. कुशलेतरेभ्यः—Analyse कुशलेभ्यः इतरे कुशलेतरे तेभ्यः तादृशेभ्यः, 'From the ignorant.' वैवाहिक°—Analyse विवाहः प्रयोजनमस्येति वैवाहिकं तच्च कर्म च वैवाहिककर्म तस्मै योग्यानि वस्तूनि वैवाहिककर्मयोग्यवस्तूनि, 'Things which are suitable to (or proper for) the marriage-ceremony.' *Cf.* Pāṇi. V. 1. 109. "प्रयोजनम्." 'The affix ठञ् comes after a word in the first case in construction in the sense of "that whose occasion or purpose is this." केचित्—'After having snatched away the things proper for the marriage-ceremony from the ignorant servants, who were prompted to do that rite, some other servants, who were competent in those ceremonies, performed the prescribed rite.'

St. 47. शच्याः—Construe विधिज्ञो जनो विवाहस्याद्यं प्रथितं शच्याः विधानं नामान्तरेण पर्यस्य तथा चित्तानि पर्यस्य तत्र नृपस्य सुताया एव ततान. शच्याः—'Of शची, the wife of इन्द्र.' At the beginning of the Hindu marriage-ceremonies the presence of शची and her husband Indra is invariably invoked. The object of the presence of शची being prayed for might perhaps originally be to secure eternal freedom from widowhood, which is specially enjoyed by that goddess. The mythological notion being that whoever be शक्र or king of the celestials शची remains the same, queen of Indra for the time being. Náráyaṇa Bha*tta* says:-"ततो दाता (i. e. father or elder brother of the bride) पात्रस्थसिततण्डुलपुञ्जे शचीमावाह्य षोडशोपचारैः पूजयेत् तां च कन्यैवं प्रार्थयेत्। "देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे." *Prayoga Ratnákara, Vágdánavidhi.* In the तैत्तिरीयसंहिता Indráṇí is represented as the best of wives, as one than whom nothing is more excellent, and whose husband never dies by age: "इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्। न ह्यस्या अपरं च न जरसा मरते पतिः" तैत्तिरीयसंहिता 1, 7, 13—Again in the तैत्तिरीयब्राह्मण she is represented as ever free from widowhood and as the mother, like Aditi, of virtuous sons: "इन्द्राणीवाविधवा अदितिरिव सुपुत्रा". Kán*da*, III, Prap. 7. An. 5. Das'. 10. नामान्तरेण—Analyse अन्यद् नाम नामान्तरं तेन तादृशेन, 'By a different name.' विधिज्ञः, Expl:—विधिं जानातीति विधिज्ञः, 'One who knows the ritual.' 'A ritualist.' 'One who knows the prescribed modes or forms.' Translate:—The ritualists changing their hearts as well as the name of the well-known worship of S'achí which is the first (item) of a marriage ceremony, performed it (i. e. the worship) of the princess herself there.'

St. 48. स्नानस्य—Construe स्नानस्यान्ते रत्नाभरणेन दीप्तं आकल्पं विधिवद्विधाय स्मरेण विधुरा वधूः वेदविदा कृतार्घ्यं वेद्याः उपान्तं ययौ. रत्ना°—Analyse रत्नानां आभरणं रत्नाभरणं तेन तादृशेन, 'By the jewel ornaments.' वेदविदा—Analyse वेदान् वेत्तीति वेदविद् तेन तादृशेन, 'By one who was conversant with the Vedas.' कृतार्घ्यं—Analyse कृतं अर्घ्यं यस्मिन् तत् कृतार्घ्यं, 'On which अर्घ्य was performed.' स्नानस्य—'At the end of the holy ablutions, having invested herself with rich and gaudy attire, illuminated with jewel-ornaments, according to the manner (or fashion), the bride, smitten with love's (arrow), came to the extremity of the altar, to which अर्घ्य offerings were previously made by the priest conversant with the Vedas.'

St. 49. अथ—Construe अथ लज्जाविधेया [लज्जावशीभूता] विधवेतराभि [सौभाग्यवतीभिः] विभूषिता असौ तन्वी नयकोविदेन महेन्द्रसख्यास्तद्गुजेन [ऋषिणा,

शतानन्देन] विभुनन्दनाय [रामभद्राय] उपनिन्ये. नयकोविदेन—Analyse नये कोविदः नयकोविदः तेन तादृशेन, 'By one who was skilled in policy.' कोविदः, Expl:—कोर्वेदस्य विदः कोविदः । वेत्ति । *Cf.* Páṇi. III. 1. 135. यद्वा । कवि वेदे विदा यस्येति कोविदः. *Cf.* Medi. "विदा ज्ञाने च निर्दिष्टा मनीषायाश्च योषिति. Also Hema. "विदा ज्ञानधियोः । And Vis'va "विदा ज्ञाने च बुद्धौ च." महेन्द्र°—Analyse महांश्चासौ इन्द्रश्च महेन्द्रः तस्य सखी अहल्या तस्याः तादृश्याः, 'Of the female friend of Indra.' तनुजेन—Analyse तनोः जातः तनुजः तेन तनुजेन, 'By her son named S'atánanda.' This great sage S'atánanda was a son of the sage गौतम from Ahalyá. He was a family priest of the king Janaka. लज्जा°—Analyse लज्जायाः विधेया लज्जाविधेया, 'Subject to coyness.' 'Overcome by bashfulness.' विधवेतराभिः—Analyse विधवाभ्यः इतराः विधवेतराः ताभिः तादृशीभिः, 'By those females who are other than widows,' (i. e. by married ladies सुवासिनीभिः). विभुनन्दनाय—Analyse विभोर्नन्दनः विभुनन्दनः तस्मै विभुनन्दनाय, 'To the son of the paramount king' (i. e. to Ráma). Translate :—'Then that beautiful bride, overcome with (*lit.* consigned to) coyness, decorated by married ladies was brought to the prince of the mighty king, by the son of the female friend of great Indra, who was skilled in policy.

St. 50. समाददे—Construe संमदभिन्नधैर्यः फणीन्द्रांगगुरुप्रकोष्ठः कुमारो वामविलोचनायास्तस्याः सुकुमारसन्धिं वामेतरं पाणिं समाददे. संमद°—Analyse संमदेन भिन्नं धैर्यं यस्य स संमदभिन्नधैर्यः, 'Having his gravity disturbed by great joy.' फणीन्द्राङ्गगुरुप्रकोष्ठः—Analyse फणीन्द्रस्य अङ्गवद् गुरुः प्रकोष्ठो यस्य स फणीन्द्राङ्गगुरुप्रकोष्ठः, 'Having his fore-arm broad like the body of a great snake.' सुकुमारसन्धि—Analyse सुकुमाराः सन्धयो यस्य स सुकुमारसन्धिः तं तादृशं, 'Possessing delicate joints.' वामेतरं—Analyse वामाद् इतरः वामेतरः तं तादृशं, 'Other than the left, (i. e. the right hand).' वाम°—Analyse वामे विलोचने यस्याः सा तस्याः वामविलोचनायाः, 'Of her having beautiful eyes.' समाददे—'The prince, having his gravity disturbed by great joy, possessing a fore-arm broad like the body of great snake, took the right hand of that beautiful-eyed lady, having delicate joints.'

St. 51. प्राज्यं—Construe ततः प्राज्ञतरेण वर्जितदुष्कृतेन विधातृधाम्ना शीलधनेन तेन सदिन्धने कृशानौ प्राज्यं हव्यं विधिवदावर्जितं. वर्जित°—Analyse वर्जितं दुष्कृतं येन स वर्जितदुष्कृतः तेन तादृशेन, 'By one who is destitute of sin.' विधातृधाम्ना—Analyse विधातुर्धामेव धाम यस्य स विधातृधामा तेन तादृशेन, 'By him having power resembling that of the Creator.' कृशानौ, Expl:—कृश्यतीति कृशानुः तस्मिन् कृशानौ, 'In the fire.' Derived from the root कृश् *vt.* or *vi.* 4. P. (सेट्) 'To pare,' 'to make thin,'

'to become emaciated.' *Cf.* Unádisûtra "ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निच्यतुजलिजिष्ठुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः." सदिन्धने—Analyse सद् इन्धनं यस्मिन् स सदिन्धनः तस्मिन् तादृशे, 'Bearing sacred fuel.' शीलधनेन—Analyse शीलमेव धनं यस्य स शीलधनः तेन तादृशेन, 'By one who looked upon virtue as his wealth.' प्राज्यं—'Then that wise prince, free from sin, bearing lustre (or a power) like that of the Creator and who looked upon virtue as his wealth, poured many offerings into the fire, fed with sacred fuel, according to the rite.'

St. 52. वेद्यां—Consture ततः वेदविदा प्रयुक्ता अनवद्यवृत्तिः [सा] तन्वी राघवेण सह वेद्यां विवाहसाक्षीकृतं कृशानुं प्रदक्षिणीकृत्य अनंसीत्. अनवद्यवृत्तिः—Analyse अनवद्या वृत्तिर्यस्याः सा अनवद्यवृत्तिः, 'Of a faultless character.' 'Of an unblemished conduct.' वेदविदा—Analyse वेदान् वेत्तीति वेदविद् तेन तादृशेन, 'By one who is versed in the Vedas.' विवाहसाक्षीकृतं—Analyse विवाहस्य साक्षीकृतः विवाहसाक्षीकृतः तं तादृशं, 'Made a witness to the marriage.' *Cf.* R. VII. 20. "तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः । तमेव चाधाय विवाहसाक्ष्ये वधूवरौ सङ्गमयाञ्चकार." Also R. VII. 24. "प्रदक्षिणप्रक्रमणात्कृशानोः." वेद्यां—'Then, enjoined by the priest, skilled in the Vedas, that slender damsel, of a faultless character, went round the fire, which was made a witness to the marriage, on the altar, in company with the descendant of Raghus and then prostrated before it (i. e. fire).'

St. 53. गण्डस्य—Construe घर्माम्भसां बिन्दुः धरित्र्याः दुहितुः गण्डस्य बिम्बं चेतःस्थकन्दर्पकृशानुना वा तस्य परमार्थवह्नेः उष्मणा वा अलञ्चकार. गण्डस्य, Expl:—गण्डतीति गण्डः तस्य तादृशस्य, 'Of the whole side of the face including the temple.' Derived from गड् [गण्ड्] *vi.* 1. P. (सेट्) 'To affect the cheek,' 'to be rough as the cheek. *Cf.* Pàni. III. 1. 134. *Vide* Medi. "गण्डः स्यात् पुंसि खड्गिनि । ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे." घर्माम्भसां—Analyse घर्मस्य अंभांसि घर्माम्भांसि तेषां घर्माम्भसां, 'The water of perspiration (or sweat).' चेतःस्थ°—Analyse चेतसि तिष्ठतीति चेतःस्थः । चेतःस्थो यः कन्दर्पः स एव कृशानुः चेतःस्थकन्दर्पकृशानुः तेन तादृशेन, 'By the fire of the god of love, staying in the heart.' परमार्थ°—Analyse परमार्थश्चासौ वह्निश्च परमार्थवह्निः तस्य तादृशस्य, 'Of the real fire.' Translate:—'A drop of the water of perspiration decorated the orb of the face of the daughter of the earth by means of the fire of the god of love, staying in her heart, or by reason of the heat of the real fire (that was burning on the altar)'.

St. 54. चकार—Construe भर्त्रा चक्राङ्कतलेन करेण वह्नेः स्पर्शेन किल नाम अभिनिपीड्यमाने पाणौ आकुञ्चितदीर्घदृष्टिः सीता सीत्कारं चकार. चक्राङ्क°—Analyse चक्रस्य अङ्कः तले यस्य स चक्राङ्कतलः तेन तादृशेन, "By one bearing on the palm (of the hand) a sign of the discus." आकुञ्चित°—Analyse आकुञ्चिता दीर्घा दृष्टिर्यया सा आकुञ्चितदीर्घदृष्टिः, 'Who has contracted her long eyes.' चकार—' When her hand was gently seized by her husband, with his hand the palm of which bore (or was marked with) the sign of Vis'hṇu's disc as if (किलनाम) with the touch of fire Sitá, with her long eyes contracted, made the सीत्कार sound."

St. 55. व्यापारिता—Construe अथ वाङ्मयपारगेण तेन द्विजेन व्यापारिता द्विजराजवक्त्रा कृशगात्रयष्टिः भावानभिज्ञा [सा] बाला कृशानौ लाजान् जुहाव. वाङ्मय°—Analyse पारं गच्छतीति पारगः । वाङ्मयस्य पारगः वाङ्मयपारगः तेन तादृशेन, ' By one who has gone to the other end of learning.' द्विज°—Analyse द्विजराजस्य चन्द्रस्य वक्त्रमिव वक्त्रं यस्याः सा द्विजराजवक्त्रा, 'Having a face resembling the moon.' कृश°—Analyse गात्राणां यष्टिः गात्रयष्टिः । कृशा गात्रयष्टिर्यस्याः सा कृशगात्रयष्टिः, ' Having a thin frame of the body.' भावानभिज्ञा—Analyse भावानां अनभिज्ञा भावानभिज्ञा, ' Ignorant of passions like love.' लाजान्, Expl;—लज्यन्ते इति लाजाः तान् तादृशान्, ' Fried-grains.' (*Cf.* Maráthi लाह्या). Derived from लज् *vt.* 1. P. (सेट्) ' To fry,' ' to roast.' *Cf.* Páṇi. III. 3. 19. " भावे. " ' The affix घञ् comes after a root when mere action in denoted.' Translate:—'Then, directed by that ब्राह्मण, who had gone to the other end of learning, that moon-faced young girl, with a thin frame of the body, ignorant of passions like love, offered Lájas into the fire.'

St. 56. पत्युः—Construe पत्युः करस्पर्शकृते कृशाङ्ग्या हर्षे सखीभिः प्रविभाव्यमाने [सति] आचारधूमागमलब्धजन्मानि अश्रूणि तत्संवृतये बभूवुः. करस्पर्शकृते—Analyse करस्य स्पर्शः करस्पर्शः तेन कृतः करस्पर्शकृतः तस्मिन् तादृशे, ' Sprung from the touch of the hand.' कृशाङ्ग्याः—Analyse कृशान्यङ्गानि यस्याः सा कृशाङ्गी तया तादृश्या, 'By the slender-limbed damsel.' आचार°—Analyse आचारस्य धूमः आचारधूमः तस्य आगमात् लब्धं जन्म येषां तानि आचारधूमागमलब्धजन्मानि, ' Having their origin in the issuing forth of the smoke of the customary sacrifice.' तत्संवृतये—Analyse तस्य संवृतिः तत्संवृतिः तस्यै तत्संवृतये, ' For its concealment.' पत्युः—' When the joy of the delicate damsel, sprung from the touch of the hand of her husband, was clearly observed by her female friends, her tears which owed their birth to the issuing forth of the smoke of the customary sacrifice, resulted in its concealment.'

St. 57. कृत्वा—Construe विप्रवरेण उक्तः रामः समेतजानिः [सन्] भुवः भर्तुः नमस्यां कृत्वा वन्दिस्तुतस्य राज्ञः जनकस्य अंघ्रियुगमनुपूर्वं ववन्दे. नमस्या—Is equivalent to नमस्करणं, 'The act of saluting or bowing down.' *Cf.* Páṇi III. 1. 19. " नमोवरिवश्चित्रङः क्यच्, " 'The affix क्यच्, in the sense of making, comes after these words as the object of the action', viz :—नमस्, 'adoration,' वरिवस्, 'honour' and चित्र 'wonder'. Also *Cf.* Páṇi. III. 3. 102. "अ प्रत्ययात्." 'After the verbs that end in an affix, there is the affix, 'अ' the word being feminine.' विप्रवरेण—Analyse विप्राणां वरः विप्रवरः तेन तादृशेन, 'By the best of the Bràhmaṇas.' समेतजानिः—Analyse समेता जाया यस्य स समेतजानिः, 'In company with his wife.' वन्दिस्तुतस्य—Analyse वन्दिभिः स्तुतः तस्य तादृशस्य, 'Praised by the bards (or penegyrists).' अंघ्रियुगं—Analyse अंघ्र्योर्युगं अंघ्रियुगं, 'A pair of his feet.' Translate:—'Being addressed by the best of the Bràhmaṇas, the family priest, Ráma, in company with his wife making salutations first to the lord of the earth (Das'aratha), bowed down in regular order at the feet of the king Janaka who was (then) being praised by the bards.'

St. 58. पश्यन्—Construe गंगाकरासक्तकरस्य पाशभृतः कान्तिं दधानं सुतं पश्यन् नृपः स्तब्धविशालदृष्टिः अश्रुस्रवाक्षालितपक्ष्मरेखस्तस्थौ. पाशभृतः—Analyse पाशं बिभर्तीति पाशभृत् तस्य पाशभृतः, 'Of the noose-bearing god.' An epithet of S'iva, or Varuṇa, or Yama. गंगाकरासक्त°—Analyse गंगायाः करे आसक्तः करः यस्य स तस्य तादृशस्य, 'Having his hand firmly attached (in marriage) to the hand of Gangà.' Gangá is said to be the wife of S'iva in the Puráṇas. स्तब्ध°—Analyse स्तब्धा विशाल दृष्टिर्यस्य स स्तब्धविशालदृष्टिः, 'Having his large eyes steady.' अश्रु°—Analyse अश्रूणां स्रवेण क्षालिता पक्ष्मयोः रेखा यस्य स अश्रुस्रवाक्षालितपक्ष्मरेखः, 'Having the lines of eye-lashes washed down by the flow of tears.' Translate:—'Looking at his son, bearing the splendor of the noose-bearing god, whose hand was firmly attached (in marriage) to the hand of Gangá, the king remained still with his long eyes steady and with the lines of eye-lashes washed down by the flow of tears (of joy).'

St. 59. रत्ना°—Construe अथ बाष्पप्रकाशप्रणयाः पौरमुख्याः कक्षान्तरे रत्नासनस्थां भर्तुः सुतां तस्याश्च दत्तसितातपत्रं वरमेत्य प्रणेमुः. रत्ना°—Analyse रत्नानां आसनं रत्नासनं तस्मिन् तिष्ठतीति रत्नासनस्था तां तादृशीं, 'Seated on a seat made of gems.' पौरमुख्याः—Analyse पुरे भवाः पौराः । मुखमिव । मुखे भवा वा मुख्याः । तेषु मुख्याः पौरमुख्याः, 'The principal men of the citizens.' *Cf.* Páṇi. IV. 3. 53. " तत्र भवः " 'An affix अण्

comes after a word in seventh case in construction in the sense of 'who stays there.' बाष्प°—Analyse बाष्पैः प्रकाशाः प्रकाशिताः प्रणयो येषां ते बाष्पप्रकाशप्रणयाः, 'Who had displayed their loyalty (*lit.* affection) by the tears of joy.' कक्षान्तरे—Analyse अन्या कक्षा कक्षान्तरं तस्मिन् तादृशे, 'In the inner (or private) apartment.' दत्त°—Analyse दत्तं सितं आतपत्रं यस्मै स दत्तसितातपत्रः तं तादृशं, 'To whom was given the white umbrella.' रत्ना°—'Then the principal citizens, who had displayed their loyalty (*lit.* affection) by tears of joy, came up to the daughter of the king, seated on a jewelled-throne in the inner apartment of the palace and saluted her and her husband to whom was given the white umbrella.'

St. 60. नीत्वा—Construe ततो रामो विवाहोत्सवसंभृतेन सुखेन कतिचिद्दिनानि नीत्वा कदाचित् समयावबोधदृप्तेन मन्मथेन हृदि विद्धो [बभूव]. विवाह°—Analyse विवाहस्य उत्सवः विवाहोत्सवः तेन संभृतं विवाहोत्सवसंभृतं तेन तादृशेन, 'Brought on (together) by the marriage-festival.' समयाव°—Analyse समये अवबोधः समयावबोधः तेन दृप्तः तेन तादृशेन, 'By one elated by timely arousing.' नीत्वा—'Then after having passed some days in pleasure brought on by the marriage festivals, Ràma once on a time was hit on his heart, by the god of love, elated by his arousing him in time.'

St. 61. गौरीं Construe गौरीमिव आचारगुणेन गुर्वीं करभोपमोरूं [सीतां] करे गृहीत्वा भवप्रभावः स अनल्पशोभं तल्पभूभागं भवनं विवेश. आचारगुणेन—Analyse आचारः गुणः आचारगुणः तेन तादृशेन, 'By reason of the virtue of customary usages.' करभ°—Analyse करभः उपमा ययोस्तौ ऊरू यस्याः सा करभोपमोरूः तां तादृशीं, 'Having thighs comparable to the back of the forearm.' *Cf.* Pàṇi. IV. 1. 69. "ऊरूत्तरपदादौपम्ये." 'The feminine affix ऊङ् comes after a stem ending in ऊरु when comparison with something (expressed by the first term) is meant.' *Cf.* R. VI. 43. "धात्रीकराभ्यां करभोपमोरूः." तल्प°—Analyse तल्पस्य भूभागाः यस्मिन् तत् तादृशं 'The portions of the ground in which were arranged with couches.' अनल्पशोभं—Analyse न अल्पा अनल्पा । अनल्पा शोभा यस्मिन् तत् तादृशं, 'The decorations were numerous (*lit.* not a little).' भवप्रभावः—Analyse भवस्येव प्रभावो यस्य स भवप्रभावः, 'Having his power like that of S'iva.' Translate:—'He, whose power was like that of S'iva, entered the palace of full decoration, the portions of the ground in which were arranged with couches, taking her by his hand, whose thighs were comparable to the back of the fore-arm and who was esteemed for her virtue of customary usage like Gaurî.'

St. 62. भुवि—Construe अग्रे भुवि विरचितं तल्पमालोक्य मनसि भीतिं स्पृशति [सति] नृपतिभवनरत्नस्तम्भमालिङ्ग्य साश्रुपातस्थितां तां बालां रघुपतिः दोर्भ्यां उपगुह्य भूमिशय्यां प्रापयत्. साश्रु°—Analyse अश्रूणां पाताः अश्रुपाताः । अश्रुपातैः सह स्थिता साश्रुपातस्थिता तां तादृशीं, 'Standing with her eyes streaming with tears.' नृपति°—Analyse रत्नैः खचितः स्तम्भः रत्नस्तम्भः । नृपतेः भवनस्य रत्नस्तम्भः नृपतिभवनरत्नस्तम्भः तं तादृशं, 'To the jewelled-post of the palace of the king.' रघुपतिः—Analyse रघूणां पतिः रघुपतिः, 'The lord of the Raghus.' भूमिशय्यां—Analyse भूमौ शय्या भूमिशय्या तां तादृशीं, 'To the couch standing (or resting) on the ground.' The metre of this stanza is Mâlinî which is thus defined:—"ननमयययुतेयं मालिनी भोगिलोकैः". The Gaṇas are न, न, म, य, य. Translate:—'Seeing in front a couch, furnished with decorations, on the ground, while she was touched with fear in her mind, the lord of the Raghus embraced with his arms that young girl, who was standing with her eyes streaming with tears, holding to the jewelled-post of the palace of the king and brought her to the couch, placed on the ground.'

CANTO VIII.

St. 1. आचरन्—Construe अथ स योषितो हठं आचरन् सा च अनुरागिणः [तस्य] वामचरिता । अनीप्सितविधानचेष्टितावपि सपदि मिथः संमदं तेनतुः. हठमाचरन्—' Using force (or violence)'. योषितः—' Towards the lady.' It seems that the word has the force here of the Locative case. The word is derived from the सौत्र root युष् *vt.* 10. U. 'To serve.' *Cf.* Uṇádisûtra "हृसृरुहियुषिभ्य इतिः." वामचरिता—Analyse वामं कुटिलं चरितं यस्याः सा वामचरिता, 'Acting against one's wishes'. अनीप्सित°—Analyse न ईप्सितं अनीप्सितम् । अनीप्सितं विधानं यस्य तादृशं चेष्टितं ययोस्तौ तादृशौ, 'Making an attempt or striving to do what was undesired by both.' संमदः=हर्षः 'Joy.' 'Delight.' *Cf.* Páṇi. III. 3. 68. " प्रमदसंमदौ हर्षे, " ' The words प्रमद and संमद are irregularly formed, meaning 'joy.' The metre of this canto is रथोद्धता which is thus defined:—"रान्नराविह रथोद्धता लगौ." The Gaṇas are:—र न र and a short and a long syllable. It seems that Kumáradàsa has, without any doubt, based the theme of this canto exactly on that of the 8th canto of Kàlidása's Kumàrasambhava. आचरन्—'Then he (i. e. Ràma) used force towards the lady and she acted against the wishes of her loving husband; (thus) they two, each striving to do what was undesired by the other, immediately produced mutual joy.'

St. 2. कामिना—Construe कामिना असौ बालिका समुपगुह्य सप्रयत्नं उपवेशिताऽपि साध्वसेन चपला [सती] अङ्कतो मुहुर्मुहुः समुदेतुं वाञ्छति स्म. सप्रयत्नं—Analyse प्रयत्नेन सह यथा स्यात्तथा सप्रयत्नं, ' With efforts. ' साध्वसेन, Expl:—साधूनामसं इति साध्वसं तेन तादृशेन, ' Through fear. ' साध्वसेन चपला, ' Trembling through fear. ' कामिना—' The young girl, though made to sit with efforts by the loving husband after closely embracing her, wanted to get up from the lap, trembling through fear now and again. '

St. 3. राघवेण—Construe पृष्ठतः परिरभ्य राघवेण मनोरथे सस्पृहं निगदिते [सति] व्रीडया अवनतवक्त्रपङ्कजा चारुहासिनी [सा] धीरमस्मयत. राघवेण, Expl:—रघोः गोत्रापत्यं पुमान् राघवः तेन तादृशेन, 'By the descendant of the Raghus.' सस्पृहं *adv.*—Analyse स्पृहया सहितं सस्पृहं, ' Longingly. ' 'Covetingly.' ' With passionate longing.' अवनत°—Analyse वक्त्रं पङ्कजमिव वक्त्रपङ्कजं । अवनतं वक्त्रपंकजं यया सा अवनतवक्त्रपंकजा, 'Having her lotus-like face hung down.' चारुहासिनी—Analyse चारुः हासो यस्याः सा चारुहासिनी, ' Betraying her charming smile. ' राघवेण—'When

the descendant of the Raghus, having embraced her from behind, talked longingly of his desire, the lady, of a charming smile, with her lotus-like face hung down through shame, smiled steadily.'

St. 4. अंगुलीषु—Construe अंगुलीषु परिगृह्य राघवे रागिभिर्नखैः उरसि वेधयति [सति] सस्मितं विवलितांगुलिर्मानिनी आत्मनः करं बलाद् उदास. सस्मितं *adv.*—Analyse स्मितेन सह यथा स्यात् तथा सस्मितं, 'Smilingly.' 'With a smile.' विवलितांगुलिः—Analyse विवलिताः अंगुल्यो यया सा विवलितांगुलिः, 'Having her fingers turned away.' 'Turning away her fingers.' वेधयति—*Loc. sing.* of the Denominative form of वेधः, 'Loving scratching.' मानिनी, Expl:—मनश्चितोन्नतिरस्त्यस्याः इति मानिनी, 'A proud girl.' *Cf.* Pâṇi. V. 2. 115. "अत इनिठनौ," 'The affixes इनि (इन्) and ठन् (इक्) come in the sense of मतुप्, after nominal stems ending in short अ; and in the alternative मतुप् also comes. Compare also Medi. "मानिनी तु स्त्रियां फल्यां मानी मानवति त्रिषु." अंगुलीषु-'While Ràghava, having seized her fingers, was scratching her breast with his loving nails, the proud girl, turning her fingers with a smile, disengaged her own hand with force.'

St. 5. किन्नु—Construe कुपिता किन्नु वक्ति इति वेदितुं कामिना निधुवने [निधुवनाय रताय] सविग्रहं याचिता [सा] एनं अभिकोपजिह्मितप्रेरितेक्षणकटु व्यलोकयत्. निधुवने, Expl:—नितरां धुवनं हस्तपादादिचालनमत्र इति निधुवनं तस्मिन् निधुवने निधुवनाय रताय, 'In order to obtain the रत enjoyment.' 'For pleasure.' *Cf.* Hemachandra "निधुवनं रते कम्पे" । Also Medi. "भवेन्निधुवनं कम्पे सुरते च नपुंसकम् ॥" सविग्रहं *adv.*—Analyse विग्रहेण सहितं यथा स्यात्तथा सविग्रहं, 'Bodily.' अभिकोप° *adv.*—Analyse जिह्मितं च यत् प्रेरितं च जिह्मितप्रेरितम् । अभिकोपेन जिह्मितप्रेरितं यद् ईक्षणं तेन कटु यथा स्यात्तथा अभिकोपजिह्मितप्रेरितेक्षणकटु, 'In a manner bitter on account of the eyes being directed crookedly through anger.' किन्नु—'She who was sought bodily for pleasure by the loving husband in order to know what she, being angry, would say, looked at him in a manner bitter on account of the eyes being directed crookedly through anger.'

St. 6. पुष्प°—Construe अथ पुष्पकेतुहृतधैर्यबन्धनं तस्य भावं अवगम्य [ज्ञात्वा] वसनान्तसंगिनी सा निर्गमैः अवकाशं कुर्वतीः सखीः संरुरोध. पुष्प°—Analyse पुष्पकेतुना स्मरेण हृतं धैर्यस्य बन्धनं यस्य स तं तादृशं, 'Which had its tie of stability (or patience) removed by the flower-bannered god.' वसनान्तसंगिनी—Analyse वसनस्य अन्ताः वसनान्ताः तेषां संगो विद्यते यस्याः सा वसनान्तसंगिनी, 'Holding (in her hand) the ends of their garment.' पुष्प°—'Learning his intention, having its tie of patience

loosened by the flower-bannered god, she holding in her hand the ends of their garments, stopped her female friends who were making free scope (or free room) by their departure.'

St. 7. इच्छति—Construe नृपसुतस्य विप्रयोगसमये मनोभुवा भृशं आकुलीकृता तस्य सन्निधौ लज्जया भृशं आकुलीकृता कामिनी विरहं न इच्छति स्म संगमं [च] न इच्छति स्म. विप्रयोग°—Analyse विप्रयोगस्य समयः विप्रयोगसमयः तस्मिन् तादृशे, 'At the time of his separation.' मनोभुवा—Analyse मनसि भूर्यस्य स मनोभूः तेन तादृशेन, 'By the mind-born god.' 'By the fancy-born god.' नृपसुतस्य—Analyse नृपस्य सुतः नृपसुतः तस्य तादृशस्य, 'Of the son of the king.' 'Of the prince.' इच्छति—'At the time of the separation from the prince, being much bewildered by the mind-born god and being greatly perplexed with coyness in his presence, that lovelorn girl did not brook separation from him nor did she desire his company.'

St. 8. तस्य—Construe मेखलागुणसमीपसङ्गिनं तस्य हस्तं व्यपोहितुं मन्दशक्तिरबला [सा] लोलनेत्रगलितेन वारिणा [तस्मै] अरतिं न्यवेदयत्. *Cf.* Ku. VIII. 4. " नाभिदेशनिहितः सकम्पया शङ्करस्य रुरुधे तया करः "। अबला—Analyse न बलं यस्याः सा अबला, 'A helpless girl.' 'A lady.' मेखला°—Analyse मेखलायाः गुणस्य समीपे सङ्गो विद्यते अस्य स मेखलागुणसमीपसङ्गी तं तादृशं, 'Moving about the string of her zone.' मन्दशक्तिः—Analyse मन्दा शक्तिर्यस्याः सा मन्दशक्तिः, 'Having little power.' अरतिं—Analyse न रतिः अरतिः तां अरतिं, 'Want of amusement.' लोल°—Analyse लोले च ते नेत्रे च लोलनेत्रे ताभ्यां गलितं लोलनेत्रगलितं तेन तादृशेन, 'Dropped down from the tremulous eyes.' तस्य—'Having little power to remove his hand, which was moving about the string of her zone, the lady declared her want of amusement by tears (*lit.* water) streaming down from her rolling (or tremulous) eyes.'

St. 9. तत्र—Construe तत्र बलात्क्रियामाचरति [सति] उदितलोचनाम्भसो राजदुहितुः अधरं आगमिष्यत्खण्डनं अनुचिन्त्य भीतवद् भृशमकम्पत. राजदुहितुः—Analyse राज्ञो दुहिता राजदुहिता तस्याः राजदुहितुः, 'Of the daughter of the king.' 'Of the princess.' उदित°—Analyse लोचनयोः अम्भः लोचनाम्भः। उदितं लोचनाम्भो यस्याः सा उदितलोचनाम्भाः तस्याः उदितलोचनाम्भसः, "Of her who had tears risen in her eyes.' तत्र—'There while (Ráma) was acting with violence towards the princess, who had tears in her eyes, her lower lip, thinking of the coming bite, trembled much like a frightened person.'

St. 10. न—Construe भुजयुगेन निर्दयं पीडितः [अहं] पुनः रशनागुणं न स्पृशामि इति नृपसुनुः उवाच सा अर्थिनी अस्फुटं परिरम्भं ततान. रशनागुणं—Analyse रशनायाः गुणः रशनागुणः तं तादृशं, 'To the string of the zone,'

निर्दयं *adv.*—Analyse दयायाः अभावो निर्दयम् । अथ वा । निर्गता दया यस्माद् यथा स्यात्तथा, 'Unmercifully.' 'Pitilessly.' 'In a manner devoid of pity.' भुजयुगेन—Analyse भुजयोः युगं भुजयुगं तेन तादृशेन, 'By the pair of arms.' नृपसूनुः—Analyse नृपस्य सूनुः नृपसूनुः, 'The son of the king' (i. e. the prince). अस्फुटं—Analyse न स्फुटं अस्फुटं, 'Faint.' 'Indistinct.' न—'Being closely (*lit.* in a manner devoid of pity) embraced (by you) with your pair of arms, I shall not again touch the string of your girdle, said the prince. She, who was the suitor, gave him a faint embrace.'

St. 11. अन्तरीय°—Construe तत्पटान्तपरिधानरक्षिता अङ्गना अन्तरीयहरणे कृतत्वरं अपयान्तं तं राघवं पृष्ठतः परिरभ्य संरुरोध. अन्तरीयहरणे—Analyse अन्तरीयस्य हरणं अन्तरीयहरणं तस्मिन् तादृशे, 'Removing of under (or lower) garment.' कृतत्वरं—Analyse कृता त्वरा येन स कृतत्वरः तं तादृशं, 'To him who was making haste.' राघवं, Expl:—रघोः अपत्यं पुमान् राघवः तं तादृशं, 'To the descendant of the Raghus.' अङ्गना, Expl:—प्रशस्तान्यङ्गान्यस्याः सा अङ्गना, 'A damsel with well-rounded limbs.' *Cf.* Gaṇapá*tha* "अङ्गात्कल्याणे," 'The affix न comes after the word अङ्ग in the sense of beautiful, as अङ्गना, 'the fair-one i. e. a woman.' तत्पटान्त°—Analyse तस्य पटस्य अन्तः स एव परिधानं तेन रक्षिता, 'Protected by the cover of the skirt of his garment.' अन्तरीय°—'Protected by the cover of the skirts of his garment, the damsel with rounded limbs stopped that Rághava, who had used speed in removing her bodice and was moving away, by enclosing him in her arms from behind.'

St. 12. अंशुकस्य—Construe निशि अंशुकस्य रक्षणाकुला हस्तयुग्मधृतनीविबन्धना पराङ्मुखी सा अप्रमादकृतविघ्नं अन्तरा शयने स्वापमाप. अंशुकस्य, Expl:—अंशून् कायति इति अंशुकं तस्य तादृशस्य, 'Of the silk-woven garment.' *Cf.* Páṇi. III. 2. 3. "आतोऽनुपसर्गे कः," 'The affix क comes after a verbal root that ends in long आ when there is no उपसर्ग preceding it and when the object is in composition with it.' Or it may be explained as:—अंशुभिः काशते इति अंशुकः तस्य तादृशस्य. *Cf.* Páṇi. III. 2. 101. "अन्येष्वपि दृश्यते." 'The affix ड is seen to come after the verb जन् with a past signification, though it be in composition with other nouns, having cases other than those mentioned in the previous Sûtras. *Vide* हैम, "अंशु सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितेः" रक्षणाकुला—Analyse रक्षणे आकुला रक्षणाकुला, 'Intent on saving (or protecting).' हस्त°-Analyse हस्तयोः युग्मेन धृतं नीविर्बन्धनं यया सा, 'Holding the knot of her wearing garment with both of her hands.'

अप्रमाद°—Analyse न प्रमादः अप्रमादः तस्माद् या कृतिः तया विघ्नः तं अन्तरा, 'Without offering any obstacle to (his) careful actions.' पराङ्-मुखी—Analyse परागतं मुखं यस्याः सा पराङ्मुखी, 'With her face turned away from.' अंशुकस्य—'Intent on guarding her silk-woven garment at night and holding the knot of her wearing garment with both of her hands, she, with her face turned away (from her husband) enjoyed sleep, on the couch, without (offering any) obstacle to (Ráma's) careful actions.'

St. 13. यत्—Construe सा यद् दृढवस्त्रबन्धनैः ररक्ष तत् स्वापकालमवगम्य [ज्ञात्वा] भर्तरि प्रमृष्टवति संगतस्मृतिः मुषितेव सस्वरं रुरोद. दृढ°—Analyse वस्त्राणां बन्धनानि वस्त्रबन्धनानि । दृढानि च तानि वस्त्रबन्धनानि च दृढवस्त्रबन्धनानि तैः तादृशैः, 'With close tie of garments.' स्वापकालं—Analyse स्वापस्य कालः स्वापकालः तं तादृशं 'The time of sleep.' प्रमृष्टवत्—'One who has touched.' संगत°—Analyse संगता स्मृतिर्यस्याः सा संगतस्मृतिः, 'She who has collected her thoughts.' सस्वरं *adv.*—Analyse स्वरेण सह यथा स्यात्तथा सस्वरं, 'Loudly.' 'Bitterly.' यत्—'When her husband, knowing the time of her sleep, touched what she protected with close ties of garments, she, having collected her thoughts, cried aloud as one robbed'.

St. 14. यत्न°—Construe अथ स यत्नगम्यं मैथिलीमुखं अनुभूय नहि तृप्तिमाययौ । आननेन परिघट्यबोधितं पद्मकुड्मलं राजहंसः इव. यत्नगम्यं—Analyse यत्नेन गम्यं यत्नगम्यं, 'Accessible with efforts.' मैथिलीमुखं—Analyse मैथिल्याः मुखं मैथिलीमुखं, 'The face of the daughter of the Mithila king.' राजहंसः—Analyse हंसानां राजा राजहंसः, 'A royal swan.' पद्मकुड्मलं—Analyse पद्मस्य कुड्मलं पद्मकुड्मलं, 'A lotus-bud.' यत्न°—'Then he having known (the pleasure of) the face of the daughter of the Mithila king, accessible with efforts, was not (completely) satisfied, like a royal swan enjoying a lotus-bud, made to bloom, after striking it with its bill.'

St. 15. प्रेम°—Construe स दयार्द्रहृदयः यत्प्रेमवेगदृढदंशपीडितं तत् तदीयमधरोष्ठपल्लवं शनैः पिबन् वेदनां क्षणेन विनिनाय. प्रेम°—Analyse दृढश्चासौ दंशश्च दृढदंशः । प्रेम्णः यो वेगः तेन दृढदंशेन पीडितं प्रेमवेगदृढदंशपीडितं, 'Injured (or wounded) by a bite sharp on account of the force of love.' अधरोष्ठ°—Analyse अधरश्चासौ ओष्ठश्च अधरोष्ठः स एव पल्लवः तं अधरोष्ठपल्लवं, 'Sprout-like lower lip.' दयार्द्र°—Analyse दयया आर्द्रं हृदयं यस्य स दयार्द्रहृदयः, 'Having a heart wet with pity.' 'Kind-hearted.' प्रेम°—'He, with his kind heart, drinking slowly that sprout-like lower lip of hers, which was injured by a bite, sharp on account of the force of love, removed the pain in a moment.'

St. 16. ग्राहितं—Construe नृपतिशक्रसूनुना विविधचाटुचेष्टितैः ग्राहितं स्वाधरं [सा] मानिनी पानवर्जितं अदन्तविक्षितं च भूयः एव मृजति स्म [विसृजति स्म]. नृपति°—Analyse नृपतीनां शक्रः नृपतिशक्रः नृपेन्द्रः तस्य सूनुः तेन तादृशेन, 'By the son of the best of kings.' स्वाधरं—Analyse स्वस्य अधरः स्वाधरः तं तादृशं, 'His own lower lip.' विविध°—Analyse विविधानि च चाटुचेष्टितानि च विविधचाटुचेष्टितानि तैः तादृशैः, 'With various agreeable words and gestures.' पानवर्जितं—Analyse पानेन वार्जितः पानवार्जितः तं तादृशं, 'Without drinking it up.' 'Without kissing.' अदन्तविक्षितं—Analyse दन्तैः विक्षितः दन्तविक्षितः । न दन्तविक्षितः अदन्तविक्षितः तं तादृशं, 'Without injuring it with her teeth.' ग्राहितं—'The proud lady left at once his lower lip, which she was forced to take in by the son of the best of kings, with various agreeable words and gestures, without a kiss on it and without a bite by her teeth.'

St. 17. स्वं—Construe रहसि अपवाहितांशुकं स्वं नितम्बं प्रिये पश्यति सति कामिनी प्रार्थनामपि विनैव स्वयं पल्लवस्निग्धरागं अधरं [तस्मै] ददौ. अपवाहित°—Analyse अपवाहितं अंशुकं यस्मात् स अपवाहितांशुकः तं तादृशं, 'The silk-woven garment from which has been removed.' पल्लव°—Analyse पल्लवः इव स्निग्धो रागः यस्मिन् स तं तादृशं, 'Having a colour glossy like the foliage.' स्वं—'When the loving husband was looking in secret at her hip, from which the silk-woven garment was removed, the loving damsel herself offered even without a request, her lip, with a colour glossy like the foliage.'

St. 18. सा—Construe मदेन मदनेन लज्जया साध्वसेन च विमिश्रचेष्टिता सा सपदि तादृशीं दशामाययौ । शक्यविभ्रमा या [दशा] वक्तुमपि न. विमिश्र°—Analyse विमिश्रं चेष्टितं यस्याः सा विमिश्रचेष्टिता, 'Displaying actions mixed (or mingled) together.' शक्यविभ्रमा—Analyse शक्याः विभ्रमाः यस्यां सा शक्यविभ्रमा, 'The gestures whereof were easily practised.' Translate:—'She, displaying her actions blended together by pride, love, coyness and fear, instantly reached that state in which she practised her gestures easily, and so it could not be described.'

St. 19. वर्जनाय—Construe भामिनी सुरतस्य वर्जनाय यत् पटुचाटुचेष्टितं वाञ्छति स्म तदेव स्वयं योषितः निधुवनस्य वृद्धये समजायत. पटु°—Analyse पटु च चाटु च चेष्टितं च एतेषां समाहारः पटुचाटुचेष्टितं, 'The clever and agreeable words and actions.' वर्जनाय—'The clever and agreeable words and actions which the damsel longed for in order to avoide the intercourse, themselves resulted in increasing the excitement of the lady.'

St. 20. अश्रुणा—Construe कामिनी भर्तरि आत्मनः सुरतखेदं अश्रुणा व्याजहार। पुलकेन संमदं च व्याजहार । भावनृत्यकुशला इव गिरा तु लज्जया न व्याजहार.

सुरतखेदं—Analyse सुरतस्य खेदः सुरतखेदः तं सुरतखेदं, 'Fatigue due to enjoyment.' भावनृत्यकुशला—Analyse भावे नृत्ये च कुशला भावनृत्यकुशला 'Skilled in emotional feelings and dance.' अश्रुणा—'The loving girl proclaimed her fatigue due to enjoyment by her tears and her joy by horripilation to her husband, but not by words, being overcome with modesty, like a woman skilled in emotional feelings and dance.'

St. 21. यत्—Construe रतिषु तरसा अभियोजितं यद्यद् योषितः खेदवृत्तये आस तत्तदेव पुनः कामिना मृदु साधितं [सत्] तच्छ्रमं अपनयति स्म. खेदवृत्तये—Analyse खेदस्य वृत्तिः खेदवृत्तिः तस्यै खेदवृत्तये, 'For the feeling of depression.' तच्छ्रमं—Analyse तस्याः श्रमः तच्छ्रमः तं तादृशं, 'Her fatigue.' यत्—'Whatever, being done with force, brought on the feeling of depression regarding the enjoyment to the lady, removed her fatigue when again softly effected by the loving husband.'

St. 22. केश°—Construe अथ निधुवनेन विश्लथं केशपाशं बन्धुं उद्यता मैथिली प्रिये बाहुमूलगतलोचने [सति] लज्जया सस्मितं अवनमति स्म. केशपाशं—Analyse केशानां पाशः केशपाशः तं, 'The braid of hair.' बाहु°—Analyse बाह्वोर्मूलं बाहुमूलं तत्र गते लोचने यस्य स तस्मिन्, 'Having eyes directed to the pit of the arms.' सस्मितं—Analyse स्मितेन सह यथा स्यात्तथा, 'Smilingly.' Translate:—'Then the daughter of the king of Mithilá who strove to bind her braid of hair which had become loose by the enjoyment, bent her head smilingly through coyness, when her loved-companion directed his eyes towards the pit of the arms.'

St. 23. इति—Construe इति अनङ्गशिखिना हृदि हते [सति] क्ष्माधिपस्य दुहितुः निविष्टया लज्जया कतिपयेषु वासरेषु गलितेषु तानवं शिश्रिये. *Cf.* Ku. VIII. 13. "वासराणि कतिचित्कथञ्चन स्थाणुना पदमकार्यत प्रिया । ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम् ॥" अनङ्ग°—Analyse अनङ्गस्य मदनस्य शिखी बाणः अनङ्गशिखी तेन, 'By the arrow of the bodiless one,' (i. e. मदन). क्ष्माधिपस्य—Analyse क्ष्मायाः अधिपः क्ष्माधिपः तस्य तादृशस्य, 'Of the lord of the earth.' तानवं शिश्रिये-means, तानवं तनुत्वम् । मन्दभावमिति यावत् । शिश्रिये, 'Attained diminution (i. e. became loose).' इति—'When her heart was thus hit by the arrow of the bodiless one (i. e. the god of love), the seated feeling of modesty of the daughter of the lord of the earth began to diminish after the passing of several days.'

St. 24. शर्वरीषु—Construe शर्वरीषु विरलीकृतत्रपा नृपात्मजा निद्रया हृता किल । नीविबन्धनमतीत्य संस्थितमस्य हस्तं बलाद् नापाहरत्. *Cf.* Ku. VIII. 4. नाभिदेशनिहितः सकम्पया शङ्करस्य रुरुधे तया करः तद्दुकूलमथ चाभवत्स्वयं दूरमु-

च्छ्वसितनीविबन्धनम् ॥" शर्वरीषु, Expl:—शृणाति चेष्टाः इति शर्वरी तासु, 'During the nights.' 'At night times.' Derived from शॄ *vt.* 9. P. (सेट्). *Cf.* Unâdisûtra "कॄशॄगॄपॄत्वरिभ्यः ष्वरच्." Also Pàṇi. IV. 1. 41. "षिद्गौरादिभ्यश्च," 'The affix ङीष् is employed in forming the feminine after words ending with affixes which have an indicatory ष् and after the words गौर and the rest.' *Vide* शब्दार्णव, "शर्वरी शार्वरी शर्या." विरलीकृतत्रपा—Analyse विरलीकृता त्रपा यस्याः सा विरलीकृतत्रपा, 'With her sense of modesty (or female bashfulness) diminished (or relaxed).' नृपात्मजा—Analyse नृपस्य आत्मजा नृपात्मजा 'The daughter of the king.' नीविबन्धनं—Analyse नीवेर्बन्धनं नीविबन्धनं, 'The knot of the garment.' शर्वरीषु—'The daughter of the king, with her sense of modesty relaxed, during the course of nights, was in truth overpowered by sleep and did not forcibly throw off his hand, resting after getting beyond the knot of the garment.'

St. 25. निद्रिता—Construe निद्रिता सा भयानकस्वप्नदर्शनकृतं प्रतिभयं प्रपद्य राघवं उरःस्थले कुचघटौ सन्निधाय दृढं परिषस्वजे. प्रतिभयं—Analyse प्रतिगतं भयेन प्रतिभयं, 'Exciting fear.' *Cf.* Páṇi. II. 2. 18. and the Vàrtika thereto, "प्रादयो गताद्यर्थे प्रथमया," 'The word प्र &c., when the sense is that of 'gone' or the like, combine with what ends with the first case-affix.' Or it may be analysed as, प्रतिगतं भयमस्मिन् इति प्रतिभयं. *Cf.* Páṇi. II. 2. 24. and the Vàrtika thereto. "प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः", 'The optional compounding of what arises from a verbal root coming after प्र &c. should be stated, and the elision of the subsequent term.' See Hema. "प्रतिभयं भये भीष्मे." भयानक°—Analyse स्वप्नस्य दर्शनं स्वप्नदर्शनम्। भयानकं यत् स्वप्नदर्शनं तेन कृतं, 'Brought on by the sight of a terrible dream.' कुचघटौ—Analyse कुचावेव घटौ कुचघटौ, 'Pitcher-like breasts.' उरःस्थले—Analyse उरसः स्थलं उरःस्थलं तस्मिन्, 'On the broad surface of the chest.' Translate :—'She, in her sleep, was overcome with exciting fear, brought on by the sight of a terrible dream and placing in close contact her pitcher-like breasts on the broad chest (of Ràghava), embraced him closely.'

St. 26. ज्ञात°—Construe मदातुरे कामिनि नीविबन्धनं क्षिपति [सति] ज्ञातमन्मथरसा सा भयेन अञ्जलिं कुर्वती किल अंशुकात् करयुग्मं जहार. *Cf.* Ku. VIII. 13. "ज्ञातमन्मथरसा शनैः शनैः।" ज्ञात°—Analyse ज्ञातो मन्मथस्य रसो यया सा ज्ञातमन्मथरसा, 'Who had known the taste of the god of love.' 'Who had learnt the flavour of the mind-churning god.' मदातुरे—Analyse मदेन आतुरः मदातुरः तस्मिन्,

'Agitated by passion.' नीविबन्धनं—Analyse नीवेर्बन्धनं नीविबन्धनं, 'The knot of the cloth.' करयुग्मं—Analyse करयोर्युग्मं करयुग्मं, 'A pair of the hands or arms.' ज्ञात°—'That lady, who (then) knew the taste of love, removed her hands from the silk-woven cloth, folding them as if (किल) with fear, when her loving husband, agitated by passion, began to undo the knot of the garment.'

St. 27. संमता—Construe मेधया भुवनस्य संमतापि निधुवनोपदेशिनि राघवे [सति] भूरिशः तदुपदेशवाञ्छया गुणितस्य विस्मृतिं व्याजहार. निधुवनोपदेशिनि--Analyse निधुवनं उपदिशतीति निधुवनोपदेशी तस्मिन् तादृशे, 'Giving instructions in the art of pleasure (or enjoyment).' गुणितस्य विस्मृतिं--'Forgetfulness of the multiplicity (of instructions).' 'Forgetfulness of the large number (of instructions).' तदुपदेश°—Analyse तस्य उपदेशः तदुपदेशः तस्मिन् वाञ्छा तया, 'With a desire of receiving instructions from him.' Translate:—'While Rāghava was giving her instructions in the art of pleasure, she, who was acknowledged by the world to be possessed of intellect (or memory) said that she forgot the multiplicity of instructions, with a desire of receiving them frequently.'

St. 28. स्वेद°—Construe स्वेदबिन्दुनिचिताग्रनासिका धूतहस्तलतिका सशीत्कृतिः सोढमन्मथरसा नृपात्मजा राघवस्य तृप्तये न बभूव. स्वेद°--Analyse स्वेदानां बिन्दवः तैः निचिता अग्रनासिका यस्याः सा, 'Having the tip of her nose covered over with drops of perspiration.' धूत°--Analyse हस्तः एव लतिका हस्तलतिका। धूता हस्तलतिका यया सा, 'Having her creeper like hands trembling.' सशीत्कृतिः--Analyse शीत्कृत्या सह सशीत्कृतिः. 'Breathing pleasantly.' सोढ°–Analyse सोढो मन्मथस्य रसो यया सा, 'Who had patiently endured the flavor (or relish) of love.' नृपात्मजा—Analyse नृपस्य आत्मजा नृपात्मजा, 'The daughter of the king.' स्वेद°—'That daughter of the king, with the tip of her nose covered over with drops of perspiration, her creeper-like hand trembling, breathing pleasantly after having enjoyed the relish of love, did not suffice for the gratification of Rāghava.'

St. 29. चोदयति--Construe युवतिकृत्यनैपुणं शिक्षितुं अवनिपालनन्दने चोदयति [सति] देहजन्मशरखण्डितत्रपा सा रहसि कर्मकर्तृतां ययौ. *Cf.* Ku. VIII. 17. "शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया। शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम्"॥ अवनि°--Analyse अवनिं पालयतीति अवनिपालः तस्य नन्दनः तस्मिन्, 'The son of the protector of the earth.' युवति°—Analyse युवतेः कृत्यं युवतिकृत्यं तस्मिन् नैपुणं युवतिकृत्यनैपुणं, 'The skill (or proficiency) in woman's deeds.'

देह°—Analyse देहजन्मनो मन्मथस्य शरेण बाणेन खण्डिता निर्गता त्रपा लज्जा यस्याः सा, 'Having her modesty relaxed (or destroyed) by the arrows of the body-born one' (i. e. the god of love). कर्मकर्तृतां—Analyse कर्मणः कर्तृता कर्मकर्तृता तां, 'An object-agent' or 'object containing agent,' i. e. an agent which is at the same time the object of an action.' 'Agent of an action.' 'One who acts of his own accord.' Translate:—'While the son of the king was impelling her to learn the skill in (or art of) woman's deeds, she, with her modesty relaxed by the arrow of the body-born one (i. e. the god of love), assumed, in secret, the agency of action (in love affairs i. e. became the कर्ता of the affairs of love).' The poet means to say that सीता was till then the कर्म or an object of शिक्षितुं (i. e. a recipient of the art of woman's deeds). But now she became the agent or कर्ता who could impart instructions in युवतिकृत्यनैपुणं.

St. 30. यत्—Construe मदनेन पीडिता यद् जगाद तद् सहासरसं ऊचिषि प्रिये [सति] वलितदेहशोभिनी लज्जिता [सती] तत्तद् अस्फुटं सस्मितं उवाच सहासरसं—Analyse हासेन सह सहासः स एव रसो यस्मिन् तद् यथा स्यात्तथा 'With a relish for ridicule.' सस्मितं *adv.*—Analyse स्मितेन सह सस्मितं, 'Smilingly.' 'Laughingly.' वलित°—Analyse वलितो यो देहः तेन शोभते इति वलितदेहशोभिनी, 'Shining with her body turned (aside).' अस्फुटं—Analyse न स्फुटं अस्फुटं, 'Faintly.' यत्—'While her loving husband uttered with a relish for ridicule what she had said, when troubled with love, she, shining with her body turned, said it faintly, with a smiling face, being ashamed.'

St. 31. रत्न°—Construe संगतौ [तयोर्विलासकाले] भाषितं हृदि निधाय रत्नतल्पनिकटस्थिते शुके निःसहास्मि मां विमृज इति जल्पति [सति] व्रीडिता पञ्जरं परिजघान. रत्न°—Analyse रत्नानां तल्पः तस्य निकटे स्थितः तस्मिन्, 'Hung near the bed of jewels.' निःसहा—Analyse निर्गतं सहो यस्याः सा निःसहा, 'From whom power is departed.' 'Powerless.' Translate:—'Having stored her speech in its heart at the time of their intercourse, when the parrot, hung near the bed of jewels, was uttering the words 'I am powerless, please, leave me,' she, overcome with shame, struck the cage of the bird.'

St. 32. राम°—Construe रामवक्त्रगलितैः श्रमाम्बुभिः कुचयुगस्य कुंकुमं छिद्रितं निरीक्ष्य सखीजने हसिते [सति] सा संमुखात् सस्मितं व्यपजगाम. राम°—Analyse रामस्य वक्त्राद् गलितानि तैः तादृशैः 'Trickling down from the face of Ráma.' श्रमाम्बुभिः—Analyse श्रमस्य अम्बूनि श्रमाम्बूनि तैः, 'By the drops of fatigue.' कुचयुगं—Analyse कुचयोर्युगं तस्य, 'Of the pair

of breasts.' सखीजने—Analyse सख्यः एव जनः सखीजनः तस्मिन्, 'Female friends.' कुंकुमं, Expl:—कुंकुं इति शब्दोऽस्ति वाचकत्वेनास्य, 'Saffron,' 'saffron powder.' *Cf.* Pāṇi. V. 2. 127. "अर्शआदिभ्योऽच्," 'The affix अच् (अ) comes in the sense of मतुप् after words अर्श &c.' Or it is derived from कुक् *vt.* 1. A. (सेट्) 'To take,' 'to receive.' कुक्यते इति कुंकुमम्. *Cf.* Pāṇi. VII. 1. 80. "आच्छीनद्योर्नुम्." 'When the affix शतृ comes after a verbal stem ending in अ or आ, it may optionally take the augment नुम् before the neutral case-ending शी and before the feminine affix ई. (कुक् + उमच् + नुम् = कुंकुमम्). इत्यत्र "नुम्" इति योगविभागान्नुम्. Translate:—'When her (female) friends saw the saffron paste on her breasts, wiped off by the drops of fatigue, trickling down from Rāma's face, and laughed, she moved away from their presence with a smile.'

St. 33. स्वानु°—Construe अथ ईर्ष्यया इव चोदितोद्यतः मनोभवः मैथिलस्य दुहितुश्चेतसः स्वानुवृत्तिविधिवन्ध्यं लज्जितं निरवशेषं आक्षिपत्. स्वानु°—Analyse स्वस्य अनुवृत्तिः स्वानुवृत्तिः तस्याः विधौ वन्ध्यं स्वानुवृत्तिविधिवन्ध्यं, 'Unproductive of actions in conformity with his self.' चोदितोद्यतः—Analyse आदौ चोदितः पश्चाद् उद्यतः चोदितोद्यतः, 'Active on being incited.' मनोभवः—Analyse मनसि भवः जन्म यस्य स मनोभवः, 'The mind-born one.' 'The fancy-born one.' निरवशेषं—Analyse निर्गतः अवशेषो यस्मात् तत् यथा स्यात्तथा, 'In a manner not keeping any residue (i. e. wholly, entirely).' स्वानु°—'Active on being incited as if by envy, the god of love, wholly drove out of the mind of the daughter of the मैथिल king the sense of shame, which was unproductive of actions in conformity with his self.'

St. 34. दीर्घिका°—Construe क्वचित् प्रमदकानने दीर्घिकाजलतरंगनिर्धुतत्यक्तपुष्पमयमण्डनौ तौ इतरेतराश्रयाः मृजाः चाटुरम्यं तेनतुः. दीर्घिका°—Analyse दीर्घिकायाः जलतरङ्गेषु निर्धुतं अत एव त्यक्तं पुष्पमयं मण्डनं याभ्यां तौ तादृशौ, 'Who had abandoned their decorations of flowers which were washed off by the waves in the water of the oblong pond.' चाटुरम्यं—Analyse चाटुना रम्यं यथा स्यात्तथा, 'In a manner pleasing on account of agreeable words.' इतरेतराश्रयाः—Analyse इतरेतरं आश्रयन्ते इति इतरेतराश्रयाः, 'In which they hung for support on each other.' प्रमदकानने—Analyse प्रमदं च तत् काननं च प्रमदकाननं तस्मिन्, 'In a pleasure-garden.' मृजा *f.*—'A bath,' *Accu. plu.*, and an object to तेनतुः. Translate:—'Sometimes in the pleasure garden, they two abandoned their decorations of flowers which were washed off by the waves in the water of the artificial pond and enjoyed, in a man-

ner pleasing on account of agreeable words, baths, in which they hung for support on each other.'

St. 35. चाटु°—Construe चाटुमात्रकरणप्रयोजनः स तुल्यरागमपि यावकं योषितः तरुणपल्लवप्रभे चरणपङ्कजद्वये न्यपातयत्. चाटु°—Analyse चाटु एव चाटुमात्रं तस्य करणमेव प्रयोजनं यस्य सः, 'Whose sole aim was to do coaxing things.' तुल्यरागं—Analyse तुल्यो रागो यस्य स तं तादृशं, 'Of a similar colour.' चरण°—Analyse चरणमेव पङ्कजं चरणपङ्कजं तस्य द्वयं तस्मिन् तादृशे, 'On a pair of lotus-like feet.' तरुण°-Analyse तरुणश्चासौ पल्लवश्च तरुणपल्लवः तस्य प्रभेव प्रभा यस्य स तस्मिन् तादृशे, 'Having a lustre like that of the fresh sprout.' चाटु°—'He, whose sole aim was to do coaxing things, placed the red dye, though of a similar colour, on the pair of the lady's lotus-like feet, which had the lustre of fresh (or young) sprouts.'

St. 36. अंघ्रि°—Construe तरुणार्करोचिषा कुंकुमेन स्वयं अंघ्रियुग्मं अनुलिम्पतः अस्य तत् परिवृद्धवेपथु करयुग्मं दूरमेवारुरोह. अंघ्रि°—Analyse अंघ्र्योः युग्मं अंघ्रियुग्मं, 'A pair of toes.' तरुण°—Analyse तरुणश्चासौ अर्कश्च तरुणार्कः तस्य रोचिरेव रोचिर्यस्य तत् तेन तादृशेन, 'Having brilliancy of the new sun.' करयुग्मं—Analyse करयोर्युग्मं करयुग्मं, 'A pair of arms.' परिवृद्ध°—Analyse परिवृद्धो वेपथुर्यस्य तत् परिवृद्धवेपथु, 'With its tremor much increased.' तद्दूरमेवारुरोह—'Began to ascend very high,' i. e. owing to the tremor of his arms he could not paint the dye on her proper limb but far away from it. Translate:—'That pair of his arms, who was himself painting her toes with saffron paste, having the brilliance of the new sun, began to ascend very high, with its tremor much increased.'

St. 37. मेखलां—Construe अत्र [नितम्बे] परं किंचिद् अनुपाश्रितो मणिमेखलागुणो दुर्नहो नु इति मेखलां अधिनितम्बं अर्पयन् स करं तत्र तत्र पुनरादधौ. अधिनितम्बं—Analyse नितम्बे इति अधिनितम्बं, 'Above the hips.' अनुपाश्रितः—Analyse न उपाश्रितः अनुपाश्रितः, 'Not depending on something for support.' 'Holding nothing for support.' दुर्नहः—Analyse नद्धुं दुष्करः दुर्नहः 'Hard to fasten.' 'Difficult to bind up.' मणि°—Analyse मणीनां मेखला मणिमेखला तस्याः गुणः मणिमेखलागुणः, 'The string of the girdle of jewels.' 'The string of the jewelled-zone.' Translate:—'The string of the girdle of jewels, unsupported by some other thing is here indeed hard to fasten. With this thought, he, putting the zone above her hips, placed his hands there again and again.'

St. 38. आचरन्—Construe अथ पुलकितेन पाणिना विलेपनक्रियां आचरन् स चन्दने सममपि स्थिते सति पुनः पुनः कुचयुगं सस्पृहं अस्पृशत्. विलपन°—

Analyse विलेपनस्य क्रिया तां, 'The work of amorous painting.' सस्पृहं *adv.*—Analyse स्पृहया सह सस्पृहं, 'Wistfully.' 'With a passionate longing.' कुचयुगं—Analyse कुचयोर्युगं कुचयुगं, 'A pair of breasts.' आचरन्—'He, performing the work of amorous painting with his hand, thrilled with joy, longingly touched the pair of her breasts again and again though the sandle paste was in its proper position.'

St. 39. पत्रं—Construe आनमिततर्जनीशिरःस्पृष्टकर्णलतिकः अयं पत्रमर्पयन् पूर्वं अर्धमुकुलीकृतेक्षणं सुरभिगर्भं तन्मुखं अन्वभूत्. पत्र=पत्रावली, Drawing lines or figures on the face or person with coloured and fragrant pigments (or sometimes with musk and fragrant substances). आनमित°—Analyse आनमिता या तर्जनी तस्याः शिरसा स्पृष्टा कर्णयोर्लतिका येन सः, 'Who has touched her creeper-like ears with the point of his fore-fingers slightly bent.' अर्ध°—Analyse अर्धं मुकुलीकृते ईक्षणे यस्य तत् 'The eyes on which were half closed.' तन्मुखं—Analyse तस्याः मुखं तन्मुखं, 'Her face.' सुरभि°—Analyse सुरभिगर्भे यस्य तत् सुरभिगर्भं, 'Having fragrance in its interior.' 'Possessing fragrance in its interior.' Translate:—'He, drawing figures (on her face), touched her creeper-like ears with the point of his fore-finger slightly bent and had an experience of her face which had fragrance in its interior and the eyes on which were previously half-closed.'

St. 40. आत्मना—Construe तदा अधरपानलोलुपः पुनः पुनः [तमेव] निष्पिबन् मुदितः स पुरा युवतिदन्तवाससि आत्मनैव कृतं यावकं उज्जहार. युवति°—Analyse युवतेर्दन्तवासः युवतिदन्तवासः तस्मिन् तादृशे, 'On the lips of the young lady.' अधर°—Analyse अधरस्य पाने लोलुपः अधरपानलोलुपः 'Eager to drink (kiss) her lower lip.' आत्मना—'He then, eager to kiss her lower lip, drank (it) with delight again and again and removed the dye which he himself had formerly painted on (*lit.* applied to) the lips of the young lady.'

St. 41. चुम्बति—Construe स्वयमुपाहिताञ्जनं योषितो विलोचनं प्रियतमे चुम्बति [सति] अविकाशचक्षुषो [जानक्याः] कर्णगं अशोकपल्लवं निजं रागं प्रापउपाहित°—Analyse उपाहितं अञ्जनं यस्य तद् उपाहिताञ्जनं, 'To which the collyrium was applied.' अविकाश°—Analyse न विकाशो ययोस्ते अविकाशे। तादृशे चक्षुषी यस्याः सा तस्याः अविकाशचक्षुषः, 'Having eyes which had not an open (or splendid) appearance.' 'Had eyes which were partially opened.' कर्णगं—Analyse कर्णं गच्छतीति कर्णगं, 'Placed on the ear.' अशोकपल्लवं—Analyse अशोकस्य पल्लवं अशोकपल्लवं, 'The sprout

of an As'oka tree.'. चुम्बति—' While the husband kissed the eye of the lady, to which he himself had applied the collyrium, the sprout of As'oka placed on her ear, whose eyes had not an open (or splendid) appearance, assumed its own (attractive) colour.'

St. 42. पुष्प°—Construe पुष्परत्नविभवैः राजनन्दने यथेप्सितं विभूषयति [सति] सा दर्पणं चकांक्ष ननु । योषितां मण्डनं स्वामिसंमदफलं हि. *Cf.* Ku. VII. 22. "आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी । हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः" ॥ पुष्प°—Analyse पुष्पाणि च रत्नानि च पुष्परत्नानि तेषां विभवाः तैः तादृशैः, ' With the excellence of flowers and jewels.' यथेप्सितं *adv.*—Analyse ईप्सितं अनतिक्रम्य यथेप्सितं, 'According to one's liking.' 'To his liking.' राजनन्दने—Analyse राज्ञः नन्दनः राजनन्दनः तस्मिन् तादृशे, 'A son of a king.' 'A prince.' स्वामि°—Analyse स्वामिनां संमदः स्वामिसंमदः स एव फलं यस्य तत् स्वामिसंमदफलं, ' Having its reward in the pleasure of their lords.' पुष्परत्नविभवैः—' Did she not wish for a mirror while the prince was decorating her to his liking with the excellence of flowers and jewels ? (No), for the decorations of women have their reward in the pleasure of their lords.'

St. 43. ताम्—Construe अनङ्गकृतचारुविभ्रमां तां निर्दयं समुपगुह्य समकालं चुम्बितुं वीक्षितुं च अप्रभुः राघवो मुहुर्व्याकुलः इव आस. अनङ्ग°—Analyse अनङ्गेन कृताः चारुविभ्रमाः यया सा तां तादृशीं, ' Who has made pretty gestures on account of love.' ' Who was making pretty (amorous) gestures sprung from love.' विभ्रम *m.*—Amorous gestures of any kind, particularly one thus defined:—" चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः." निर्दयं—Analyse दयायाः अभावो निर्दयं, ' Pitilessly.' ' Passionately.' ' Violently.' समकालं—Analyse समः कालः यस्य तद् यथा स्यात्तथा, 'Simultaneousty.' अप्रभुः—Analyse न प्रभुः अप्रभुः, 'Wanting power.' ' Unable.' ताम्—' Having passionately embraced her, who was making pretty gestures on account of love, Rághava, unable to kiss and look at her simultaneously was, as it were, often confused.'

St. 44. प्रार्थिता—Construe सा प्रार्थितापि कानिचिन्न चकार । स्वयमपि कानिचिद् व्यधत्त । अबला हृदयरत्नविक्रयक्रीतं एनं यथेप्सितं अन्वभूत्. हृदय°—Analyse हृदयमेव रत्नं हृदयरत्नं तस्य विक्रयेण क्रीतः तं तादृशं, ' Bought by the sale of the jewels of her heart.' यथेप्सितं—Analyse ईप्सितमनतिक्रम्य यथेप्सितं, ' According to her desire.' प्रार्थिता—' Certain things she did not do though requested and others she did herself. The lady had an enjoyment of him, who was bought by the sale of the jewel of her heart, according to her desire.'

St. 45. येन—Construe असौ तां येन येन हरति स्म तत्तदेव [तस्याः] योषितः पुनराप हि [यस्मात् कारणात्] सज्जनेषु विहितं यच्छुभं सद्यः एव फलबन्धि जायते. सज्जनेषु—Analyse सन्तश्च ते जनाश्च सज्जनाः तेषु तादृशेषु, 'To the virtuous.' फलबन्धि—Analyse फलानि बध्नातीति फलबन्धि, 'Developing (or forming) fruit.' येन—' He got from the lady those very things by whichever of them he attracted her; for, the good that is done to the virtuous develops fruit at once.'

St. 46. कर्मणि—Construe स्वमुखपद्मविच्युतस्वेदबिन्दुहतकान्तवक्षसि कर्मणि [क्रीडाकर्मणि] उपकाञ्चि संचरत् तस्य चक्षुः वीक्ष्य सा तद्वं [तस्य] वक्षसि मुमोच स्वमुख°—Analyse स्वस्य मुखं स्वमुखं । तदेव पद्मं तस्माद् विच्युताः ये स्वेदबिन्दव तैः हतं कान्तस्य वक्षो यस्मिन् तत् तस्मिन् तादृशे, ' In which she struck her husband's breast with drops of sweat falling down from her lotus-like face.' उपकाञ्चि *adv.*—Analyse काञ्चेः समीपं उपकाञ्चि, ' Near the girdle (or zone).' कर्मणि—' When she observed his eyes moving about the region of the girdle in the act in which she struck her husband's breast with drops of sweat falling down from her lotus-like face, she threw her body on his breast.'

St. 47. भर्तरि—Construe अधरदंशनिग्रहैः जल्पयति भर्तरि [सति] प्रणयमौनमास्थिता [सा] तादृशं निग्रहं चिरमवाप्तुमिच्छया वचनानि नो चकार. प्रणयमौनं—Analyse प्रणयाद् मौनं प्रणयमौनं, ' Silence through affection.' अधर°—Analyse अधरस्य दंशः तेन निग्रहाः तैः, ' By the chastisement of biting her lower lip.' भर्तरि—' While her husband was making her talk by the chastisement of biting her lower lip, she, preserving silence through affection (or silent through affection) uttered no words, with a desire to get that kind of punishment for a long time.'

St, 48. बालया—Construe हृदि बालया स्तनौ निधाय प्रसादने दन्तं आस्यकमलं [च] प्राप्तुमिच्छुः [स] विनापि दोषतो मुहुर्मुहुः रोषमाविरकरोत्. आस्यकमलं—Analyse आस्यं कमलमिव आस्यकमलं, 'The lotus-like face.' बालया—' He, desirous of getting, during propitiation, her teeth and lotus-like face after the placing of the breasts on his chest by her, frequently showed his anger even without any fault of hers.'

St. 49. अल्पदोष°—Construe जम्पती अल्पदोषविषयेऽपि प्रणयकोपवक्रतां जग्मतुः । अतिवृद्धिमागता स्नेहजातिः सुलभरोपसव्रणा जायते. अल्पदोष°—Analyse अल्पश्चासौ दोषश्च अल्पदोषः तस्य विषयः तस्मिन्, ' As regards small faults.' प्रणय°—Analyse प्रणयस्य कोपः प्रणयकोपः तेन वक्रता तां तादृशीं, 'To peevishness (or fretfulness) consequent on a lover's feigned anger.' स्नेहजातिः—Analyse स्नेहस्य जातिः स्नेहजातिः, ' Genuine love.' ' Genuine affection.' अतिवृद्धिं—Analyse अतिशयिता वृद्धिः अतिवृद्धिः तां, ' Extraor-

dinary growth (or increase). ' सुलभ°—Analyse सुलभो यो रोषस्तेन सव्रणा सुलभरोषसव्रणा, ' Bearing the sore of easy wrath.' 'Bearing the sore of wrath easily provoked.' अल्पदोष°—'The couple became cross through lover's feigned anger even as regards small faults. ' ' Love, developed very much, has the sore of easy wrath. '

St. 50. अश्रुषु—Construe प्रणयकोपवह्निना लोहितत्वमुपनीय अश्रुषु पायितः [अस्मिन्] निपातितः तत्कटाक्षविशिखः अस्य सुस्थिरं धैर्यं निचकर्त. प्रणय°—Analyse प्रणयस्य कोपः प्रणयकोपः स एव वह्निस्तेन, ' By the fire of her anger through excess of affection. ' तत्कटाक्ष°—Analyse तस्याः कटाक्षः एव विशिखो बाणः तत्कटाक्षविशिखः, ' The dart of her glance. ' अश्रुषु—' The dart of her glance reddened (*lit.* brought to redness) by the fire of her anger through excess of affection, watered in her tears and discharged at him, hewed down his very steady courage. '

St. 51. कोपिता—Construe चिरनिवृत्तसङ्गतिः [अत एव] कोपिता सुप्तं एनं एत्य परिबोधशङ्किनी सा हस्तरुद्धचलकुण्डला शनकैः धृतश्वासवृत्ति चुचुम्ब. चिर°—Analyse चिरं निवृत्ता सङ्गतिर्यस्याः सा, ' Being removed from his company for long. ' परिबोध°—Analyse परिबोधं शङ्कते इति परिबोधशङ्किनी, ' Apprehensive of his waking. ' हस्त°—Analyse चलानि च तानि कुण्डलानि च चलकुण्डलानि । हस्ताभ्यां रुद्धानि चलकुण्डलानि यया सा, ' Who held by her hands the moving or dangling ear-rings. ' *Cf.* R. XI. 15. " ताडका चलकपालकुण्डला. " And Buddha-Charita V. 41. " चलकुण्डलचुम्बिताननाभिः. " धृत°—Analyse धृता श्वासस्य वृत्तिर्यस्मिन् कर्मणि यथा स्यात्तथा, ' In a manner in which she held her breath. ' कोपिता—' Provoked to anger when removed for long, she approached him, who was asleep and apprehensive of his waking, she held back her dangling ear-rings with her hands and kissed him slowly after holding her breath. '

St. 52. कैतवेन—Construe कलहेषु कैतवेन सुप्तया [तया] वसनं क्षिपन् आत्तसाध्वसः स ' चोर ' इति उदितहासविभ्रमं सप्रगल्भं अधरे अवखण्डितः. *Cf.* Ku. VIII. 3. " कैतवेन शयिते कुतूहलात्पार्वती प्रतिमुखं निपातितम् । चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत् " ॥ आत्तसाध्वसः—Analyse आत्तं साध्वसं येन स आत्तसाध्वसः, ' Full of fear. ' ' Having his fear vanished.' उदित°—Analyse उदितः हासः एव विभ्रमो यस्मिन् यथा स्यात्तथा, 'In a manner in which the laughing was excited sportively. ' सप्रगल्भं—Analyse प्रगल्भेन सह सप्रगल्भं, ' Boldly. ' कैतवेन—' In their love quarrels she pretended sleep and when he, full of fear, was taking off her garment, she sportively (*lit.* in a sportive laughter) calling him a thief boldly bit his (nether) lip.'

St. 53. सङ्गतानि--Construe सङ्गतानि परिहृत्य चारिणौ मानमेत्य क्कहचिद् अन्ययातनयनौ तौ परस्परं उरसा निहत्य कलहं वितेनतुः किल. अन्य°—Analyse अन्ययोर्याते नयने ययोस्तौ, 'With their eyes meeting each other.' क्कहचित् *ind.*—'Somewhere.' 'Anywhere.' 'To any place.' संगतानि—'They lived shunning each other's company and becoming proud they sought (love) quarrels.' 'Somewhere when their eyes met they, indeed, struck each other with their breasts.'

St. 54. एकदा—Construe एकदा अरिकदनः अर्धशशिमौलिसन्निभः स कान्तया सार्धं इद्धरुचि परिसंहृतातपं अम्बरं द्रष्टुं सौधमारुरोह. अरिकदनः—Analyse अरीणां कदनः अरिकदनः, 'The destroyer of foes (or enemies).' इद्धरुचि-Analyse इद्धा रुचिर्यस्य तद् इद्धरुचि, 'Having a clear brightness.' 'Possessing clear lustre.' परिसंहृतातपं—Analyse परिसंहृतः आतपो यस्मात् तत् परिसंहृतातपं, 'Free from heat.' 'That from which heat has been removed.' अर्ध°—Analyse अर्धश्चासौ शशिश्च अर्धशशिः स एव मौलौ यस्य स अर्धशशिमौलिः तेन सन्निभः अर्धशशिमौलिसन्निभः, 'Resembling S'iva having the half moon on his crest.' एकदा—'Once, the destroyer of his foes, who resembled S'iva having the half moon on his crest, ascended the mansion with his loved-companion inorder to behold the sky, possessing clear lustre and free from heat.'

St. 55. वासरस्य—Construe राघवो वासरस्य विगमे समीरणैर्मन्दनार्तितस्तुगन्धिकुन्तलां सौधपृष्ठं अधितस्थुषीं जानकीं इदं वचो उवाच. मन्द°—Analyse मन्दं नर्तिताः सुगन्धयः कुन्तलाः यस्याः सा मन्दनर्तितसुगन्धिकुन्तला तां तादृशीं, 'Whose fragrant locks were made to dance (or flow) gently.' सौधपृष्ठं—Analyse सौधस्य पृष्ठं सौधपृष्ठं, 'On the terrace of the palace.' सौधः, Expl:– सुधा लेपोऽस्यातीति सौधः, 'A mansion.' 'A palace.' *Cf.* Páni. V. 2. 103 and the Vártika thereto, "अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम्," 'The words ज्योत्स्ना &c, are governed by this rule and take अण्.' समीरणैः, Expl:–सम्यग् ईरते गच्छन्ति। ईरयन्ति प्रेरयन्ति वा। इति समीरणाः तैः तादृशैः, 'By the breezes.' 'By the winds.' वासरस्य—'At the close (or end) of the day, Rághava addressed as follows Janakî, who was seated on the terrace of the palace and whose fragrant locks were made to dance (or flow) gently by the winds.'

St. 56. सन्निगृह्य—Construe करसन्ततिं सन्निगृह्य अस्तमस्तकमधिश्रितः एष रागवान् रविः क्वचित् प्रस्थितोऽपि बद्धतृष्णकः सन् भुवनं क्षणं पश्यतीव. करसन्ततिं Analyse कराणां सन्ततिः तां, 'The collection of rays.' अस्तमस्तकं—Analyse अस्तस्य मस्तकं अस्तमस्तकं तत्, 'On the top of the setting mountain.' सन्निगृह्य—'Though this red sun, collecting all his rays, has set out

somewhere; yet resting on the peak of the setting mountain, he is, as it were, looking eagerly at the world for a moment.'

St. 57. दिङ्मुखात्—Construe दिङ्मुखाद् अपसरन्तं नष्टतेजसं आतपं मुहुः अनुव्रजत्तमः भानुना रश्मिभिः समवबध्य कृष्यमाणमिव लक्ष्यते. दिङ्मुखात्—Analyse दिशां मुखं दिङ्मुखं तस्मात् तादृशात्, 'From the face of the quarters.' नष्टतेजसं—Analyse नष्टं तेजो यस्य स नष्टतेजाः तं नष्टतेजसं, 'Which has lost its lustre.' मुहुः *ind.*—'Suddenly.' 'All at once.' दिङ्मुखात्—'The darkness, suddenly following the sun-shine, which has lost its lustre and is moving away from the face of the quarters, is observed as if being dragged by the sun having bound it firmly together with his rays.'

St. 58. अन्तराणि—Construe स्रष्टरि तमसोऽन्तराणि प्रयच्छति [सति] युगक्षये जगतीव जलधिमध्यवर्तिनी रुचिः भूयः एव रविमण्डले लीयते. युगक्षये—Analyse युगस्य क्षयः युगक्षयः तस्मिन् युगक्षये, 'At the time of the destruction of the world.' रविमण्डले—Analyse रवेर्मण्डलं रविमण्डलं तस्मिन् रविमण्डले, 'In the disc of the sun.' जलधिमध्यवर्तिनी—Analyse जलं धीयतेऽत्र जलधिः तस्य जलधेर्मध्यं जलधिमध्यं तस्मिन् वर्तते इति जलधिमध्यवर्तिनी, 'Lying in the middle (or centre) of the ocean.' अन्तराणि—'As the earth, coming to the centre of the ocean at the time of the destruction of the world, when the Creator makes room for (or gives space or scope to) darkness, sinks down (in it), so the brightness of the sun lying in the middle of the ocean once more (भूय एव) sinks in the solar disc.'

St. 59. ध्वान्त°—Construe ध्वान्तजालं सागरे निहितमण्डलं रविं वारिभिः पिहितदण्डं फुल्लमम्बुजं आयतं भृंगचक्रमिव सर्वतः उपयाति. ध्वान्तजालं—Analyse ध्वान्तस्य जालं ध्वान्तजालं, 'A net of darkness.' *Cf.* Páṇi. VII. 2. 18. "क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु," 'The following words are made without इट् augment in the senses given against them:—1 क्षुब्धः 'a churning stick,' 2 स्वान्तः 'the mind,' 3 ध्वान्तः 'darkness,' 4 लग्नः 'attached,' 5 म्लिष्टः 'indistinct or unintelligible,' 6 विरिब्धः 'a note or tune,' 7 फाण्टः 'made without an effort or by an easy process,' and 8 बाढः excessive.' निहितमण्डलं—Analyse निहितं मण्डलं येन स निहितमण्डलः तं तादृशं, 'Who has his disc placed (or put) in.' पिहितदण्डं—Analyse पिहितः दण्डः यस्य तत् पिहितदण्डं, 'Having its stalk concealed (or hidden).' भृङ्गचक्रं—Analyse भृङ्गाणां चक्रं भृङ्गचक्रं, 'A circle of bees.' अम्बुजं—Analyse अम्बुषु जातं अम्बुजं. 'Produced in water' (i. e. a lotus). ध्वान्त°—'The net of darkness everywhere sur-

rounds the sun who has his disc placed in the ocean, as a long circle of bees surrounds a full-blown lotus whose stalk is concealed by the waters.'

St 60. एक°—Construe अविकले निशाकरे उत्पतति [सति] नभःस्यन्दनस्य धातुपङ्कपरिदिग्धमण्डलं एकचक्रमिव अस्तगं रविबिम्बं राजते. एकचक्रं—Analyse एकं च तच्चक्रं च एकचक्रं, 'A single wheel.' नभःस्यन्दनस्य—Analyse नभः एव स्यन्दनः नभःस्यन्दनः तस्य तादृशस्य, 'Of the sky-chariot.' रविबिम्बं—Analyse रवेर्बिम्बं रविबिम्बं, 'The disc of the sun.' अस्तगं Analyse अस्तं गच्छतीति अस्तग, 'Resting on the setting mountain.' अविकले—Analyse न विकलः अविकलः तस्मिन् तादृशे, 'Entire.' 'Perfect.' 'Full.' निशाकरे—Analyse निशां करोतीति निशाकरः तस्मिन् तादृशे, 'The night-maker.' 'The moon.' As opposed to दिवाकर. धातु°—Analyse धातूनां गैरिकादीनां पंकः कर्दमः तेन परिदिग्धं क्लिन्नं मण्डलं यस्य तत् तादृशं, 'Having its ring smeared with the mud of metallic substances.' 'Having its ring covered over with mineral dust.' एक°–'The disc of the sun, resting on the setting mountain, appears, while the full moon is rising up, like a single wheel of the sky-chariot having its ring covered over with mineral dust.'

St. 61. संहृत°—Construe संहृतात्मकिरणं मण्डलं क्रमाद् यथा यथा वृद्धिमुद्वहति तथा तथा रविः गौरवादिव सागराम्भसि शनैर्निमज्जति. संहृत°—Analyse संहृताः आत्मकिरणाः येन तत् संहृतात्मकिरणं, 'Having its rays withdrawn.' सागराम्भसि—Analyse सागरस्य अम्भः सागराम्भः तस्मिन् सागराम्भसि, 'In the oceanic waters.' 'In the water of the ocean.' वृद्धिमुद्वहति—'Attains growth.' गौरवादिव—'As if from heaviness.' संहृत°—'As the disc of the sun which has compressed (all) its rays gradually increases in bulk, it slowly sinks down in the water of the ocean as if on account of its heaviness.' The poet means to say that the orb of the sun when it covers the world with its rays of light becomes light in weight; but when it compresses together all its rays, it becomes heavy and thus sinks down in the water of the ocean.

St. 62. उन्मुखाः—Construe सागरान्तरितमण्डलश्रियः दिनकरस्य उन्मुखाः रश्मयः तोयमभिभूय निर्गताः वाडवस्य शिखिनः शिखाः इव भान्ति. *Cf.* सुभाषितावलिः verse 1759 "पयोनिधेर्वाडववह्निमिश्रं यत्पीतमम्भो बहु घस्मरेण." Also शार्ङ्गधर verses 105, 109, 284. उन्मुखाः—Analyse उद्गतानि मुखानि येषां ते उन्मुखाः, 'With their points upturned (or turned up).' दिनकरस्य—Analyse दिनं करोतीति दिनकरः तस्य तादृशस्य, 'Of the maker of the day' (i. e. of the sun). सागरान्त°—Analyse सागरेण अन्तरिता मण्डलस्य श्रीर्यस्य

सागरान्तरितमण्डलश्रीः तस्य तादृशस्य, 'The beauty of whose disc is concealed by the ocean.' वाडवः, Expl—वडवायां जातः वाडवः or वाडोऽस्यास्तीति वाडवः or वाडं वातीति वाडवः, 'The submarine fire.' शिखिन् *m.*—'A fire.' उन्मुखाः—'The upturned rays of the sun, the beauty of whose disc is concealed by the ocean, appear like the flames of the submarine fire come out after over-powering the water (of the ocean)'.

St. 63. सन्ध्यया—Construe वासरस्य विगमे घनं तमः अग्रतश्च सन्ध्यया परिरुद्धं प्रावृषि एकतः सिन्धुजलभिन्नं पयोनिधेः सलिलमिव भाति. प्रावृषि—'In the rainy-season.' Derived form प्रवृष् *vi.* or *vt.* 1. P. (सेट्) 'To rain.' 'To sprinkle.' 'To pour down.' *Cf.* Páṇi. "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ," 'A long vowel is substituted for the final vowel of the preceding word, before the verbs नह्, वृत्, वृष्, व्यध्, रुच्, सह्, and तन्, when these roots take the affix क्वि.' सिन्धु°—Analyse सिन्धोर्जलेन भिन्नं सिन्धुजलभिन्नं, 'Divided by the water of the rivers.' Explain, स्यन्दन्ते आपोऽत्र सिन्धुः। *Cf.* Uṇádisûtra, "स्यन्देः संप्रसारणं धश्च इति उः." पयोनिधेः—Analyse पयसां निधिः । अथ वा । पयांसि निधीयन्तेऽत्र पयोनिधिः तस्य पयोनिधेः, 'Of the ocean.' *Cf.* Páṇi. III. 3. 93. "कर्मण्यधिकरणे च," 'The affix कि comes after a घु verb, when a word in the accusative case is in composition with it, and when the relation of the word so formed to its verb, is that of location.' सन्ध्यया—'And the thick (mass of) darkness, kept back in the front by the twilight, at the close of the day, appears like the water of the ocean, divided by the waters of the rivers on one side, during the monsoons.'

St. 64. सन्ध्यया—Construe पश्य तमसि क्रमात् सर्पति [सति] सन्ध्यया अरुणितपत्रसञ्चयं श्लक्ष्णपल्लवनिरन्तरं तद् वनं परिणामसम्पदं विन्दतीव. अरुणित°—Analyse अरुणिताः पत्राणां सञ्चयाः यस्मिन् तद् अरुणितपत्रसञ्चयं, 'The multitudes of leaves in which were reddened.' श्लक्ष्ण°—Analyse श्लक्ष्णाश्च ते पल्लवाश्च तैः निर्गतं अन्तरं यस्मिन् तत्, 'Dense with tender shoots (or sprouts).' *Cf.* Uṇádisûtra, "श्लिषेरच्चोपधायाः." परिणामसम्पदं—Analyse परिणामस्य सम्पद् परिणामसम्पद् तां, 'The beauty of ripeness.' सन्ध्यया—'Behold how the forest having the multitudes of its leaves reddened by the twilight and dense with tender shoots, acquires the beauty of ripeness when the darkness gradually spreads through it.'

St. 65. अन्धकार°—Construe सर्वतः सर्पता कृष्णसर्पमलिनेन अन्धकारनिकरेण समन्ततो रुध्यमानविषयाः दिग्भुवः परिखाः संकुचन्ति नु. अन्धकारनिकरेण—Analyse अन्धकारस्य निकरः अन्धकारनिकरः तेन तादृशेन, 'By

the mass of darkness.' 'By the thick darkness.' कृष्णसर्पमलिनेन—Analyse कृष्णश्चासौ सर्पश्च कृष्णसर्पः । कृष्णसर्पवन्मलिनः कृष्णसर्पमलिनः तेन तादृशेन, 'Soiled like a black serpent.' रुध्यमानविषयाः—Analyse रुध्यमानाः विषयाः यासां ताः रुध्यमानविषयाः, 'Having their ranges shut up.' परिखाः, Expl:—परितः खन्यन्ते इति परिखाः, 'The moats.' 'Trenches or fossæ round the fort or town.' दिग्भुवः—Analyse दिशां भूः दिग्भूः तस्याः दिग्भुवः, 'Of the site of direction (or quarter).' अन्धकार°—'The trenches of the directions, with their ranges shut up, on all sides, by the thick darkness, soiled like a black serpent and spreading everywhere, are indeed contracted.'

St. 66. भाति—Construe मत्तशिखिकण्ठकर्बुरं ध्वान्तजालपरिरुद्धमम्बरं भाति यथा अर्कदीपकृततापसंभृतप्रौढकज्जलमलीमसं. मत्त°—Analyse मत्ताः ये शिखिनः तेषां कण्ठाः इव कर्बुरं मत्तशिखिकण्ठकर्बुरं, 'Variegated like the throat of the proud peacocks.' ध्वान्त°—Analyse ध्वान्तस्य जालं तेन परिरुद्धं ध्वान्तजालपरिरुद्धं, 'Filled with a net of darkness.' 'Enveloped (or wrapped up) in a net of darkness.' मलीमस *adj.*—'Dirty. 'Unclean.' *Cf.* Pâṇi. V. 2. 114. "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः," 'The words ज्योत्स्ना, तमिस्रा, शृङ्गिण, ऊर्जस्विन्, ऊर्जस्वल, गोमिन्, मलिन and मलीमस are irregularly formed, in the sene of मतुप् and are names.' अर्क°—Analyse अर्कः एव दीपः तेन कृतो यः तापः तेन संभृतं यत् प्रौढं कज्जलं तेन मलीमसं अर्कदीपकृततापसंभृतप्रौढकज्जलमलीमसं, 'Stained with thick lamp-black gathered by the heat proceeding from the sun-lamp.' भाति—'The sky, variegated like the throat of a proud peacock and filled with a net of darkness, appears as if stained with thick soot gathered by the heat proceeding from the sun-lamp.'

St. 67. पश्य—Construe पूर्वमुद्गतमेतद् असितोरगत्विषः विष्णुवर्त्मनो दूरमग्नरविरश्मिभासुरमेकं छिद्रमिव दीप्तरुचि ज्योतिः पश्य. दीप्तरुचि—Analyse दीप्ता रुचिर्यस्य तद् दीप्तरुचि, 'With radiant splendour.' पूर्वमुद्गतं—'Risen up (in the sky) in front (in the eastern direction).' असितोरगत्विषः—Analyse असितो यः उरगः तस्य त्विडिव त्विड् यस्य तत् तस्य तादृशस्य, 'Of that which has the beauty like that of a black serpent.' विष्णुवर्त्मनः—Analyse विष्णोर्वर्त्म विष्णुवर्त्म तस्य विष्णुवर्त्मनः विष्णुपदस्य, 'Of Vish*n*u's path.' 'Of the sky.' *Cf.* R. XIII. 1. "अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः." *Cf.* Vik. I. 18. "पितुः पदं मध्यममुत्पतन्ती ।" दूर°—Analyse दूरे मग्नो यो रविः तस्य रश्मयः तैः भासुरं दूरमग्नरविरश्मिभासुरं, 'Resplendent with the rays of the sun who has dived (or sunk) deep down into it.' भासुरः, Expl:—भाः अस्ति शीलमस्य स भासुरः,

'Shining.' 'Splendid.' *Cf.* Páṇi. III. 2. 161. "भञ्जभासमिदो घुरच्," 'The affix घुरच् comes is the sense of the agent having such a habit &c., after the verbs भञ्ज् 'to break,' भास् 'to shine,' and मिद् to be fat.' पश्य—'Behold this light (of the moon), with radiant splendour, has sprung up (in the sky) in front (in the eastern direction) as if it were a hole, resplendent with the rays of the sun, who had dived deep down into it, in the path of Vishṇu (i. e. in the sky) which has the beauty like that of a black serpent.'

St. 68. पश्चिमे—Construe पश्चिमे नभसि वेगिनो रविरथस्य लोहचक्रहतमेरुमस्तकाद् उद्गताः हुताशविप्लुषः इव लोहिताः तारकाः भान्ति. रविरथस्य—Analyse रवेः रथः रविरथः तस्य रविरथस्य; 'Of the chariot of the sun.' लोह°—Analyse लोहस्य चक्राणि लोहचक्राणि तैः हतं मेरोः मस्तकं तस्मात् तादृशात्, "From the summits of the mount Meru against which struck the iron wheels.' मेरु *m.*—A mountain at the top or summit of the earth, on which is situated स्वर्ग, the heaven of Indra, containing the cities of the gods and the habitations of celestial spirits. Around this mountain the sun with all the planets is said to revolve. This mountain chain is now clearly established in the regions of north pole. See Prof. B. G. Tilaka's 'The Arctic Home in the Vedas,' chapter IV. हुताशविप्लुषः—Analyse हुतं अश्नातीति हुताशः तस्य विप्लुषः हुताशविप्लुषः, 'The sparks of the offering-eater' (i. e. the sparks of fire). पश्चिमे—'The crimson stars in the western horizon (*lit.* sky) appear like the sparks of fire flying from the summits of the mount Meru which are struck by the iron-wheels of the swift chariot of the sun.'

St. 69. मीलिताः-Construe रविभयेन मीलिताः तारकाः रश्मिधामहतलोहिताः इव दिङ्मुखैकरचनाः [सत्यः] दिनकृत्करात्यये समन्ततः उन्मिषन्ति. मीलिताः, "Crowded together.' 'Or closed their eyes.' रविभयेन—Analyse रवेर्भयं रविभयं तेन रविभयेन, 'Through fear of the sun.' 'By the sun's fear.' तारकाः—'Stars.' *Cf.* Páṇi. VII. 3. 45. and the Vártika thereto, "तारका ज्योतिष्युपसंख्यानम्," 'तारका is formed when it means 'stars,' but तारिका a maid-servent from तारयति.' रश्मि°—Analyse रश्मीनां धाम रश्मिधाम तेन हताः अत एव लोहिताः रश्मिधामहतलोहिताः, 'Red on being struck by the multitude of rays.' उन्मिषन्ति—'To open the eyes.' 'To shine.' 'To twinkle.' From मिष् *vt.* or *vi.* 6. P. (सेट्) with उत्. दिन°-Analyse दिनं करोतीति दिनकृत् तस्य कराणां अत्ययः दिनकृत्करात्ययः तस्मिन् तादृशे, 'At the passing away of the sun's rays.' दिङ्मुखैकरचनाः—Analyse दिशां मुखं दिङ्मुखम् । एका चासौ रचना च एकरचना । दिङ्मुख य

एकरचना यासां ताः तादृश्यः, 'Being intent to decorate the face of the quarters.' मीलिताः—'The stars, which closed (their eyes) through fear of the sun, and which are red on being struck by the multitude of rays, open, as it were, (their eyes) on all sides, being intent to decorate the face of the quarters, at the passing away of the sun's rays.'

St. 70. पूर्व°—Construe असौ हिमरुचिः पूर्ववारिनिधिपृष्ठतः क्रमात् कलान्तरं दर्शयन् एकपक्षसुलभक्रमां वृद्धिं अद्य मुहुरेव विन्दति. पूर्ववारि°—Analyse वारीणां निधिः वारिनिधिः। पूर्वश्चासौ वारिनिधिश्च पूर्ववारिनिधिः तस्य पृष्ठतः पूर्ववारिनिधिपृष्ठतः, 'On the surface of the eastern ocean.' हिमरुचिः—Analyse हिमाः रुचयः यस्य स हिमरुचिः, 'Having cool rays of light' (i. e. the moon). कलान्तरं—Analyse अन्याः कलाः कलान्तरं, 'Different phases.' 'Different digits.' एक°—Analyse एकश्चासौ पक्षश्च एकपक्षः तस्मिन् सुलभः क्रमः यस्याः सा तां तादृशीं, 'Of an easy gradation in one fortnight.' मुहुरेव *ind.*—'All at once.' पूर्व°—'The moon, showing gradually his digits on the surface of the eastern ocean, to-day obtains, all at once, his (full) development, which is of easy gradation in one fortnight' (i. e. the bright half of the month).

St. 71. पश्य—Construe पूर्वतः सपदि भृङ्गपटलासितप्रभं यत्तमो निर्गतं [तद्] हिमांशुना करेण जघने तुद्यमानमिव पश्चिमं याति [इति] पश्य. भृङ्ग°—Analyse भृङ्गपटलमिव असिता प्रभा यस्य तत् तादृशं, 'Of a black lustre like a collection (or cluster) of bees.' हिमांशुना—Analyse हिमाः अंशवो यस्य स हिमांशुः तेन हिमांशुना, 'By the cool-rayed moon.' पश्य—'See that the darkness, of a black lustre like a cluster of bees, which has started suddenly from the east, is proceeding to the west being, as it were, hit on the hip by the moon with his hands' (i. e. rays).

St. 72. क्षीर°—Construe विवर्धिना क्षीरवारिनिधिना प्लाव्यमानवदसौ हारशुभ्रनिजरश्मिसंचयो निशाकरः शनैः शनैः उदयतः [उदयाचलाद्] उत्पतति. क्षीर°—Analyse क्षीरं मधुरं च तद्वारि च तस्य निधिः तेन तादृशेन, 'By the store of sweet (or translucent) water.' विवर्धिना, Expl:—विशेषेण वर्धितुं शीलमस्य स विवर्धी तेन तादृशेन, 'Rising up.' 'Flowing up.' निशाकरः—Analyse निशां करोतीति निशाकरः, 'The night-making moon.' उदयतः = उदयाचलात्, 'From the eastern mountain behind which the sun rises.' निज°—Analyse निजाश्च ते रश्मयश्च निजरश्मयः तेषां सञ्चयः निजरश्मिसञ्चयः। हार इव शुभ्रः निजरश्मिसञ्चयो यस्य स तादृशः, 'Having the collection of his rays white like a necklace.' क्षीर°—'The moon, having the collection of his rays white like a necklace, springs up

gradually from the rising-mountain, being made to float, as it were, by the ocean, the store of sweet (or translucent) water, which is now rising.'

St. 73. क्षिप्यमाण°—Construe सर्वतः प्रसर्पतः शीतरश्मिकिरणस्य अन्तरं दातुमिव क्षिप्यमाणघनतामसोत्करं दिशां मण्डलं दूरमुत्सरति. *Cf.* Ku. VIII. 39. "बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम्। षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥" क्षिप्यमाण°—Analyse क्षिप्यमाणो घनतामसोत्करो यस्मात् तत्, 'That from which the mass (or heap) of thick darkness is being dispelled (or dispersed).' शीत°—Analyse शीतरश्मेः किरणः शीतरश्मिकिरणः तस्य तादृशस्य, 'To the rays of the cool-rayed moon.' क्षिप्यमाण°—'The circle of quarters, having the mass of thick darkness which is being dispelled (or dispersed), as if to afford the space to the rays of the cool-rayed moon, which are spreading everywhere, goes to a very long distance.'

St. 74. क्षीयमाण°—Construe उद्गमे क्षीयमाणवपुः इन्दुः समन्ततो वर्धमानकिरणः [सन्] अर्कतप्तगगनानुबन्धिना तेजसा परितः विलीयते इव. क्षीयमाण°—Analyse क्षीयमाणं वपुर्यस्य स तादृशः, 'Having a lean or spare body.' वर्धमान°—Analyse वर्धमानाः किरणाः यस्य स तादृशः, 'Having his rays increased (or spread over).' अर्क°—Analyse अर्केण तप्तं यद्गगनं तस्य अनुबन्धि तेन तादृशेन, 'Attaching to the sky heated by the sun.' Three of our Mss. read गगण for गगन, but according to some authorities the word गगण appears to be a wrong form. *Cf.* "फल्गुने गगने फेने णत्वमिच्छन्ति बर्बराः." क्षीयमाणवपुः—'The moon having a lean body at his rising, has his rays increased on all sides and disappears, as it were, being surrounded by the lustre, attaching to the sky heated by the sun.'

St. 75. बद्धराग°—Construe बद्धरागमुदितः असौ निशाकरः बलिद्विषो दिशं सन्त्यजन् शोकदीनः इव पाण्डुरोचिषा वपुषा मुहुर्मुहुः कार्श्यमेति. बद्धरागमुदितः—Analyse बद्धो यो रागः तेन मुदितः बद्धरागमुदितः, 'Delighted or glad with red colour (or full of passion).' Or the expression may as well be interpreted as, बद्धरागं उदितः—'When risen was full of passion' (or redness). बद्धरागं *adv.*—Analyse बद्धो रागो यस्मिन् यथा भवति तथा, 'Full of passion (or redness).' बलिद्विषः—Analyse बलिं द्वेष्टीति बलिद्विट् तस्य बलिद्विषः, 'Of the enemy of Bali.' शोकदीनः—Analyse शोकेन दीनः शोकदीनः, 'Afflicted with sorrow.' पाण्डुरोचिषा—Analyse पाण्डु रोचिर्यस्य तत् पाण्डुरोचिः तेन तादृशेन, 'Having a pale lustre.' मुहुर्मुहुः, *ind.*—'Gradually.' निशाकरः—Analyse निशां करोतीति निशाकरः, 'The night-maker.' 'The moon.' बद्धरागमुदितः—'The moon delighted with red colour (or filled with passion),

abandoning the quarter of Indra (or Vishṇu), the enemy of Bali, gradually (मुहुर्मुहुः) gets emaciated in his body, having a pale lustre, being, as it were, afflicted with sorrow.'

St. 76. पीतं—Construe अस्य हिमत्विषः स्वच्छविग्रहतया शशाकृतिच्छद्मना पीतं एतद् सकलमेव अलिवृन्दमेचकं ध्वान्तं बहिरिव लक्ष्यते. अलिवृन्दमेचकं—Analyse अलीनां वृन्दं अलिवृन्दं तद्वद् मेचकं कृष्णं अलिवृन्दमेचकं, 'Black like a collection of bees.' हिमत्विषः—Analyse हिमा त्विद् यस्य स हिमत्विद्, तस्य हिमत्विषः, 'Of one possessing (or having) cool rays.' स्वच्छ°—Analyse स्वच्छो यो विग्रहो तस्य भावः स्वच्छविग्रहता तया तादृश्या, 'By reason of his possessing a transparent body.' शशाकृतिच्छद्मना—Analyse शशस्य आकृतिः शशाकृतिः सैव छद्म शशाकृतिच्छद्म तेन तादृशेन, 'Under the guise of the hare's form.' पीतं—'The whole darkness, black like a collection of bees, which is drunk up by the moon, appears, as it were, on his outside under the guise of a hare's form, on account of his possession of a transparent body.'

St. 77. विप्रयुक्त°—Construe ननमेष चन्द्रमाः विप्रयुक्तवनितामुखाम्बुजप्रोद्धृतद्युतिचयेन असितपक्षकर्शितं आत्ममण्डलं पुनः पूरयति. विप्रयुक्त°—Analyse विप्रयुक्ताः याः वनिताः तासां मुखाम्बुजेभ्यः प्रोद्धृता या द्युतिः तस्याः चयस्तेन तादृशेन, 'With the collection of (or focused) brightness lifted up from the lotus-like faces of women under separation.' असित°—Analyse असितः कृष्णो यः पक्षस्तेन कर्शितं, 'Waning during the dark fortnight.' आत्ममण्डलं—Analyse आत्मनो मण्डलं आत्ममण्डलं, 'His own disc.' विप्र°—'Surely yonder moon fills up again his own disc, waning during the dark fortnight, with the focused brightness lifted up from the lotus-like faces of women under separation.'

St. 78. अन्धकार°-Construe करैरिममन्धकारनिकरं भिन्दतः शशधरस्य मण्डले क्षोभवेगपतितः शशाकृतिस्तामसो धूलिपुञ्जः इव भाति. अन्धकारनिकर—Analyse अन्धकारस्य निकरः अन्धकारनिकरः तं तादृशं, 'The mass of darkness.' 'The thick darkness.' शशधरस्य—Analyse धरतीति धरः । शशस्य धरः शशधरः तस्य तादृशस्य, 'Of one bearing the mark of hare.' 'Of the moon.' धूलिपुञ्जः—Analyse धूलेः पुञ्जः धूलिपुञ्जः, 'The heap of dust.' 'The dust-heap.' तामसः, Expl:—तमसः अयं तामसः, 'Composed of darkness.' क्षोभवेगपतितः—Analyse क्षोभस्य वेगः क्षोभवेगः तेन पतितः क्षोभवेगपतितः, 'Fallen through the force of agitation.' शशाकृतिः—Analyse शशस्य आकृतिरिव आकृतिर्यस्य स शशाकृतिः, 'Having the form like that of a hare.' अन्धकार°—'On the disc of the moon, breaking up the thick darkness with his rays, there appears, as it were, the dust-heap composed of darkness, having the form of a hare and fallen through the force of agitation.'

St. 79. गुल्म°—Construe उदयशेखरः शार्वरीकरः गुल्मलीनं अलिकर्बुरं तमः कर्तुकाम इव विटपजालरन्ध्रकैः सर्वतः करान् प्रेरयति. गुल्मलीनं—Analyse गुल्मेषु लीनं गुल्मलीनं, 'Lying in the thickets.' अलिकर्बुरं—Analyse अलयः इव कर्बुरं अलिकर्बुरं, 'Black like bees.' 'Spotted like bees.' शार्वरीकरः—Analyse शार्वरीं करोतीति शार्वरीकरः, 'The night maker.' 'The moon.' विटप°—Analyse विटपानां जालानि विटपजालानि तेषां रन्ध्रकाणि तैः तादृशैः, 'Through the holes in the nets of branches.' उदयशेखरः—Analyse उदयस्य शेखरः उदयशेखरः, 'The crest of the rising mountain.' गुल्मलीनं—'The night-making moon, the crest of the rising mountain, desirous, as it were, to cut off (or dispel) the darknesss, black like bees lying in the thickets, directs his rays on all sides through the holes in the nets of branches.'

St. 80. चन्द्र°—Construe तामसः सञ्चयः चन्द्ररश्मिनिहतोऽपि सुप्तकोकिलकुलेन उल्लसत्कुमुदगन्धसम्भृतैः षट्पदैः [च] सावशेषः इव भाति. *Cf.* Ku. VIII. 39. " बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् । षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥" चन्द्ररश्मि°—Analyse चन्द्रस्य रश्मयः चन्द्ररश्मयः तैः निहतः चन्द्ररश्मिनिहतः, 'Dispersed (or dissipated) by the rays of the moon.' सुप्त°—Analyse कोकिलानां कुलं कोकिलकुलम् । सुप्तं च तत् कोकिलकुलं च सुप्तकोकिलकुलं तेन तादृशेन, 'By the collection (or crowd) of sleeping cuckoos.' उल्लसत्°—Analyse कुमुदानां गन्धः कुमुदगन्धः । उल्लसन् यः कुमुदगन्धस्तेन सम्भृताः तैः तादृशैः, 'Crowded together (or collected) by the fragrance of the opening night-lotuses.' सावशेषः—Analyse अवशेषेण सह सावशेषः, 'Having a residue.' षट्पदैः, Expl:—षट् पदान्येषां ते षट्पदाः तैः तादृशैः, 'By bees.' चन्द्र°—'The mass (or heap) of darkness, though dispersed by the rays of the moon, appears to have a residue left by the collection of sleeping cuckoos and the bees, crowded together by the fragrance of the opening night-lotuses.'

St. 81. पत्र°—Construe इन्दुना भूरुहः तले पत्रजालशतरन्ध्रविच्युतः रश्मिसञ्चयः सामिसिक्तः इव भाति । स्थण्डिले [च] निरवशेषं मुक्तः इव भाति. पत्र°—Analyse जालानां शतं जालशतम् । पत्राणां जालशतानां रन्ध्रेभ्यो विच्युतः पत्रजालशतरन्ध्रविच्युतः, 'Dropped (or fallen) down through hundreds of holes in the net of leaves.' सामिसिक्तः—Analyse सामि सिक्तः सामिसिक्तः 'Half sprinkled over.' 'Illuminated in parts.' भूरुहः—Analyse भुवि रोहतीति भूरुट् तस्य तादृशस्य, 'Of the earth-growing tree.' 'Of a tree.' निरवशेषं *adv.*—Analyse अवशेषस्याभावः अथ वा । निर्गतः अवशेषो यस्मात् तत् यथा स्यात्तथा. 'Completely.' 'Totally.' 'Fully.' रश्मिसञ्चयः—Analyse रश्मीनां सञ्चयः रश्मिसञ्चयः, 'A collection of rays.' पत्र°-'The collection of rays, dropped down by the moon through hundreds of holes in the net of leaves, appears, as it were, partly illuminated (*lit.* half

sprinkled over) at the bases of trees; and on altars (or sacred raised seats) it appears as if completely poured down.'

St. 82. उल्लसत्सु—Construe उल्लसत्सु कुमुदेषु षट्पदाः हिमांशुना भिद्यमानतमसो नभस्तलाद् विच्युतास्तमिस्रबिन्दवः इव परितः सम्पतन्ति. हिमांशुना—Analyse हिमाः अंशवो यस्य स हिमांशुः तेन हिमांशुना, 'By the cool-rayed moon.' भिद्यमानतमसः—Analyse भिद्यमानं तमः यस्य तत् तस्मात् तादृशात्, 'The darkness in which is dispelled.' नभस्तलात्—Analyse नभसः तलं नभस्तलं तस्मात् तादृशात्, 'From the surface of the sky.' तमिस्रबिन्दवः—Analyse तमिस्राणां बिन्दवः तमिस्रबिन्दवः, 'The drops of darkness.' षट्पदाः—Analyse षट् पदान्येषां ते षट्पदाः, 'Having six feet.' 'Bees.' उल्लसत्सु—'While the lotuses are opening, the bees spring up on all sides like drops of darkness fallen down from the surface of the sky, the darkness in which is dissipated by the moon.'

St. 83. तारकाः—Construe रजतभङ्गभासुराः तारकाः उदयाद् उदेष्यतो ग्रहपतेः वर्त्मनि दिग्वधूभिः समन्ततः तानिताः [सत्यः] लाजका इव विभान्ति. रजत°—Analyse रजतस्य भङ्गः रजतभङ्गः तद्वद् भासुराः रजतभङ्गभासुराः, 'Resplendent like a section of silver.' दिग्वधूभिः—Analyse दिशः एव वध्वः दिग्वध्वः ताभिः दिग्वधूभिः, 'By the regions of the sky considered as virgins.' 'By the quarter-maidens.' 'By the quarter-virgins.' *Cf.* दिक्कन्या, दिक्कान्ता, and दिक्कामिनी. लाजा—लाजका *f. Plu.* (लाज *m. Plu*), 'Fried grain.' 'Parched grain.' लाह्या in Maráthi. The word is derived from लज् *vt.* 1. P. (सेट्) 'To fry,' 'to roast.' ग्रहपतेः—Analyse ग्रहाणां पतिः ग्रहपतिः तस्य ग्रहपतेः, 'Of the lord of planets,' (i. e. of the moon). तारकाः—'The stars, resplendent like a section of silver, appear like Lájas strewed on all sides by the quarter-virgins on the path of the lord of planets (i. e. the moon) who is about to come up from the rising mountain.'

St. 84. मित्र°—Construe चिरं मित्रनाशपरिरोदिताः सुप्तपद्मविनिमीलितेक्षणाः वृद्धशान्तकलहंसकूजिताः दीर्घिकाः मूर्छिताः इव विभान्ति. मित्र°—Analyse मित्रस्य नाशात् परिरोदिताः मित्रनाशपरिरोदिताः, 'Reduced to tears on account of the loss of their friend.' 'Lamenting for the loss of their friend.' सुप्त°—Analyse सुप्तानि च यानि पद्मानि च सुप्तपद्मानि तान्येव विनिमीलितानि ईक्षणानि यासां ताः सुप्तपद्मविनिमीलितेक्षणाः, 'Having their eyes closed on account of the lotuses that are shut.' वृद्ध°—Analyse आदौ वृद्धानि पश्चात् शान्तानि कलहंसानां कूजितानि यासु ताः, 'With the warblings of the swans silenced after they had grown very loud.' मित्र°—'The artificial ponds, after lamenting long for the loss of their friend (i. e. the sun) seem to have fainted, having closed their eyes on account

of the lotuses that are shut and with the warblings of the swans silenced after they had grown very loud.'

St. 85. सैकते—Construe शशिमरीचिलेपने सैकते रोयसि इन्दुकरपुञ्जसन्निभं राजहंसं असमीक्ष्य कातरा हंसवनिता सगद्गदं रौति. सैकते. Expl:—सिकताः सन्त्यस्मिन्प्रदेशे सैकतं तस्मिन् सैकते, 'A place abounding in sand.' *Cf.* Pāṇi. V. 2. 104. "सिकताशर्कराभ्यां च," 'The affix अण् comes, in the sense of मतुप्, after सिकता and शर्करा.' शशि°—Analyse शशिनो मरीचयः शशिमरीचयः तेषां लेपनं यस्य तत् तस्मिन् तादृशे, 'Having a coating of moon-beams.' इन्दु°—Analyse इन्दोः कराः इन्दुकराः तेषां पुञ्जेन सन्निभः इन्दुकरपुञ्जसन्निभः तं तादृशं, 'Resembling a heap of moon-beams.' कातरा, Expl:—ईषत्तरतीति कातरा, 'Frightened.' 'Afraid.' *Cf.* Pāṇi. III. 1. 134. and also VI. 3. 105. "ईषदर्थे," 'का is the substitution for कु, when the meaning is 'a small.' As कामधुरं, कालवणं, काम्लं. Though the second member may begin with a vowel, yet this substitution takes place, in spite of VI. 3. 101. as कोष्णं, कातरा. हंसवनिता—Analyse हन्ति गच्छतीति हंसः तस्य हंसस्य वनिता हंसवनिता, 'A she-swan.' *Cf.* Uṇādisûtra, "वृतृवदिहनिकमिकषिभ्यः सः." "भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्। गढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्।" The feminine of हंस is हंसी or वरटा. 'The feminine from some nouns is formed by affixing to them (in compounds) such words as स्त्री, वनिता, योषित्, धेनु वामी &c. expressive of a female as, अरिस्त्रियः, 'female enemies,' बन्धुयोषितः- 'female relations,' खड्गिधेनुः, 'she-rhinoceros,' गोधेनुः, 'a cow,' उष्ट्रवामी, or उष्ट्री, 'a she-camel' &c. सगद्गदं *adv.*—Analyse गद्गदेन सह सगद्गदं, 'With accents choked with sobs.' सैकते—'The female swan, frightened when she does not see her lord, resembling a heap of moon-beams, on the sandy bank, enveloped in the moon-beams, cries in accents choked with sobs.'

St. 86. तिग्म°—Construe सरोजिनी तिग्मरश्मिविरहे क्षपागमे इन्दुकिरणाव, गुण्ठितं लोकं नाभिवीक्षितुमिव असितवारिजेक्षणं मीलयति. तिग्म°—Analyse तिग्माः रश्मयो यस्य स तिग्मरश्मिः रविः तेन विरहः तस्मिन् तादृशे, 'After the separation from the hot-rayed sun.' सरोजिनी, Expl:—सरोजानि सन्त्यस्यां सा सरोजिनी, 'A pond abounding in lotuses.' इन्दु°—Analyse इन्दोः किरणाः इन्दुकिरणाः तैः अवगुण्ठितः तं तादृशं, 'Veiled by the moon-beams.' क्षपागमे—Analyse क्षपायाः आगमः क्षपागमः तस्मिन् तादृशे, 'At the advent of the night.' असित°—Analyse असितं च वारिजं च असितवारिजं तदेव ईक्षणं असितवारिजेक्षणं, 'The eyes in the form of the blue lotuses.' तिग्म°—'The lotus-pond (or the lotue plant), after the separation from the hot-rayed sun, closes her eyes in the form of the blue lotuses, at the advent of the night, as if not to see the world veiled by the moon-beams.'

St. 87. जृम्भ°—Construe जृम्भमाणचलपत्रसंहतेः कुमुदखण्डसम्पदः अन्तरं संविधातुमिव अनतिदूरवर्तिनी पद्मसन्ततिः संकुचति. जृम्भ°—Analyse जृम्भमाणा अत एव चला पत्राणां संहतिर्यस्याः सा तस्याः तादृश्याः, 'The collection of leaves in which is expanding and tremulous.' कुमुद°—Analyse कुमुदानां खण्डानि कुमुदखण्डानि तेषां सम्पद् तस्याः तादृश्याः, 'Of the beauty of the bed of night-lotuses.' पद्मसन्ततिः—Analyse पद्मानां सन्ततिः पद्मसन्ततिः, 'A line of day lotuses.' अनतिदूरवर्तिनी—Analyse न अतिदूरवर्तिनी अनतिदूरवर्तिनी, 'Lying not very far.' 'Lying not at a long distance.' जृम्भ°—'The line of day-lotuses, lying (or existing) not very far, contracts to afford space, as it were, to the beauty of the bed of night-lotuses in which the collection of leaves is expanding and tremulous.'

St. 88. भाति—Construe हिमद्युतिः असितोत्पलप्रभं मृगमयं लक्ष्णं बिभ्रत् श्यामलावदनबिम्बकान्तिभिः बद्धमध्यः रूप्यदर्पणः इव भाति. असित°—Analyse असितं च तद् उत्पलं च असितोत्पलं तस्य प्रभा इव प्रभा यस्य तत् तादृशं, 'Having a lustre like that of a blue lotus.' मृगमयं, Expl:—मृगरूपं मृगमयं, 'Having the form of a deer.' हिमद्युतिः—Analyse हिमा द्युतिर्यस्य स हिमद्युतिः, 'Having a cool lustre (i. e. the moon).' श्यामला°—Analyse श्यामलानां वदनानि श्यामलावदनानि तेषां बिम्बानां कान्तयः ताभिः तादृशीभिः, 'By the beauty of the reflections of the faces of dark ladies.' बद्धमध्यः—Analyse बद्धं मध्यं यस्य स बद्धमध्यः 'With its middle (or central surface) occupied (*lit.* bound up).' रूप्यदर्पणः—Analyse रूप्यश्चासौ दर्पणश्च रूप्यदर्पणः, 'A beautiful mirror.' Or 'a silver-framed mirror.' भाति—'The moon, who bears the mark in the form of a deer, having the lustre of a blue lily, appears like a beautiful mirror, with its central surface occupied by the beauty of the reflections of the faces of dark ladies.'

St. 89. यौवन°—Construe यौवनोपहितपाण्डुकान्तिना त्वन्मुखेन विजितः [अत एव] घनमेघसन्ततौ रुद्धरश्मिनिवहो निशाकरः लज्जया इव निलीयते. यौवन°—Analyse यूनो भावः यौवनं तेन उपहिता पाण्डुः कान्तिर्यस्य तत् तेन तादृशेन, 'Possessing pale lustre brought only by youth.' 'Having the white splendour brought on by youth.' त्वन्मुखेन—Analyse तव मुखं त्वन्मुखं तेन, 'By thy face.' निशाकरः—Analyse निशां करोतीति निशाकरः, 'The night-making moon.' घनमेघ°—Analyse घनाश्च ते मेघाश्च घनमेघाः तेषां सन्ततिः तस्यां, 'In the line of dense (or thick) clouds.' रुद्धरश्मिनिवहः—Analyse रुद्धो रश्मीनां निवहो यस्य स रुद्धरश्मिनिवहः 'With the collection of his beams obstructed.' यौवन°—'The moon, subdued, O Sítá, by thy face displaying white (or pale) splendour brought

on by youth, lies concealed, as it were, through shame with the collection of his beams obstructed in the line of dense clouds. '

St. 90. अङ्कितः—Construe शशमयेन लक्ष्मणा अङ्कितः निशाकरः मध्यलग्नं कृष्णमेघशकलमिव उद्वहन् असितवारिदोदरान्मन्दं निष्पतति. शशमयेन, Expl:— शशरूपं शशमयं तेन शशमयेन, 'Consisting of a hare.' कृष्ण°—Analyse कृष्णश्चासौ मेघश्च कृष्णमेघः तस्य शकलः तं, 'A piece of the dark cloud.' मध्यलग्नं—Analyse मध्ये लग्नः मध्यलग्नः तं तादृशं, 'Fixed (or attracted) to the central part.' निशाकरः—Analyse निशां करोतीति निशाकरः, 'The night-making moon.' असित° Analyse असितः कृष्णः यो वारिदो मेघः तस्य उदरं तस्मात्, 'From the interior of a black cloud.' अङ्कितः—'The moon, marked with the sign consisting of a hare, comes slowly out of the interior of a black cloud, bearing, as it were, a piece of the dark cloud, which has become attached to its central part.'

St. 91. उद्धृत°—Construe हे प्रिये एष कृष्णमृगलक्षणः शशी इमां तव कुन्दगौरदशनावलीं रचयितुं वेधसा मध्यतः उद्धृतद्युतिरिव भाति. उद्धृतद्युतिः—Analyse उद्धृता द्युतिर्यस्य स उद्धृतद्युतिः, 'One whose splendour is taken off.' कृष्ण°—Analyse कृष्णश्चासौ मृगश्च कृष्णमृगः तस्य लक्षणमिव स एव लक्षणं यस्य स कृष्णमृगलक्षणः, 'Bearing the mark of a dark (or sable) deer.' कुंद°—Analyse दशनानां आवली दशनावली । कुन्दवद् गौरा दशनावली कुन्दगौरदशनावली तां तादृशीं, 'The line of teeth white like the Jasmine flowers.' उद्धृत°—'This moon, having the mark of a dark deer, appears to have its splendour taken off from its middle by the Creator to form, my dear, this line of your teeth white like the Jasmine flowers.'

St. 92. त्वन्मुख°—Construe अयं शीतकरकान्ततोरणः त्वन्मुखावजितमण्डलश्रियः अमृतद्युतेः तत्कलंकं वीक्ष्य शोकबाष्पं वारि मुञ्चतीव. त्वन्मुख°–Analyse तव मुखं त्वन्मुखं तेन अवजिता मण्डलस्य श्रीर्यस्य स तस्य तादृशस्य, 'The beauty of whose disc is put down by thy face.' तत्कलंकं—Analyse तस्य कलंकः तत्कलंकः तं तादृशं, 'His spot.' अमृतद्युतेः—Analyse अमृता द्युतिर्यस्य स अमृतद्युतिः तस्य तादृशस्य, 'Of the moon having nectar-like splendour.' 'Of the moon possessing ambrosial light.' शीत°—Analyse शीतकरकान्तस्य चन्द्रकान्तस्य तोरणः शीतकरकान्ततोरणः, 'The arch formed of (or made of) moon-stones.' शोकबाष्पं—Analyse शोकस्य बाष्पं शोकबाष्पं, 'Tears of grief.' त्वन्मुख°—'Yonder, O Sítá, the arch formed of moon-stones seems, as it were, to drop down water of tears of grief, on seeing the spot of the moon, having nectar-like splendour, the beauty of whose disc is put down by thy face.'

St. 93. इति—Construe इति सपदि वदन् मदमन्थरः [अत एव] अलसतरगतिः नरेन्द्रकन्यामनुगमयन् वदान्यवर्यः इन्दुपादधौतं शयनशिलातलं प्रपेदे.

वदान्यवर्यः—Analyse वदान्येषु वर्यः वदान्यवर्यः, 'The best of the donors.' *Cf.* Unadisûtra "वदेरान्यः." शयनशिलातलं—Analyse शयनस्य शिलातलं शयनशिलातलं, 'A couch of stone-slab.' 'A stone-slab intended for a bed (or couch).' इन्दुपादधौतं—Analyse इन्दुपादवद् धौतं स्वच्छं इन्दुपादधौतं, 'Swept clean by moon-beams.' अलसतरगतिः—Analyse अलसतरा गतिर्यस्य स अलसतरगतिः, 'Having a very lazy gait.' नरेन्द्रकन्यां—Analyse नराणां इन्द्रः नरेन्द्रः तस्य कन्या तां तादृशीं, 'To the daughter of the best of kings.' मदमन्थरः—Analyse मदेन मन्थरः मदमन्थरः, 'Moving slowly with passion.' इति—'Having said so swiftly the best of donors, desiring to imitate the daughter of the best of kings (and so) having a very lazy gait, and moving slowly with passion, reached the couch of stone-slab (intended for sleep) which was swept clean by moon-beams.'

St. 94. अथ—Construe अथ स दयितासखः मदनहुताशनदग्धमानहव्ये सुरतमखे सुखं समाप्ते [सति] चषकमधुनि सन्निविष्टबिम्बं सुखं सोममनयत्. सुरतमखे—Analyse सुरतमेव मखः सुरतमखः तस्मिन् तादृशे, 'In the sacrifice of enjoyment.' मदन°—Analyse मदन एव हुताशनः तेन दग्धं मानरूपं हव्यं यस्मिन् तत् तस्मिन् तादृशे, 'The offering of pride (or joy) in which was burnt in the fire of the god of love.' चषकमधुनि—Analyse चषके मधु चषकमधु तस्मिन् तादृशे, 'In the wine in the glass.' सन्निविष्ट°—Analyse सम्यग् निविष्टं सन्निविष्टम्। सन्निविष्टं बिम्बं यस्य तत् सन्निविष्टबिम्बं, 'Whose reflection had fallen in.' 'Having a reflection fallen in.' दयितासखः—Analyse दयितायाः सखा दयितासखः, 'A loving friend of his beloved.' सोम *m.*—'A most exhilarating and spirit-enlivening plant and its juice.' In the present verse it means, 'wine.' This sacred plant and its roots are highly esteemed in almost all sacrifices. In most ancient times when the Vedic Âryas were living in the regions of Meru (or polar regions) this sacred plant is said to have grown on the mountains of polar regions, in Siberia, Central Asia, Persia and the northern provinces of Kashmîra. This celebrated plant is sometimes called 'the moon-plant' and perhaps a kind of sweet-milk-weed, was formerly a most important ingredient in sacrificial offerings, and is perpetually alluded to in Vedic literature as well as in the Persian Avesta. It is said that the Soma juice was extracted and fermented, forming a beverage offered in libations to the deities, and drunk by the *Rishis* and Brâhmaṇas. Its exhilarating qualities were grateful to the priests, and the gods were represented as being equally fond of it. This Soma Rājā occupies a large space in

the *R*ig-Veda; one Man*d*ala is almost wholly devoted to its praise and uses. It was raised to the position of a deity, and represented to be primeval, all-powerful, healing all diseases, bestower of riches, lord of the gods, and even identified with the Supreme Being. " The simple-minded Aryan people, whose whole religion was a worship of the wonderful powers and phenomena of nature, had no sooner perceived that this liquid had power to elevate the spirits and produce a temporary frenzy, under the influence of which the individual was prompted to, and capable of, deeds beyond his natural powers, than they found in it something divine : it was to their apprehension a god, endowing those into whom it entered with god-like powers; the plant which afforded it became to them the king of plants, the process of preparing it was a holy sacrifice; the instruments used therefor were sacred." अथ—' When the sacrifice of enjoyment in which the offering of pride was burnt in the fire of the god of love was happily over, he, the loving friend of his beloved, brought Soma to his (or her) mouth whose reflection had fallen in the wine-glass' (i. e. in the contents of the wine glass).

St. 95. दुहितुः—Construe अवनिभर्तुः दुहितुः प्रियमुखपरिभुक्तधामवांछा उन्मयूखं परिमण्डलं मणिचषकं विहाय हेमशुक्तिं करकमलं नयति स्म. अवनिभर्तुः—Analyse अवनेर्भर्ता अवनिभर्ता तस्य तादृशस्य, ' Of the lord of the earth. ' उन्मयूखं—Analyse उद्गताः मयूखाः यस्य तद् उन्मयूखं, ' The rays in which were spreading above. ' ' Shooting rays. ' मणिचषकं—Analyse मणिमयं चषकं मणिचषकं ' A glass or goblet of jewels. ' परिमण्डलं—Analyse परिगतं मण्डलं यस्य तत् तादृशं, ' Having a round orb (or circle).' प्रिय°—Analyse प्रियस्य मुखेन परिभुक्तं यद् धाम तस्य वांछा, ' A desire for a vessel (or receptacle) to be enjoyed by her dear husband's mouth. ' Or the expression प्रियमुखपरिभुक्तधाम may be taken separately meaning ' the contents of which were enjoyed (drunk) by the mouth of her dear lord,' and qualifying मणिचषकं. करकमलं—Analyse करः कमलमिव करकमलः तं तादृशं, ' To the lotus-like hand. ' ' To her lotus-hand.' हेमशुक्तिं—Analyse हेममया शुक्तिः हेमशुक्तिः तां तादृशीं, ' A shell-vessel made of gold.' ' A golden shell. ' दुहितुः—' The desire of the daughter of the lord of the earth for a vessel to be enjoyed by (or in company with) her dear husband's mouth brought a golden shell to her lotus-like hand, putting aside the jewelled goblet, having a round circle and shooting forth its rays. ' The poet means to say that the prince Râma held to her mouth the

glass of the beverage in order that she may drink its contents; but she heartily wished to drink the beverage simultaneously with her dear lord; and hence she changed the glass for a golden-shell so that both the ends of the golden shell might serve for a simultaneous drink.

St. 96. नियतं—Construe दन्तधाराः इह नियतं पतन्ति इतीव भीत्या रागः मदनमदोद्धतयोः मधु पिबतोर्यूनोः अधरकिसलये विहाय नयनानि उपास्त. दन्तधाराः— Analyse दन्तानां धाराः दन्तधाराः, 'The sharp edges of teeth.' मदन°— Analyse मदनेन मदोद्धतौ मदनमदोद्धतौ, 'Of them excited by the passion of the god of love.' अधरकिसलये,—Analyse अधरौ एव किसलये अधरकिसलये, 'The sprout-like nether lips (two).' नियतं—'The red hue (or colour) fearing that the sharp edges of teeth of the youthful pair, excited by the passion of the god of love, would inevitably fall on the sprout-like lips, left them and got to their eyes while they were drinking wine.'

St. 97. मुहुः—Construe विरूढतृष्णो मधुपः सुगन्धि हृद्यं मुहुरपि पिबन् न विरमति स्म । यतो यद् असंशयं युवतिमुखं तदेतद् परमार्थतः सरसिरुहं. मधुपः— Analyse मधु पिबतीति मधुपः, 'A honey-licking bee' (here it also refers to Ràma). विरूढतृष्णः—Analyse विरूढा तृष्णा यस्य स विरूढतृष्णः, 'With his thirst increased.' सुगन्धि—Analyse शोभनो गन्धो यस्य तत् सुगन्धि, 'Having a sweet smell.' हृद्यं, Expl:–हृदयस्य प्रियं हृद्यं, 'Cherished in the heart.' *Cf.* Pàṇi. IV. 4. 95. "हृदयस्य प्रियः," 'The affix यत् comes in the sense of 'loved' after the word 'हृदय' in the genitive case in construction.' Also *Cf.* Páṇi. VI. 3. 50. "हृदयस्य हृल्लेखयदण्लासेषु," 'हृद् is substituted for हृदय, before लेख, and the affixes यत् and अण् and before लास.' युवतिमुखं—Analyse युवतेः मुखं युवतिमुखं, 'The face of the young lady.' असंशयं—Analyse संशयस्याभावः असंशयम्, 'Without doubt.' 'Certainly.' 'Verily.' सरसिरुहं—Analyse सरसि रोहतीति सरसिरुहं, 'A pond-growing lotus.' परमार्थतः *ind.*—'In reality.' 'In the true sense of the word.' The adjectives सुगन्धि and हृद्यं are common to युवतिमुखं and सरसिरुहं. विरूढतृष्णो मधुपः सुगन्धि हृद्यं मुहुरपि पिबन् न विरमति स्म—'The drinker of honey (a bee or Ràma), with his thirst increased did not cease while drinking frequently that fragrant favourite beverage (or inciting drink).' यतो यद् असंशयं युवतिमुखं तदेतद् परमार्थतः सरसिरुहं—'Since what was undoubtedly the face of the youthful lady was in reality the lotus.'

St. 98. अचकमत—Construe अधरमितवतः व्रणस्य मधुस्रवेण दाहात् स्फुटरचितभ्रुकुटिः असौ क्षितिपसुतः प्रणयात् प्रियामुखेन वितीर्णं मधु अचकमत. प्रिया-

मुखेन—Analyse प्रियायाः मुखं प्रियामुखं तेन, 'By the mouth of his beloved.' क्षितिपसुतः—Analyse क्षितिं पातीति क्षितिपः तस्य सुतः क्षितिपसुतः, 'The son of the protector of the earth.' इतवतः—'Reaching to.' 'Going to.' *Act. parti.* from इ *vt.* or *vi.* 2. P. (अनिट्) 'To go.' To be construed with व्रणस्य. स्फुट°—Analyse स्फुटं व्यक्तं रचिता भ्रुकुटिर्येन स स्फुटरचितभ्रुकुटिः, 'Clearly displaying the contraction of eyebrows.' मधुस्रवेण—Analyse मधुनः स्रवः मधुस्रवः तेन तादृशेन, 'By streaming down the flow of wine.' अचकमत—'The son of the protector of the earth, clearly displaying the contraction of eyebrows on account of the burning of the wound on (*lit.* reaching to) his lips consequent on the dropping of the wine, desired wine (directly) poured in from the mouth of his beloved through extreme love.'

St. 99. इति—Construe रतिकलहकचग्रहेण प्रविधुतकौसुमभक्तिसूत्रशेषं विलुलितकेशसमर्पितं माल्यं दधानौ तौ इति निशां सपदि अतीयतुः. प्रविधुत°—Analyse कुसुमानां इयं कौसुमी सा चासौ भक्तिः शोभा च कौसुमभक्तिः । प्रविधुता चासौ कौसुमभक्तिश्च प्रविधुतकौसुमभक्तिः अत एव सूत्रं शेषं यस्य तत् तादृशं, 'Having only the string remaining after the falling off of the flowery decoration.' कौसुमम्°—Flowery.' *Cf.* Páṇi. IV. 3. 120. "तस्येदम्," 'After a word in the sixth case in construction, an affix (IV. 1. 13. &c) comes in the sense of 'this is his.' रति°—Analyse रतौ कलहः रतिकलहः । कचानां ग्रहः कचग्रहः । रतिकलहे कचग्रहः रतिकलहकचग्रहः तेन तादृशेन, 'By the seizure of hair during love-quarrels.' विलुलित°—Analyse विलुलिताः ये केशाः तेषु समर्पितं विलुलितकेशसमर्पितं, '*Placed on the dishevelled hair.*' माल्यं, Expl:—मालैव माल्यं, 'A garland.' Or the word may be explained by Pàṇi. III. 1. 124. "ऋहलोर्ण्यत्," 'The affix ण्यत् comes after a root that ends in ऋ (long or short) or in a consonant.' as, मल् + ण्यत् (य) = माल्यम्. Derived from मल् *vt.* 1. A. (सेट्) 'To hold,' 'to possess.' इति—'Thus they, wearing chaplets placed on hair dishevelled by their seizure during love-quarrels, with only the string remaining after the falling off of the flowery decoration, immediately spent the night.'

St. 100. अथ—Construe अथ हृदयङ्गमध्वनितवंशकृतानुगमैः अनुगतवल्लकीमृदुतरक्वणितैः भिन्नषड्जविपर्यीकृतमन्द्रवैः विविधमङ्गलगीतिपदैः उषसि शयितं तं अबोधयन्. *Cf.* R. V. 65. "सुतात्मजाः सवयसः प्रथितप्रबोधं प्राबोधयन्नुषसि वाग्भिरुदारवाचः." हृदयङ्गम°—Analyse हृदयङ्गमं ध्वनितो यो वंशः तस्य कृताः अनुगमाः येषां तैः तादृशैः, 'Following the sounds sprung from the flutes which were sounded pleasantly.' हृदयङ्गम *adj.*—Explain, हृदयं गच्छतीति हृदयंगमम्, "Going to the heart.' 'Heart-stirring.' *Cf.*

Pāṇi. III. 2. 47. " गमश्च," 'The affix खच् comes after the root गम् 'to go,' when in composition with a word ending in a case-affix when the word to be formed denotes a name.' षड्ज—' One of the primary notes.' It is thus derived:—" नासां कण्ठमुरस्तालु जिह्वादन्तांश्च संस्पृशन् । षड्भ्यः सञ्जायते यस्मात् तस्मात् षड्ज इति स्मृतः." षड्ज is the first of the seven primary notes of the Indian gamut. षड्ज is of two sorts, one form comes under शुद्ध (distinct), the other under विकृत (indistinct). The षड्ज is called शुद्ध, when it has four S'rutis (tones or vibrations, तंत्रीजातो नादः श्रुतिरुच्यते). These are:—" तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः" namely तीव्रा, कुमुद्वती, मन्दा and छंदोवती. When षड्ज exclusively consists of these four S'rutis, it comes to be called शुद्ध; otherwise विकृत. It is also further subdivided into two parts, the one is called च्युत (broken), the other is अच्युत (unbroken). *Cf.* " च्युतोऽच्युतो द्विधा षड्जो द्विश्रुतिर्विकृतो भवेत्." The sound which appears in its last component part (छंदोवती) is said to be अच्युत, when otherwise, it is called च्युत. च्युतो यस्यां चतुर्थ्यां श्रुतौ स्थापितस्तस्याः सकाशात् प्रच्युतः । मन्दसंस्थितः=द्विश्रुतिकः । अच्युतस्तस्यामेव श्रुतौ अवस्थितः । छंदोवतीस्थः द्विश्रुतिकः. On द्विधाभिन्नाः Chāritravardhana has the following note:—महाजनदर्शनजनितविस्मयभयाभ्यां स्निग्धदीप्तभेदेन द्विधाभिन्नाः । " विस्मयाद्भवति स्निग्धो भयादीप्त उदाहृतः ।" इति दन्तिलः. *Cf.* also षड्जं वदति मयूरः पुनः स्वरमृषभं चातको ब्रूते । गान्धाराख्यं छागो निगदति च मध्यमं क्रौञ्चः ॥ गदति पञ्चममञ्चितवाक्पिको । रटति धैवतमुन्मददर्दुरः ॥ श्रणिसमाहतमस्तककुञ्जरो । गदति नासिकया स्वरमन्तिकम् ॥ Chāritravardhana rightly observes " स्त्रीपुंसभेदेन द्विधाभिन्नः." And मूर्च्छना means, ' a duly regulated rise and fall of sounds conducting the air and harmony through the kees in a pleasing manner.' They are thus given by Sároddhárinī from the नारदीयशिक्षा—" सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः । ताना एकोनपञ्चाशदित्येतच्छ्रुतिमण्डलम् । षड्जश्च ऋषभश्चैव गांधारो मध्यमस्तथा । पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः । षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्तिताः । भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः । स्वर्गान्नान्यत्र गांधारो नारदस्य वचो यथा ।" And further it says:—"षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम् । अजा वदति गान्धारं क्रौञ्चो वदति मध्यमम् । पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥" विविध°—Analyse मङ्गला या गीतिः तस्याः पदानि मङ्गलगीतिपदानि । विविधानि च तानि मङ्गलगीतिपदानि च विविधमङ्गलगीतिपदानि तैः तादृशैः, ' By various auspicious songs.' The metre of this and the next verse is नर्दटक. For the definition and its Gaṇas see notes on stanza 70th of the fourth canto. अथ— ' Then women woke him, who was asleep, in the morning, with various auspicious songs accompanied with agreeable sounds

which were made an object of the *Shadja* note divided into two parts, in consonance with the excessively soft sonorous vibratings of the strings of Vîṇá, and following the sounds sprung from flutes sweetly sounded.'

St. 101. हृदय°—Construe रतिषु हृदयनिपीडनोद्धृतपयोधरकुङ्कुमया दशनखण्डितं ओष्ठमणिं दधानया चिरकृतजागरारुणितमन्थरलोचनया प्रमदोत्तमया प्रियमनु शयनं अमुच्यत. हृदय°—Analyse हृदयस्य निपीडनेन उद्धृतं पयोधरयोः कुङ्कुमं यस्याः सा तया तादृश्या, 'By her having the saffron-paste on her breasts removed by close embraces of the heart.' दशनखण्डितं—Analyse दशनैः खण्डितः दशनखण्डितः तं दशनखण्डितं, 'Bit by teeth.' ओष्ठमणिं—Analyse ओष्ठः एव मणिः ओष्ठमणिः तं तादृशं, 'Jewel–like lips.' चिरकृत°—Analyse चिरकृताद् जागराद् अरुणिते अत एव मन्थरे लोचने यस्याः सा तया तादृश्या, 'By her having eyes dull (or lazy) and impurpled (or reddened) by long wakefulness.' अरुणित *adj.*—'Impurpled.' 'Reddened.' Derived from the *Denomi. 3rd per. sing.* अरुणायते (अरुणं क्रियते). प्रमदोत्तमया—Analyse प्रमदासु उत्तमा प्रमदोत्तमा तया, 'By the best of the ladies.' हृदय°—'That best of the ladies, who had the saffron-paste on her breasts removed by close embraces of the heart, who had the jewel-like lips bit by teeth during enjoyment and whose eyes were dull and reddened by long wakefulness, left the bed after her lord.'

CANTO IX.

St. 1. इति—Construe इति सुखेन प्रवृत्तस्य सुतस्य केषुचिद्दिनेषु यातेषु सुतानां इतत्त्रयं वनितापरिग्रहैः समस्य स भूपति पुरं प्रतस्थे. भूपतिः—Analyse भुवः पतिः भूपतिः, 'The lord of the earth.' वनिता°—Analyse वनिताः कुमार्यः एव परिग्रहाः दाराः वनितापरिग्रहाः तैः तादृशैः, 'With them having princesses for their wives.' समस्य *ger.*—'Having united.' 'Having taken collectively in marriage.' Derived from अस् *vt.* 4. U. (सेट्) with सम्. सुखेन—May as well be construed with यातेषु. The metre of this canto is वंशस्थ. For the definition and its Gaṇas see our notes on III. 64. इति—'When the prince spent several days being thus occupied in happiness, the king, having united the remaining triad of his sons in marriage with princesses, started for his capital.'

St. 2. उपेत्य—Construe प्रयाणाभिमुखी भुवः सुता शोकसम्पदा कलत्रभारेण च मन्थरक्रमा [सती] पत्या सह उपेत्य पितुः पादौ दृशोरुदबिन्दुभिः ततान. शोकसंपदा—Analyse शोकस्य संपद् शोकसंपद् तया शोकसंपदा, 'By the intensity of grief.' कलत्र°—Analyse कलत्रस्य श्रोणेः भारः कलत्रभारः तेन तादृशेन, 'By the burden of hips.' *Cf.* Hema. "कलत्रं श्रोणौ भार्यायां दुर्गस्थाने च भूभुजाम्." मन्थरक्रमा—Analyse मन्थरः क्रमो यस्याः सा मन्थरक्रमा, 'Having slow steps.' 'With slow steps.' प्रयाणाभिमुखी—Analyse प्रयाणस्य अभिमुखी प्रयाणाभिमुखी, 'About to start.' 'Ready (or prepared) to depart.' उदबिन्दुभिः—Analyse उदकानां बिन्दवः उदबिन्दवः तैः तादृशैः, 'With drops of water.' *Cf.* Pàṇi. VI. 3. 60. "मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च," 'उद is optionally substituted for उदक, before मन्थ, ओदन, सक्तु, बिन्दु, वज्र, भार, हार, वीवध, and गाह.' Thus उदकस्य बिन्दुः उदबिन्दुः or उदकबिन्दुः. उपेत्य—'The daughter of the earth, ready to start, approached the king with her husband, with slow steps on account of the intensity of grief and the load of hips and wetted (*lit.* spread over) his feet with drops of water from her eyes' (i. e. with tears).

St. 3. असौ—Construe ततः असौ गुरुः गुणपक्षवर्तिनीं मतिं समालम्ब्य गुणैः पुरस्कृतं अपत्यं सतीनामुचितव्रताश्रयां गरीयसीं गिरं साधु जगौ. अपत्यं, Expl:—न पतन्ति पितरोऽनेनेत्यपत्यं, 'Offspring.' 'A child.' *Cf.* Uṇádisûtra, "अघ्न्यादयश्च." गुण°—Analyse गुणानां पक्षे वर्तितुं शीलमस्याः सा गुणपक्षवर्तिनी तां तादृशीं, 'Siding with (or partial to) virtues or merits.' उचित°—Analyse उचितं व्रतं आश्रयते इति उचितव्रताश्रया तां तादृशीं, 'Principally

dwelling upon the proper religious observances.' असौ—' Then her father, with discernment siding with merits, excellently addressed a magnificient speech (chiefly) dwelling upon the proper observances of virtuous women, to his daughter possessing virtues.'

St. 4. परः—Construe वपुषः परः प्रकर्षः । गुणस्य समुन्नतिः । नृपतिस्तातः । नवं च वयः । इति हे मानिनि मानं मास्म आगमः । योषितः पतिप्रसादोन्नतयो हि. *Cf.* Ku. V. 1. " प्रियेषु सौभाग्यफला हि चारुता." Also R. III. 34. " वपुःप्रकर्षादयजगद्गुरुं रघुः." And R. II. 47. " नवं वयः कान्तमिदं वपुश्च." समुन्नतिः—Analyse शोभना उन्नतिः समुन्नतिः, ' A great honour.' ' High dignity.' नृपतिः—Analyse नृणां पतिः नृपतिः, ' The lord of men.' ' A king.' मानिनी, Expl:—मानोऽस्त्यस्याः इति मानिनी, 'A proud woman.' 'An angry or disdainful woman.' *Cf.* Medi. "मानिनी तु स्त्रियां फल्यां मानी मानवति त्रिषु." पति°—Analyse पतीनां प्रसादाः पतिप्रसादाः ते एव उन्नतयो यासां ताः पतिप्रसादोन्नतयः, 'Having their dignity in the propitiousness of their lords.' मा स्म आगमः—Here the temporal augment is elided and the preposition आ is prefixed to the verbal form. *Cf.* Páṇi. VI. 4. 74. " न माङ्योगे," ' In connection with the prohibitive particle मा, the augment अट् or आट् is not added in the Aorist, Imperfect, and the Conditional.' Thus:—मा स्म करोत्. Exception to this rule of Páṇini is found in the epics. *Cf.* Rámá. Bál. Canto II. " मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ " ' Mayst thou never attain rest, O fowler, through eternal years, for that thou slewest one of a pair of Kraunchas when he was distracted by love.' The reading of the codex B. पतिप्रसादोन्नतयः कुलस्त्रियः appears preferable to the reading given in our text. For जनक goes on describing the conduct fit for a कुलस्त्री, and does not speak of women in general. Compare the above verse. परः—' O proud princess, be not puffed up on account of possessing great excellence of body, exaltation of merits, a king for a father and fresh youth; for women have their dignity in the propitiousness of their lords.'

St. 5. स्त्रियः—Construe पुंसामुदयस्य साधनं स्त्रियो न । किं तु । तद्धामविभूतिहेतवः ते पुमांसः एव । घनः तडिद्वियुक्तोऽपि प्रजृम्भते । परं । विद्युतो मेघं विना न विलसन्ति. *Cf.* Ku. IV. 33. " शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते । प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि " ॥ तद्धामविभूतिहेतवः—Analyse तासां धाम्नो विभूतेर्हेतवः तद्धामविभूतिहेतवः, ' The cause of the prosperity of their happy and auspicious state ' (i. e. of wifehood or the cause of the majesty of their glory). तडिद्वियुक्तः—Analyse तडिता

वियुक्तः तडिद्वियुक्तः, 'Separated from lightning.' प्रजृम्भते—'Begins to yawn.' 'Spreads.' 'Rumbles.' स्त्रियः—'Women do not contribute to the elevation of men; they (i. e. men) alone are the cause of the prosperity of their happy and auspicious state (or the majesty of their glory). The cloud rumbles (or spreads in the sky) even separated from the lightning, but it does not flash without the cloud.'

St. 6. गता—Construe भर्त्रे आयतं परिकोपं गतापि परुषार्थदीपनीः गिरो मा कृथाः । भर्तृजनस्य भर्त्सने कुलस्त्रियः मौनं परं साधनं प्रवदन्ति हि. *Cf.* S'ak. IV. 98. "भर्तृविप्रकृतापि रोषणतया मास्म प्रतीपं गमः." परुष°—Analyse परुषश्चासौ अर्थश्च परुषार्थः तस्य दीपन्यः परुषार्थदीपन्यः ताः तादृशीः, 'Burning with harsh meaning.' कुलस्त्रियः—Analyse कुलपालिका स्त्री कुलस्त्री तस्याः तादृश्याः, 'Of a respectable woman.' 'Of a chaste or virtuous woman.' *Cf.* Pàṇi. II. 1. 60. and the Vártika thereto, "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्," 'The compound like शाकपार्थिव should also be enumerated, and there is elision of the second member in these compounds.' भर्तृजनस्य–Analyse भर्ता एव जनः भर्तृजनः तस्य तादृशस्य, 'Of husbands.' मौनं, Expl:—मुनेर्भावः कर्म वा मौनं, 'Silence.' *Cf.* Páṇi. V. 1. 131. "इगन्ताच्च लघुपूर्वात्," 'The affix अण् comes in the sense of 'nature or action thereof,' after a stem ending in इक् (इ, ई, उ, ऊ or ऋ or ऌ), when the preceding syllable is prosodially light.' गतापि–'Though excessively (or exceedingly) angry with thy husband do not, O girl, use words burning with harsh meaning; for they call silence a great weapon of virtuous women for the reproof of their husbands.'

St. 7. पतिव्रता—Construe पतिव्रता अंगना शीलेन गुणस्पृहं पतिं अवश्यं वश्यं करोति । विनष्टचारित्रगुणा [तु] गुणैषिणो भर्तुः दुस्तरं पराभवं उपैति. पतिव्रता, Expl:—पत्यौ व्रतं नियमोऽस्याः । पतिव्रतमस्याः । पतिशब्दः पतिसेवायां लाक्षणिकः, 'A devoted and virtuous wife (faithful to her husband).' वश्यं, Explain:—वशमधीनत्वं गतः वश्यः तं तादृशं, 'Controllable.' 'Under control.' 'Dutiful.' *Cf.* Pàṇi. IV. 4. 86. "वशं गतः," 'The affix यत् comes in the sense of 'gone', after the word 'वश', control, being in the second case in construction.' Thus वशंगतः = वश्यः. गुणस्पृहं–Analyse गुणेषु स्पृहा यस्य स गुणस्पृहः तं तादृशं, 'Having an eager desire for virtues or merits.' अवश्यं *ind.*—'Necessarily.' 'Inevitably.' 'Certainly.' 'At all events.' 'By all means.' विनष्ट°—Analyse विनष्टः चारित्रस्य गुणो यस्याः सा तादृशी, 'Who has lost virtue in the course of

her career. ' गुणैषिणः—Analyse गुणानिच्छतीति गुणैषी तस्य तादृशस्य, ' Of one wishing for merits. ' ' Eagerly desiring merits. ' दुस्तरं, Expl:— तरितुं दुष्करं दुस्तरं, ' Difficult to be crossed or passed over. ' ' Hard to be traversed. ' ' Impassable. ' ' Hard to be subdued. ' ' Severe.' पतिव्रता—'A virtuous lady makes her husband, who is eagerly desirous of virtue, dutiful by her good nature; but a bad woman who has lost virtue in her career incurs (or gets) a severe slight from her husband wishing for merits. '

St. 8. अलं—Construe त्वयि व्याहृतिविस्तरेण अलम् । यत्त्वदाश्रयं चरितं श्रुतिं मे प्रयातं [चेत] जरसैव जर्जरमिदं मम हृदयं सहस्रधा न [वि] दारयेत् तत्कुरुष्व. व्याहृति°—Analyse व्याहृतेः विस्तरः व्याहृतिविस्तरः तेन तादृशेन, ' By a speech in detail. ' ' By a full speech. ' ' By a speech with full particulars.' For the formation of विस्तरः 'Prolixity of words. ' &c. *Cf.* Páṇini III. 3. 33. " प्रथने वावशब्दे, " ' The affix घञ् comes after the root स्तॄ ' to cover ' when the preposition वि is in composition with it, when the sense is that of extension, and when such spreading does not refer to words.' Here it refers to words and therefore विस्तरः and not विस्तारः. त्वदाश्रयं—Analyse त्वमेव आश्रयो यस्य तत्, ' Done by you.' ' Practised by you.' सहस्रधा—' In thousand ways. ' अलं—' I need not talk much to you. Shape your actions (or conduct) in such a manner that they, done by you, and reaching my ears, would not shatter my heart already worn by old age into thousand parts. '

St. 9. अयं—Construe त्वदेकप्रवणोऽयं [मे] मनोरथोऽस्य दैवादपि नाम वृथा नो भवेदिति जरतः प्रवक्तुः वचनानि मन्युना कण्ठं निगृह्य निरासिरे. *Cf.* S'ák. IV. 86. " कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनं." त्वद°—Analyse एकश्चासौ प्रवणश्च एकप्रवणः । त्वयि एकप्रवणः त्वदेकप्रवणः त्वदायत्तः, 'Solely devoted to you. ' 'Solely regarding you.' प्रवणः, Explain प्रवन्तेऽनेन । अत्र वा । इति प्रवणः, ' Devoted to.' 'Inclined to.' ' Attached to.' 'With respect to.' 'Regarding.' Derived from प्रु *vt.* or *vi.* 1. A. (अनिट्) ' To go,' ' to move,' ' to jump.' *Cf.* धरणिः, "प्रवणः क्रमनिम्नोर्व्यां प्रह्वे च स्याच्चतुष्पथे । आयत्ते च तथा क्षी (क्ष) णे प्रगुणे समुदाहृतः." Also Hema. " प्रवणस्तु क्षणे प्रह्वे क्रमनिम्ने चतुष्पथे । आयत्ते च." But kálidása uses this word in a different sense. Compare Ku. IV. 42. " परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः" । प्रवणीकृतोऽभिमुखीकृतः (अर्थादनुरक्तीकृतः). दैवात्-'From accident.' 'From divine power.' 'From destiny or fate.' अपिनाम *ind.*—' Is it likely. ' ' Would that. ' ' I hope that &c. ' मन्युना—'Through grief.' *Cf.* Medi. " मन्युः पुमान् क्रुधि दैन्ये शोके यज्ञे च. "

अयं—' Let me hope that this desire of mine solely regarding you would not, from this day, be fruitless through fortune (or divine power); so came out the words from the aged speaker, filling his throat with grief.'

St. 10. उदग्र°—Construe अथ उदग्रभासः शिखामणेः शिखया धम्मिल्लकिरीटदष्टया स्रजा च जनकस्य [राज्ञः] पादौ प्रमृज्य लम्भिताशिषौ जम्पती क्षयात् [प्रासादात्] अयाताम्. उदग्रभासः—Analyse उदग्रा भाः यस्य स उदग्रभाः तस्य तादृशस्य, ' Of one having bright splendour. ' शिखा°—Analyse शिखायाः मणिः शिखामणिः तस्य तादृशस्य, ' Of the crest-jewel. ' धम्मिल्ल°—Analyse धम्मिल्ले यः किरीटः तेन दष्टा तया, ' By it hanging round (or attaching to) the diadem on the ornamental braided hair. ' धम्मिल्ल *m.*—The braided and ornamental hair of a lady tied round the head and intermixed with flowers, pearls &c. क्षयात्—' From a palace. ' *Cf.* Hema. " क्षयो गेहे कल्पान्तेऽपचये रुजि. " Pāṇini treating of the accent on क्षय determines the sense of the word. *Cf.* Pāṇi. VI. 1. 201. " क्षयो निवासे, " ' The word क्षय has the acute on the first syllable in the sense of 'house, dwelling.' But the rhetoricians condemn the use of this word. लम्भित°—Analyse लम्भिताः आशिषो याभ्यां तौ तादृशौ, ' Who have received blessings. ' ' Having been blessed. ' उदग्र°—' Then the pair washed the feet of Janaka with the point of the crest-jewel of bright splendor, and the garland hanging round the diadem on the ornamental braided hair and having been blessed came out of the palace. '

St. 11. कृतः—Construe वियोगेन शुचः समुद्रवः कृतः । साधुवरेण समर्पितः संमदः च तस्य ईशितुः मनसि क्षणं अवस्थाननिमित्तं विवादानिव चक्रतुः. साधुवरेण—Analyse साधुश्चासौ वरश्च साधुवरः तेन तादृशेन, ' By an excellent husband.' अवस्थाननिमित्तं—Analyse अवस्थानस्य or अवस्थानेन निमित्तं अवस्थाननिमित्तं, ' Caused or produced by stay. ' ' Occasioned by stay.' ' ईशितुः, Expl:—ईष्टे इति ईशिता तस्य, ' Of the ruler of the earth.' *Cf.* Pāṇi. III. 2. 135. " तृन्," ' The affix तृन् comes after all verbs in the sense of ' agents having such a habit &c.' Also *Cf.* Pāṇi. III. 1. 133. कृतः—' The rise of the grief due to separation and the joy derived from an excellent husband (to his daughter) set up a momentary quarrel, as it were, for stay in the mind of the ruler of people.'

St. 12. हला°—Construe ततः प्रगल्भाहतभेरिसंभवः पयोधिनिर्घोषगभीरभैरवः सकाहलः रवः हलायुधाभस्य गतिं समन्ततः प्रकाशयामास. हला°—Analyse हलायुधस्य बलरामस्य आभा इव आभा यस्य स तस्य तादृशस्य, ' Having a lustre

(of power) like that of Balaráma.' सकाहल:—Analyse काहलेन सह सकाहल:, 'Of a cornet.' 'Of a war-trumpet.' The wind instrument of music, often used in war and military exercises, and of great value in the orchestra. It consist of a long metallic tube, with a bell-shaped opening at one end for the emission of sound. पयोधि°—Analyse पयोधेर्निर्घोषः पयोधिनिर्घोषः । तद्वद् गभीरः अत एव भैरवः पयोधिनिर्घोषगभीरभैरवः, 'Deep and terrible like the booming of the the ocean.' प्रगल्भ°—Analyse प्रगल्भेन आहता या भेरिः तस्याः संभवो यस्य स तादृशः, 'Produced from the kettle-drums beaten energetically.' हला°—'Then a very loud sound produced from kettle-drums beaten energetically, intermixed with that of the cornets and deep and terrible like the booming of the ocean, proclaimed on all sides the departure of him whose lustre was like that of Balaráma.'

St. 13. गजेन्द्र°—Construe अथ गजेन्द्रघण्टाघटितो निःस्वनश्च मुहुः करेणुका-बृंहितबृंहितः सन् समं समुद्धतः भवनेषु पक्षिणां भयं वितन्वन् दिशः ससर्प. गजेन्द्र°—Analyse गजानां इन्द्राः गजेन्द्राः तेषां घण्टाभिः घटितः गजेन्द्रघण्टाघटितः, 'Produced from the bells of the best of elephants.' करेणुका°—Analyse करेणुकानां बृंहितेन बृंहितो वर्धितः, 'Heightened by the roaring of the female elephants.' गजेन्द्र°—'Then the loud noise produced by the bells of the best of elephants and gradually heightened by the roaring of the female elephants caused (*lit.* carried) fear to the birds in the palaces (or in their holes) and being greatly swollen spread equally in all directions.'

St. 14. समा°—Construe अथ महारथः रामः राजकन्यया सह सहेमचित्रं रथं दिवाकरः स्वरश्मिदीप्त्या दिनादिसन्ध्यानुगतां अत एव पिशङ्गितां दिवमिव समारुरोह. महारथः—'A car-warrior.' Hemádri says:—इति युद्धकौशलम् । यद्वा । "धनुर्वेदस्य तत्वज्ञः सर्वशास्त्रविशारदः । सहस्रं योधयत्येकः स महारथ उच्यते ॥" Elsewhere the term is defined as:—"एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते." सहेमचित्रं—Analyse हेममयानि चित्राणि । हेमचित्राणि । हेमचित्रैः सह सहेमचित्रं, 'Having golden pictures.' 'Furnished with golden pictures.' राज°—Analyse राज्ञः कन्या राजकन्या तया तादृश्या 'In company with the princess.' 'With the daughter of the king.' दिनादि°—Analyse दिनस्यादौ या सन्ध्या तामनुगता दिनादिसन्ध्यानुगता तां तादृशीं, ('To the sky) which has followed (or has acquired) the twilight to be seen at the beginning of the day.' पिशङ्गित—*Denomi. past. parti.* 'Made reddish-brown.' 'Of a tawny-brown colour.' स्व°—Analyse स्वस्य रश्मयः स्वरश्मयः तेषां दीप्तिः स्वरश्मिदीप्तिः तया तादृश्या, 'By

his own lustre.' 'By his own splendour.' समा°—'Then that great warrior together with the princess ascended the car, having golden pictures, as the sun with his own lustre ascends the reddish-brown sky which has followed (or acquired) the twilight to be seen at the beginning of the day.'

St. 15. शिरःप्र°—Construe शिरःप्रदेशस्थसमुद्गपेटिकागृहीतवीणांशुकपञ्जरादयः सवेत्रहस्तैः स्थविरैरधिष्ठिताः स्त्रियोऽपि मुदा अनुस्यन्दनमत्यगुः. शिरःप्रदेश°—Analyse शिरसः प्रदेशः शिरःप्रदेशः तत्र तिष्ठन्तीति शिरःप्रदेशस्थाः। समुद्गाश्च ताः पेटिकाश्च समुद्गपेटिकाः। शिरःप्रदेशस्थाः याः समुद्गपेटिकाः तासु गृहीताः वीणाः अंशुकानि पञ्जरादिश्च याभिस्ताः तादृश्यः, 'Who carried lutes, silk-woven garments, cages &c., in the covered boxes (or caskets) placed on their heads.' Or the adjective शिरःप्रदेशस्थसमुद्गपेटिकाः should be taken separately, qualifying the noun स्त्रियः, instead of making a long compound. The analysis of the compound would then be, शिरःप्रदेशस्थाः समुद्गपेटिकाः यासां ताः तादृश्यः, 'Who have carried the covered boxes (or caskets) on their heads.' सवेत्र°—Analyse वेत्राः हस्ते येषां ते वेत्रहस्ताः तैः सह सवेत्रहस्ताः, 'Carrying canes in their hands.' 'Holding canes in their hands.' अनुस्यन्दनम् *adv.*—Analyse स्यन्दनं अनु अनुस्यन्दनम्, 'After the car.' 'After the chariot.' शिरःप्रदेश°—'Even women, carrying lutes, silk-woven garments, cages &c, in the covered boxes placed on their heads under the superintendence of old chamberlains holding canes in their hands overtook (or passed by) the car with great joy.'

St. 16. मदान्ध°—Construe मदान्धमातङ्गघटाद्रिसंकटे परिक्वणन्ती बलकायनिम्नगा वल्गुतुरङ्गरङ्गितैः तरङ्गिता सती पुरुहूततेजसः पुरः प्रतस्थे. मदान्ध°—Analyse मदेन अन्धा या मातङ्गानां घटा सैव अद्रिः तस्य संकटं तस्मिन् तादृशे, 'On account of the obstruction of the mountain formed of the troops of elephants blind with rut.' सङ्कटं, Expl:—सङ्कटतीति सङ्कटं, 'Obstruction.' *Cf.* Pāṇi. III. 1. 134. Derived from कट् *vt.* or *vi.* 1. P. (सेट्) 'To rain,' 'to cover,' 'to go.' Or it may be derived from सम् and कटच्. *Cf.* Pāṇi. V. 2. 29. "सम्प्रोदश्च कटच्," 'The affix कटच् (कट) comes after the prepositions सं, प्र, उद्, and वि.' Thus संकटम्, प्रकटम्, उत्कटम् and विकटम्. बल°—Analyse बलमेव कायः बलकायः। बलकायरूपा निम्नगा बलकायनिम्नगा सेनात्मकनदी, 'A river consisting of the army.' तरङ्गिता *adj.* Expl:—तरङ्गाः सञ्जाताः अस्याः तरङ्गिता, 'Wavy.' 'Billowy.' 'Tossing with waves.' *Cf.* Pāṇi. V. 2. 36. "तदस्य संजातं तारकादिभ्य इतच्," 'The affix इतच् (इत) comes after the words तारका &c in the first case in construction in the sense of 'that whereof this is

observed or produced or appeared.' वल्गु°—Analyse तुरङ्गाणां रङ्गितानि तुरङ्गरङ्गितानि । वल्गूनि च तानि तुरङ्गरङ्गितानि च वल्गुतुरङ्गरङ्गितानि तैः तादृशैः, 'With lovely movements of the horses.' पुरुहूत°—Analyse पुरुहूतस्य इन्द्रस्य तेजः इव तेजो यस्य स तस्य तादृशस्य, 'Of him having the brilliance of Indra.' मदान्ध°—'The river consisting of his army, noisy by the obstruction of the mountain formed of the troops of elephants blind with rut, and foaming with waves of the lovely movements of the horses, set out in front of him, having the brilliance of Indra.'

St. 17. स्व°—Construe स्वदृष्टिरोधि रथोत्थं रजः श्रवणाग्रमारुतैः यदि नाहरिष्यत [तदा] मदस्रुतां दन्तिनां विनिर्गताभिः घटाभिः वर्त्म पुरो नादृक्ष्यत. स्व°—Analyse स्वेषां दृष्टयः स्वदृष्टयः ताः रुणद्धीति स्वदृष्टिरोधि, 'Blinding or obstructing their sight.' 'Obscuring their sight.' श्रवण°—Analyse अग्राश्च ते मारुताश्च अग्रमारुताः श्रवणानां अग्रमारुताः श्रवणाग्रमारुताः तैः तादृशैः or श्रवणानां अग्रेभ्यः उत्थिताः मारुताः श्रवणाग्रमारुताः तैः तादृशैः, 'By the wind (or breezes) produced from the fore-points of their flapping-ears.' रथोत्थं—Analyse रथेभ्यः उत्थं रथोत्थं, 'Raised by the cars.' मदस्रुतां—Analyse मदं स्रवन्तीति मदस्रुतः तेषां मदस्रुतां, 'Of those who shed (or shower) rut.' स्व°—'Had not the dust, raised by the cars, blinding their sight, been cleared off by the wind (produced) from the fore-points of their flapping-ears, the path in their front would not have been seen by the troops of elephants showering rut, when in swift motion.'

St. 18. व्यतीत°—Construe अथ व्यतीतरथ्ये रथे पुरगृह्यदीर्घिकासमीरणानर्तितपद्मजं रजः तस्याः विलासवत्याः लसदंशुजालयोः कपोलयोः पपात. व्यतीत°—Analyse व्यतीता रथ्या येन स व्यतीतरथ्यः तस्मिन् तादृशे, 'Which has gone over some ground of the high road.' कपोलयोः—'On both the cheeks'. Derived from कम्प् *vi.* I. A. (सेट्) 'To shake.' 'To tremble.' *Cf.* Uṇâdi-Sûtra, "कपिगडिगण्डिकटिपटिभ्य ओलच्," The penultimate nasal is dropped since the root is authoritatively written कपि in the Sûtra by शाकटायन. Or कं सुखं पोलति. Derived from पुल् *vi.* I. P. (सेट्) 'To be great or large.' 'To be lofty or high.' 'To be piled or heaped up.' *Cf.* Pâṇi. III. 2. 1. विलासवत्याः, Expl—विलसनशीला विलासवती तस्याः विलासवत्याः, 'Of the sportive lady.' लसदंशुजालयोः—Analyse लसन्तः ये अंशवः तेषां जालानि ययोः तौ तयोः लसदंशुजालयोः, 'Shining with the collections or multitudes of rays.' पुरगृह्यदीर्घिका°—Analyse पद्मेभ्यः जातं पद्मजम् । पुरगृह्या या दीर्घिका तस्याः समीरणेन आनर्तितं पद्मजं यस्य तत् पुरगृह्यदीर्घिकासमीरणानर्तितपद्मजं, 'Raised (or sprung) from the lotuses in the artificial pond lying

outside the city.' पुरगृह्य=पुरबाह्य, 'Lying outside the city.' *Cf.* Pāṇi. III. 1. 119. "पदास्वैरिबाह्यापक्ष्येषु च," 'The root ग्रह् takes the affix क्यप्, when it means a 'word', a 'dependent', 'outside' or a 'partisan'. Thus प्रगृह्यम् 'the Prag*ri*hya that do not admit of Sandhi, already defined in Sûtra I. 1. 2. So also अवगृह्यं. The word अस्वैरि means dependent upon other, not free to provide for himself. Thus गृह्यकाः शुकाः, 'The captive parrots.' The word बाह्य means 'situated outside.' Thus ग्रामगृह्या सेना 'an army lying outside the village.' The word बाह्या being in the feminine gender indicates that the derivative word formed from ग्रह् must also be feminine in gender to have this sense. The word पक्ष्य is derived from पक्ष 'a side, a party,' and means a partisan, follower or friend. Thus वासुदेवगृह्याः 'siding with or being the partisans of Vàsudeva.' So also अर्जुनगृह्याः 'belonging to the party of Arjuna.' व्यतीत°—'When the car went over some ground of the high road, the dust of the lotuses in the artificial pond outside the city made to dance by the wind, settled upon the cheeks, shining with collections of rays, of that sportive lady.'

St. 19. वराङ्गना—Construe पथि प्रस्तरभेदकोटिभिः चक्रे हतस्य वरूथिन यत् चलनं तच्चलनं पिधाय वराङ्गना तं प्रियं बलसन्निधावपि आललम्बे. वराङ्गना—Analyse वरा चासौ अङ्गना च वराङ्गना, 'A beautiful or noble woman.' प्रस्तर°—Analyse प्रस्तराणां भेदाः तेषां कोटयः प्रस्तरभेदकोटयः ताभिः तादृशीभिः, 'By the points of pieces of stones.' वरूथिनः, Expl:—वरूथः रथगुप्तिः सोऽस्यास्तीति तस्य वरूथिनः, 'Of a war-car or chariot furnished with protecting plank or ledge.' व्रियते रथो अनेनेति । परप्रहरणाभिघातरक्षार्थं रथसन्नाहवदावरणम् । *Cf.* Unádisûtra, "जॄवृञ्भ्यामूथन्." Derived from वृ *vt.* 5. U. (सेट्) 'To cover.' 'To surround.' बल°—Analyse बलस्य सन्निधिः बलसन्निधिः तस्मिन् तादृशे, 'In the presence of the army.' पिधाय *ger.*—Is equivalent to समाश्रित्य, 'Taking advantage of,' or पुरस्कृत्य, 'Having placed before or caused to precede.' 'Having honoured or paid respect to.' The Sinhalese *Sanna* interprets the gerund by संवा [समा] धाय and Principal Dharmàràma renders it by संवरणयक्रोट. Both these interpretations are unintelligible to me. वराङ्गना—'Taking advantage of the shocks of joltings to the wheel of the war-car struck by the points of pieces of stones, on the road, the beautiful lady hung upon her dear lord even in the presence of the army.'

St. 20. रथ°—Construe अथ वनान्तवर्तिनी सीता रथध्वनिप्रापितसंमदं समुत्पुच्छयमानं उन्मुखं उदग्रकर्णं गवां कुलं एकतः परिधावद् ददर्श. रथ°—Analyse

रथस्य ध्वनिना प्रापितः संमदो यस्य तत्, 'Gladdened by the noise of the car.' 'Conducted or led to experience joy by the noise.' 'Joy in which was instilled by the noise of the car.' समुत्पुच्छयमानं—*Denomi. pre. parti.* of (समुत्पुच्छयते) 'Uplifting the tails.' 'With their tails erect.' उन्मुखं—Analyse उद्गतं मुखं यस्य तद् उन्मुखं, 'Looking upwards.' उदग्रकर्ण—Analyse उदग्राः कर्णाः यस्य तत्, 'Having their ears erect or raised.' वनान्तवर्तिनी—Analyse वनस्य अन्तः वनान्तः तत्र वर्तिनी वनान्तवर्तिनी, 'Being in the middle or on the skirts of the forest.' वनान्तः वनप्रदेशः or simply 'a forest.' The word अन्त has no special meaning here. It may mean प्रदेश or it may be added to strengthen the force of the locative termination. *Cf.* Chāritra-vardhana, "अन्तशब्दे स्वरूपे." रथ°—'Sîtâ, who was in the midst of the forest, then saw a herd of wild cows, gladdened by the noise of the car, with their tails uplifted, looking upwards, having the ears erect and running on one side (of the forest).'

St. 21. विनिद्र°—Construe मृदुभिः समीरणैः विनिद्रपद्माः कलहंसिकागिरः विसारयन्त्यः स्वदेशसीमासरितः विलङ्घिताः [सत्यः] वधूचेतसि शुचं साधु सन्दधुः. विनिद्र°—Analyse विनिर्गता निद्रा येषां तानि विनिद्राणि । विनिद्राणि पद्मानि यासु ताः विनिद्रपद्माः, 'The lotuses in which were blooming (*lit.* have shaken off their sleep).' कलहंसिकागिरः—Analyse कलहंसिकानां गिरः कलहंसिकागिरः, 'The inarticulate sounds of female swans.' An object to विसारयन्त्यः. स्वदेश°—Analyse स्वस्य देशः स्वदेशः तस्य सीमायाः सरितः स्वदेशसीमासरितः, 'The rivers on the boundary of one's own country.' वधूचेतसि—Analyse वध्वाः चेतः वधूचेतः तस्मिन् तादृशे, 'In the heart of the bride.' विनिद्र°—'The rivers on the boundary of her country having lotuses blooming by the gentle breezes and spreading inarticulate sounds of the female swans, produced, when crossed, a great grief in the heart of the bride.'

St. 22. विवृत्त°—Construe स्वजन्मभूमौ विवृत्तदृष्टाः गिरयो विषयव्यतिक्रमाद् अवनीतले शनैर्निमज्जन्तः इव नृपात्मजाकपोलं अश्रुभिः अजस्रमातेनतुः. विवृत्त°—Analyse विवृत्तेन विवर्तनेन दृष्टाः विवृत्तदृष्टाः, 'Seen as rolling.' 'Seen by turning back.' विषयव्यतिक्रमात्—Analyse विषयाणां व्यतिक्रमः विषयव्यतिक्रमः तस्मात्, 'On account of passing over countries.' अवनीतले—Analyse अवन्याः तलं अवनीतलं तस्मिन् अवनीतले, 'Into the surface of the earth or ground.' स्वजन्मभूमौ—Analyse स्वस्य जन्मभूमिः स्वजन्मभूमिः तस्यां स्वजन्मभूमौ, 'In the native country.' 'On the native land.' नृपात्मजा°—Analyse नृपस्य आत्मजा नृपात्मजा तस्याः कपोलः तं तादृशं, 'To the cheeks of the daughter of the king.' विवृत्त°—'The mountains of her native country seen as rolling on account of passing over the country

and slowly plunging, as it were, into the surface of the earth, frequently covered the cheeks of the princess with tears.'

St. 23. द्विपेन्द्र°—Construe द्विपेन्द्रदन्ताहतवन्यसल्लकीकषायगन्धिर्वनान्तमारुतस्तत्र पथि योषितामलकाग्रवल्लरीः शनैर्विधुन्वन् मुखानि पस्पर्श. द्विप°—Analyse वन्याश्च ताः सल्लक्यश्च वन्यसल्लक्यः। द्वाभ्यां पिबन्तीति द्विपाः तेषां इन्द्राः द्विपेन्द्राः तेषां दन्तैः आहताः याः वन्यसल्लक्यः तासां कषायस्य गन्धः इव गन्धो यस्य स तादृशः, 'Having an astringent odour (or flavour) of the wild Sallakî (trees) being struck with the tusks by princes of elephants.' अलकाग्रवल्लरीः—Analyse अलकानां अग्राणि अलकाग्राणि तान्येव वल्लर्यः ताः तादृशीः, 'Creeper-like ends of the hair.' वनान्तमारुतः—Analyse वनस्य अन्तः वनान्तः तस्य मारुतः वनान्तमारुतः, 'The wind of the borders of the forest.' 'The wind of the forest.' द्विपेन्द्र°—'There, on the road, the wind of the borders of the forest, having an astringent odour on account of the wild Sallakî (trees) being struck with the tusks of the princes of elephants and slowly shaking the creeper-like ends of the hair touched the faces of the ladies.'

St. 24. अथ—Construe अथ तामसः प्रतानः नृपस्य भीमं भयमादिशन् क्षपायाः विगमेऽपि वैरोचनरोचिषां संहतिं प्रसह्य क्षिपन् पथि दिशः प्रततान. प्रतानः—Analyse प्रकर्षेण तानः प्रतानः, 'A mass.' 'A heap.' तामसः, Expl:—तमसो जातः तामसः, 'Belonging to darkness.' 'Dark.' वैरोचन°—Analyse विरोचनाद् आगतानि वैरोचनानि। वैरोचनानि च तानि रोचींषि च वैरोचनरोचींषि तेषां वैरोचनरोचिषां, 'Belonging (or pertaining) to the rays of the sun.' अथ—'A mass of darkness giving great fear to the king and forcibly throwing aside the collection of the sun's rays even after the disappearance of the night, spread to all directions on the road.'

St. 25. अरिष्ट°—Construe तमोऽभिभूताः प्रतिकूलमारुताः अरिष्टसन्तापविरूपदर्शनाः दिशः विनाशोपनताः इव अविप्रसन्नानि मुखानि क्षणं भेजिरे. *Cf.* R. XI. verses 58 to 62. अरिष्ट°—Analyse अरिष्टः अशुभश्चासौ संतापः दिग्दाहश्च अरिष्टसंतापः तेन विरूपं दर्शनं यासां ताः तादृश्यः, 'Having monstrous appearance on account of the inauspicious heat.' अरिष्ट *m.*—'Bad or ill-luck.' 'Misfortune.' 'A natural phenomena boding misfortune.' 'Sign or symptom of approaching death.' As applied to विनाशोपनताः the compound may be analysed in the following way :—अरिष्टस्य दुःखस्य संतापः भोगचिन्ता तेन विरूपं दर्शनं यासां ताः तादृश्यः, 'Having an unnatural (or care-worn) appearance consequent on the anxiety of befalling calamity.' तमोऽभिभूताः—Analyse तमसा अभिभूताः तमोऽभिभूताः, 'Enveloped in darkness.' When applied ot

विनाशोपनताः the compound may be analysed as :—तमसा अज्ञानेन अभिभूताः मोहिताः तमोऽभिभूताः, 'Infatuated by the quality of darkness.' प्रतिकूलमारुताः—Analyse प्रतिकूलाः मारुताः यासु ताः प्रतिकूलमारुताः, 'Having contrary winds.' Winds blowing in opposite or contrary directions often bode bad omen or approaching calamity. As applied to विनाशोपनताः the compound may be analysed as :—प्रतिकूलाः मारुताः देवाः यासु ताः प्रतिकूलमारुताः, 'Having the deities disposed in a hostile manner.' अविप्रसन्नानि—Analyse विशेषेण प्रसन्नानि विप्रसन्नानि । न विप्रसन्नानि अविप्रसन्नानि, 'Highly dissatisfied.' 'Highly displeased.' विनाशोपनताः—Analyse विनाशं उपनताः विनाशोपनताः, 'Verging on destruction.' अरिष्ट°—'The quarters, having monstrous appearance on account of the inauspicious heat, enveloped in darkness and having contrary winds, assumed for a moment displeased looks, like persons, verging on destruction.'

St. 26. अथ—Construe अथ दीप्तिभिः उदीचीं दिशं क्षणादवभास्य अग्रतः प्रकाशीभवत्तेजः बलेन पुरुषाकृतिश्रिया [च] विभक्तं उत्पातमनु व्यदृश्यत. *Cf.* R. XI. 63. "तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे । यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात्." पुरुषा°—Analyse पुरुषस्य आकृतेः श्रीः पुरुषाकृतिश्रीः तया तादृश्या, 'With the splendour of a man's form.' अथ—'Then after that portent, a certain lustre manifesting itself in front and instantly illuminating the northern quarter with its radiance was seen distinct with the splendour of a man's form and with manly power.'

St. 27. ततः—Construe ततः श्रवणावसङ्गिनीं विशुष्कपङ्केरुहबीजमालिकां विलोचनोपान्ते विनिद्ररक्तोत्पलशङ्कया ततामलिसन्ततिमिव दधानः [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेणान्वयः]. श्रवणावसङ्गिनीं—Analyse श्रवणयोः कर्णयोः अवसङ्गिनी श्रवणावसङ्गिनी तां तादृशीं, 'Hanging on his ears.' विशुष्क°—Analyse पङ्के रोहन्तीति पङ्केरुहः तेषां बीजानि पङ्केरुहबीजानि । विशुष्काणि च तानि पङ्केरुहबीजानि च विशुष्कपङ्केरुहबीजानि तेषां मालिका विशुष्कपङ्केरुहबीजमालिका तां तादृशीं, 'A garland of dry lotus-seeds.' विनिद्र°—Analyse रक्तानि च तानि उत्पलानि च रक्तोत्पलानि । विनिद्राणि च तानि रक्तोत्पलानि च विनिद्ररक्तोत्पलानि तेषां शङ्का तया तादृश्या, 'With the expectation of blooming red-lotuses.' विलोचनोपान्ते—Analyse विलोचनयोः उपान्तः विलोचनोपान्तः तस्मिन् तादृशे, 'At the corner of the eyes.' अलि°—Analyse अलीनां संततिः अलिसन्ततिः तां तादृशीं, 'A row of black-bees.' This and the next four verses form a कुलक. For the definition &c. see our notes on II. 2. ततः—'Then the lord of the Bh*ri*gus had a garland of dry lotus-seeds pending on his ears, like a row of bees, spread at the corner of his eyes, with the expectation of blooming red-lotuses.'

St. 28. विशाल°—Construe विशालवामांसतटावलङ्गिनीं तीव्रतपोहुताशनस्फुलिङ्गपातैरिव बिन्दुचित्रितां द्वीपितनुं सम्रुद्वहन् रुषा परिज्वलन् तनूदरः [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेणान्वयः]. विशाल°—Analyse वामश्चासौ अंसश्च वामांसः। विशालः वामांसः विशालवामांसः तस्य तटे अवलंघिनी विशालवामांसतटावलंघिनी तां तादृशीं, 'Suspending on the slope of his broad left-shoulder.' द्वीपितनुं—Analyse द्वीपिनः तनुः द्वीपितनुः तां द्वीपितनुं, 'The hide (or skin) of a leopard.' तनूदरः—Analyse तनु उदरं यस्य स तनूदरः, 'Having a thin stomach.' तीव्र°—Analyse तीव्रो यस्तपसां हुताशनः तस्य स्फुलिङ्गानां पाताः तीव्रतपोहुताशनस्फुलिङ्गपाताः तैः तादृशैरिव, 'Like the falling of sparks of the fire of his rigorous asceticism.' बिन्दुचित्रितां—Analyse बिन्दुभिः चित्रिता बिन्दुचित्रिता तां तादृशीं, 'Variegated with spots.' 'Marked with spots.' विशाल°—'The thin-bellied lord of the Bhrigus, burning with rage, carried a leopard's skin suspended on the slope of his broad left shoulder, which was variegated with spots, as if, with the mark of the sparks of the burning fire of his rigorous asceticism.'

St. 29. भुजे—Construe अतिभीमे वामे भुजे द्विषां निधनावहं सशरं शरासनं निधाय अपरस्मिन् करे परदुर्गपारगं परं परशुं बिभ्रत् स परासुहा [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेणान्वयः]. अतिभीमे—Analyse अतिशयितः भीमः अतिभीमः तस्मिन् तादृशे, 'Exceedingly terrible.' सशरं—Analyse शरेण सह सशरं, 'Equipped with an arrow.' शरासनं—Analyse शराः अस्यन्ते अनेनेति शरासनं, 'Shooting an arrow.' 'An arrow-shooter.' 'A bow.' निधनावहं—Analyse निधनं आवहतीति निधनावहं, 'Carrying death.' परदुर्गपारगं—Analyse पारं or पारे गच्छतीति पारगः। परेषां दुर्गस्य पारगः परदुर्गपारगः तं तादृशं, 'Penetrating the hill-forts of his opponents.' परशुं, Expl:—परं शृणाति इति परशुः तं तादृशं, 'An axe.' Derived from शृ *vt.* 9. P. (सेट्) 'To tear asunder.' 'To split in pieces.' 'To kill.' *Cf.* Uṇâdi-Sûtra "आङ्परयोः खनिशृभ्यां डिच्च" इति कुः (उ)। पृषोदरादित्वादकारलोपात्पर्शुरपि. As आखुः परशुः or पर्शुः. परासुहा—Analyse परेषां असून् हन्तीति परासुहा, 'The destroyer of the life of his enemies.' भुजे—'That lord of the Bhrigus, the destroyer of the life of his enemies, bore on his exceedingly terrible left arm a bow equipped with an arrow, which carried death to his enemies and carried in his other hand an excellent axe, which penetrated the hill-forts of his opponents.'

St. 30. तपो°—Construe आदित्यमयूखपिङ्गलाः वलिताः जटाः तपोभिधानस्य सितेतरवर्त्मनः अग्नेः शिखा इव आत्मरयेण संभृतैः समीरणैः समन्ततः विधुन्वन् [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेण संबन्धः]. तपो°—Analyse तपः

अभिधानं यस्य स तपोभिधानः तस्य तादृशस्य, 'Of one going by the name of religious austerities.' सितेतराध्वनः—Analyse सितात् शुभ्रादितरः अध्वा यस्य स सितेतराध्वा तस्य सितेतराध्वनः कृष्णवर्त्मनः, 'Of one that leaves behind a track other than white, i e. black.' 'Of one which leaves behind a black track' (i. e. of the fire). आदित्य°—Analyse आदित्यस्य मयूखाः ते इव पिङ्गलाः आदित्यमयूखपिङ्गलाः, 'Tawny like the sun's rays.' आत्मरयेण—Analyse आत्मनः रयः तेन तादृशेन, 'By his own vehemence.' तपो° —'He waved about on all sides his braided matted hair, tawny like the sun's rays, which were like the flames of the fire of his asceticism, (*lit.* going by the name of his asceticism) by the winds created by his own vehemence.'

St. 31. प्रभुः—Construe अथ भृगूणां प्रभुः जगत्सृजः परः अवतारः तद्बलं ज्वलनं वितन्वता हसेन धुन्वन् बली रामेण प्ररुध्य रुषाहृताः गिरो जगदे. भृगूणां प्रभुः—'The lord of the Bh*ri*gus.' भृगु *m.*—A vedic sage. He is one of the Prajápatis and great *R*ishis, and is regarded as the founder of the race of the Bh*ri*gus or Bhàrgavas, in which was born Jamadagni and Paras'uráma. Manu calls him son, and says that he confides to him his institutes. According to the Mahábhárata he officiated at Daksha's celebrated sacrifice, and had his beard pulled out by S'iva. The same authority also tells the following story:—"It is related of Bh*ri*gu that he rescued the sage Agastya from the tyranny of king Nahusha, who had obtained superhuman power. Bh*ri*gu crept into Agastya's hair to avoid the potent glance of Nahusha, and when that tyrant attached Agastya to his chariot and kicked him on the head to make him move, Bh*ri*gu cursed Nahusha, and he was turned into a serpent. Bh*ri*gu, on Nahusha's supplication, limited the duration of his curse." In the Padma Puráṇa it is related that the *R*ishis, assembled at a sacrifice, disputed as to which deity was best entitled to the homage of a Bráhmaṇa. Being unable to agree, they resolved to send Bh*ri*gu to test the characters of the various gods, and he accordingly went. He could not obtain access to S'iva because that deity was engaged with his wife; "finding him, therefore, to consist of the property of darkness, Bh*ri*gu sentenced him to take the form of the Linga, and pronounced that he should have no offerings presented to him, nor receive the worship of the pious and respectable. His next visit was to Brahmà, whom he beheld surrounded by sages, and so much inflated with his own importance as to treat Bh*ri*gu with great inattention, betray-

ing his being made up of foulness. The Muni therefore excluded him from the worship of Bráhmaṇas. Repairing next to Vishṇu, he found the deity asleep, and, indignant at his seeming sloth, Bh*ri*gu stamped upon his breast with his left foot and awoke him; instead of being offended, Vishṇu gently pressed the Bràhmaṇa's foot and expressed himself honoured and made happy by its contact; and Bh*ri*gu, highly pleased by his humility, and satisfied of his being impersonated goodness, proclaimed Vishṇu as the only being to be worshipped by men or gods, in which decision the Munis, upon Bh*ri*gu's report, concurred.' जगत्सृजः—Analyse जगतः सृट् जगत्सृट्-ड् तस्य तादृशस्य, 'Of the creator of the world.' तद्बलं—Analyse तस्य बलं तद्बलं, 'His (Ràma's) forces.' रुषावृताः—Analyse रुषया आवृताः रुषावृताः, 'Full of anger.' 'Replete (or foaming) with wrath.' प्रभुः—'Then the powerful lord of the Bh*ri*gus, another incarnation of Creator of the world, who was shaking his (Ráma's) forces with laughter, spreading fire, was obstructed by Ràma and addressed the following words full of anger.'

St. 32. न—Construe हे राम परशुराम अन्यं अपरं क्षितिक्षितं महीनाथमिव युधि आहवे दाशरथिं रामं जेतुं अभिभवितुं उद्यमः व्यापारः न विधीयतां न क्रियताम्। नगः गिरिः सरित्तटीपाटनपाटवस्पृशं नदीकूलोद्भेदनदर्शितकौशलं गोपतिं वृषभं प्राप्य न विशीर्यते. In writing this verse the poet probably had in his mind's eye the graphic description of Kálidàsa's Meghadûth. *Cf.* Megh. I. 2. "वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श." Also I. 56. "शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्." And R. V. 44. "निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु." क्षितिक्षितं—Analyse क्षितिं महीं क्षियति निवसतीति। अथ वा। क्षितौ क्षयति ईष्टे इति तं तादृशं, 'Ruler of the earth.' *Cf.* R. I. 11. "आसीन्महीक्षितामाद्यः." The word is derived from क्षि *vt.* 6. P. (अनिट्) 'To dwell.' 'To go.' Or it may be derived from क्षि *vi.* or *vt.* 1. P. (अनिट्) 'To exercise power.' 'To hold sway.' 'To rule.' 'To govern.' *Cf.* Páṇi. III. 2. 76. and VI. 1. 71. सरित्तटी°—Analyse सरितां तटीनां पाटने पाटवं स्पृशतीति सरित्तटीपाटनपाटवस्पृक्-श् तं तादृशं, 'Possessing (or showing) skill in throwing up or tearing asunder the banks of the rivers.' गोपतिं—Analyse गवां पतिः गोपतिः तं तादृशं, 'The lord of a herd of cows.' 'A bull.' 'An ox.' नगः, Expl:—न गच्छतीति नगः, 'A mountain.' *Cf.* अनेकार्थ, "नगः शैलो नगो द्रुमः." न—'O Paras'uràma (please), do not strive to conquer Ráma like any other king in a battle: a mountain does not fall to pieces on coming into contact with the lord of a herd of cows, who possesses skill in throwing up the banks of the rivers.'

St. 33. रघोः—Construe जगतीपतिद्विषस्तव विक्रमक्रमः इह रघोरपत्ये वृथा स्यात्। विसारिग्रसनस्थपाटवो विहंगमो दन्दशूकप्रभवे अलं न. *Cf.* R. II. 34. "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्." जगतीपति°—Analyse जगत्याः पतयः जगतीपतयः तान् द्वेष्टीति जगतीपतिद्विट्-इ तस्य तादृशस्य, 'Of the enemy of the lords of the earth.' विक्रमक्रमः—Analyse विक्रमस्य क्रमः विक्रमक्रमः, 'The actions of heroism (or bravery).' 'Brave undertakings.' विसारि°—Analyse विसारिणां मत्स्यानां ग्रसनं विसारिग्रसनम्। विसारिग्रसने तिष्ठतीति विसारिग्रसनस्थं तादृशं पाटवं यस्य सः, 'One whose cleverness (or skill) lies in swallowing fish.' विसारिन् *m.* Expl:—विसारोऽस्यास्तीति विसारी, 'A fish.' Derived from सृ with वि *vi.* or *vt.* 1. A. (अनिट्) 'To go forth or in various directions.' *Cf.* Páṇi. V. 2. 115. "अत इनि ठनौ." 'The affix इनि (इन्) and ठन् (इक्) come in the sense of मतुप् after nominal stems ending in short अ; and in the alternative मतुप् also comes.' दन्दशूकप्रभवे—Analyse दन्दशूकाणां सर्पाणां प्रभुः दन्दशूकप्रभुः तस्मै दन्दशूकप्रभवे, 'To the lord or master of serpents,' (i. e. शेष). दन्दशूक *m.*—'A serpent.' *Cf.* Medi. "दन्दशूकस्तु पुल्लिङ्गो राक्षसे च सरीसृपे." Also Hema. दन्दशूकस्तु फणिरक्षसोः." The word दन्दशूक is derived from the *Frequentative* base (यङ् लुक्) of दंश्. *Cf.* Páṇi. VII. 4. 86. "जपजभदहदशभञ्जपशां च," 'The augment नुक् comes after the reduplicate of जप्, जभ्, दह्, दश्, भञ्ज्, and पश् in the Frequentative (with or without यङ्).' As दंदश्यते and दंदशीति. And Páṇi. III. 2. 166. "यजजपदशां यङः," 'The affix ऊक comes in the sense of "the agent having such a habit &c," after the verbs यज्, जप् and दश् when they end in the affix यङ्.' The Frequentative of these verbs take ऊक्. As यायजूकः 'a performer of frequent sacrifices;' जञ्जपूकः 'a mutterer of prayers repeatedly;' दन्दशूकः 'a snake (what bites frequently).' रघोः—'The brave undertaking of yours, who are the enemy of the lords of the earth (क्षत्रिय race), would be fruitless here in the case of the scion of the Raghus.' 'A bird whose cleverness lies in swallowing fish can do nothing to the lord of serpents' (*lit.* is not a match for the lord of serpents).

St. 34. तव—Construe धनुषः प्रयोगे तव अनुशासितुः भूधरधन्वनः शरासने परं इतः प्रवृत्ताऽपि विपत् त्वदीयश्रवणस्य गोचरं नगं आगता. *Cf.* Pushpadanta's Mahimna 18. "रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो। रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिः। विधेयैः क्रीडन्त्यो न खलु परतंत्राः प्रभुधियः." शरासने—Analyse शराः अस्यन्ते अनेनेति शरासनं तस्मिन् तादृशे, 'About the bow.' भूधर°—Analyse धरतीति धरः। भुवः धरः भूधरः। भूधरो हिमालयः एव धनुर्यस्य स भूधरधन्वा तस्य तादृशस्य or भूधरः धन्व चापः यस्य

स भूधरधन्वा तस्य तादृशस्य, 'Of him having his bow made of the mountain Himàlaya.' परं *ind.*—' Deliberately.' Or it may also mean अत्यन्तं, अतिशयं, 'Exceedingly.' 'Eminenly.' इतः = अस्मत्तः, 'From me.' त्वदीय°—Analyse त्वदीयस्य श्रवणं त्वदीयश्रवणं तस्य तादृशस्य, 'To the ear.' गोचरम्—Analyse गावः इन्द्रियाणि चरन्त्येषु गोचरम्, 'Into the range of the organs of sense.' *Cf.* Pàṇi. III. 3. 119. "गोचरसंचरवहव्रजव्याजापणनिगमाश्च," 'The words 'गोचर,' 'संचर,' 'वह,' 'व्रज,' 'व्याज,' 'आपण,' and 'निगम' are anomalous.' These words are irregularly formed by the affix घ with the same force as in the last aphorism. This is an अपवाद or exception to rule III. 3. 121. by which after roots ending in consonants, the affix घञ् is added.' Thus गोचरः 'pasturage,' (*lit.* that in which the cows graze) &c. तव—' Has the accident, though deliberately done by me, to the bow of the god S'iva (*lit.* who holds a bow made of the mountain Himálaya), your tutor in giving you instructions (or practice) in archery probably (or perhaps) come to your ears ?'

St. 35. निशम्य—Construe तस्य इत्येतद् ईरितं वचो निशम्य स पिनाकिनः शिष्यः परस्य यशसो वृद्धिं वितन्वतीं धनुषो भिदां वृथा विधित्सन् पुनरिदं जगाद. पिनाकिनः, Expl :—पिनाकोऽस्यास्तीति पिनाकी तस्य पिनाकिनः, 'Of the wielder of Pinàka or trident,' (*i. e.* S'iva's club or bow). वृथा विधित्सन्—' Wishing to make light of.' 'Wishing to despise.' धनुषो भिदां—' Breaking of the bow.' निशम्य—' Hearing that speech thus delivered (or spoken) by him, the disciple of the trident-bearing god, wishing to make light of the breaking of the bow, which was heightening the fame of the other (Ráma) answered thus.'

St. 36. नवेश्वर—Construe [हे] नवेश्वर पुरा वन्ध्येतरबाणपातनं स्तब्धतरं धनुर्द्वयं विधाय विश्वकर्मणा पुरन्दराख्याय विशामधीशे व्यतीर्यत किल. नवेश्वर—Analyse नवश्चासौ ईश्वरश्च नवेश्वरः तत्संबुद्धिः नवेश्वर, 'O new king.' स्तब्धतरं *adj.*—' Harder.' 'More stiff.' धनुर्द्वयं—Analyse धनुषोर्द्वयं धनुर्द्वयं, 'A pair of bows.' The Ràmàyaṇa gives the following legend in the mouth of Paras'uráma :—" These two foremost of bows, extraordinary, and worshipped of all the worlds, and stout, and powerful, surpassingly excellent, were constructed with care by विश्वकर्मा. And, one of these, O foremost of men, for the destruction of त्रिपुर, the celestials gave unto त्र्यम्बक, desirous of encounter,—even that which, O काकुत्स्थ, thou hast snapped. And this second, which is irrepressible, was given to विष्णु, by the chiefs of the celestials. And, O Ràma, this bow belonging unto Vishṇu, capable of conquering hostile cities, is, O काकुत्स्थ, equal in energy unto the bow

belonging unto Rudra. Once on a time the deities, with the object of ascertaining the respective prowess of विष्णु and the blue-throated one, asked the great father, about it. Thereupon the great father, foremost of those abiding by truth—reading the intention of the deities, fomented a quarrel between them. And upon that quarrel breaking out among the deities, there took place a mighty contest capable of making one's hair stand on end, between विष्णु and the blue-throated one, each burning to beat the other down. Then on विष्णु uttering a roar, S'iva's bow to dreadful prowess became flaccid. And thereupon the three-eyed महादेव became moveless. And upon the assembled gods with the saints and the Châraṇas beseeching these two foremost of celestials, they became pacified. And upon beholding that bow of शिव rendered flaccid by Vishṇu's prowess, the deities with the saints acknowledged विष्णु as the more powerful. And the enraged Rudra of high fame made over the bow along with its shafts unto the hands of Râjar*shi* Devarâta of Videha. And, O Ràma, this bow belonging to विष्णु, capable of conquering hostile cities, विष्णु consigned to Bh*ri*gu's son, ऋचीक, as a worthy trust. And the exceedingly energetic ऋचीक, made over the divine bow unto his son of immeasurabe prowess, my sire the high souled son of जमदग्नि. And once on a time, on my sire surcharged with ascetic energy, renouncing the bow, Arjuna, under the influence of unrighteous sentiment, compassed the death of my father. Thereupon, learning of tho lamentable and untoward slaughter of my sire, I from ire, annihilated the Kshatriyas, springing up afresh by numbers, then bringing under sway the whole earth, I, O Ràma, on the sacrifice being over, conferred it upon the righteous काश्यप as दक्षिणा. Having made this gift, I was dwelling in the Mahendra hill equipped with ascetic energy, when, hearing of thy snapping of the bow, I have speedily come hither. Do thou now, O Ràma, agreeably to the cannon of the क्षत्रिय morality, take this excellent and mighty bow of Vishṇu, that had belonged to my father and grand-father. And do thou set upon this best of bows an arrow capable of conquering hostile cities. And, O काकुत्स्थ, if thou succeed, I shall then offer thee combat." वन्ध्येतर"—Analyse वन्ध्याद् इतरद् वन्ध्येतरत् । बाणानां पातनं बाणपातनम् । वन्ध्येतरद् बाणपातनं यस्य तद् वन्ध्येतरबाणपातनं, 'Having the descent of arrows other than fruitless,' (i. e. effective, effi-

cacious). विश्वकर्मा, The architect of the gods. His daughter संज्ञा was married to the sun but, as she was unable to endure his effulgence, the divine architect placed the sun upon his lathe and cut off a part of his lustre which he used in making the discus of विष्णु, the trident of शिव and the weapons of other gods. विशामधीशे—'To the lord of the gods.' विश् (द्-ड्) *m.*—' Name of any class of gods designated by troops.' 'The gods.' पुरन्दराख्याय—Analyse पुरं दारयतीति पुरन्दरः । पुरन्दरः आख्या यस्य स पुरन्दराख्यः तस्मै पुरन्दराख्याय, 'To him bearing the name of Purandara.' 'Known by the epithet of पुरन्दर.' नवेश्वर—' Formerly, O new king, it is said that विश्वकर्मा, the architect of the gods, prepared a pair of very strong bows, displaying an efficacious descent of arrows and handed it over to the lord of the gods, known by the epithet of पुरन्दर. '

St. 37. विसृज्य—Construe अथ त्रिदशाधिपेन तयोः पूर्वं धनुः रथाङ्गधारिणे दनुजारये विसृज्य तथा एकं तद्धनुः त्रिपुरं दिधक्षते त्रिलोचनाय अदायि. दनुजारये—Analyse दनोः जाताः दनुजाः दैत्याः तेषां अरिः दनुजारिर्विष्णुः तस्मै तादृशे, 'To the enemy of the sons of Danu ' (i. e. to the enemy of Daityas). दनु *f.*—One of thu wives of कश्यप, the mother of the Dānavas. रथाङ्ग°—Analyse रथस्य अङ्गं रथाङ्गम् । रथाङ्गं चक्रं धारयतीति रथाङ्गधारी तस्मै तादृशे, 'To the holder of discus,' (i. e. to विष्णु). त्रिपुरं—Analyse त्रयाणां पुराणां समाहारः त्रिपुरं, 'The triple city.' 'The three cities of gold, silver and iron erected by the demon मय and burnt down by शिव.' *Cf* त्रिपुरदहनः. त्रिलोचनाय Analyse त्रीणि लोचनानि यस्य स त्रिलोचनः तस्मै त्रिलोचनाय, 'To the three-eyed god.' *Cf.* त्र्यम्बकः. त्रिदशाधिपेन—Analyse त्रिदशानां अधिपः त्रिदशाधिपः तेन, 'By the lord of the thrice-ten,' (i. e. by Indra). अथ—Then the lord of the gods gave the first of these bows to the enemy of Danus (i. e. to Vishṇu) the bearer of the discus and the other one to the thee-eyed god (i. e. S'iva), who wished to burn the three cities.'

St. 38. विवित्सया—Construe मरुत्पतिः तद्गतजन्यतेजसः विवित्सया तथा यत्नेन व्यधत्त यथा अजय्यशक्त्योः अजयोः हव्यवहोग्रतेजसोः आहवः अजायत. विवित्सया, Expl:—वेत्तुमिच्छा विवित्सा तया तादृश्या, 'Wishing to know or understand' तद्गतजन्य°—Analyse जन्यं च तत् तेजश्च जन्यतेजः । तद्गतं जन्यतेजः तद्गतजन्यतेजः तस्य तादृशस्य, 'Of the power produced by what belonged to it.' 'Of the prowess arising from what belonged to it.' मरुत्पतिः—Analyse मरुतां पतिः मरुत्पतिः, 'The lord of the Maruts' (i. e. Indra). हव्य°—Analyse हव्यानि उह्यन्ते यस्मै स हव्यवहो विष्णुः । उग्रं तेजो यस्य स उग्रतेजाः शिवः । हव्यवहश्च उग्रतेजाश्च हव्यवहोग्रतेजसौ तयोः तादृश्योः, 'Between विष्णु

(*lit.* to whom offerings are carried) and शिव (*lit.* of terrible energy). The compound may also be analysed as, हव्यवहः इव उग्रं तेजः ययोः तयोः तादृशोः, 'Of those possessing a formidable (or terrible) energy (or might) like fire.' अजय्य°—Analyse जेतुमशक्या अजय्या । अजय्या शक्तिः ययोस्तौ अजय्यशक्ती तयोः अजय्यशक्त्योः, 'Of unconquerable might (or prowess).' शक्तिः or शक्ती—' Energy, ' might, ' ' prowess.' अजयोः, Expl:—न जायेते । अजतो वा । इति अजौ तयोः अजयोः, 'Of the unborn.' *Cf.* Pàṇi. III. 2. 101. Derived from जन् (जा) *vi.* 4. A. (सेट्) ' To be born.' Or from अज् *vt.* or *vi.* 1. P. (सेट्) ' To throw.' ' To cast.' *Cf.* Vis'va, "अजो हरौ हरे कामे विधौ छागे रघोः सुते" । विवित्सया—' With a view (*lit.* a wish) to know the power produced by what belonged to it, the lord of the Maruts made such efforts as brought forth a struggle (or war) between विष्णु, the receiver of oblations and शिव, the possessor of terrible energy, both of whom were unborn and of unconquerable might.'

St. 39. चकार—Construe देवयोर्युगं चक्रादि विहाय महेष्वासयुगेन पत्रिभिः दश दिशोऽपि प्रतिरुध्य समेतसाहसं संयुगं सहस्राणि समाः चकार. महेष्वास°—Analyse महान् मनोहारी इषूणां शराणां आसः क्षेपः यस्य स महेष्वासः तस्य युगं तेन महेष्वासयुगेन, 'By a pair of mighty bowmen.' 'By a pair of powerful champions.' Derived from इष् *vt.* 1. A. (सेट्) ' To go.' ' To kill.' ' To see.' And अस् *vt.* 4. P. (सेट्) ' To throw.' *Cf.* निरुक्त, "महेष्वासः स विज्ञेयश्चण्डकोदण्डमण्डितः." But here the expression appears to be in the sense of ' a pair of mighty bows.' Analyse इषवः अस्यन्ते अस्मादिति इष्वासः महांश्चासौ इष्वासश्च महेष्वासः तस्य युगं तेन तादृशेन. धनुर्युग्मेन. समाः *f. plu.* (though *sing.* in sense) ' A year.' *Vide* K. G. Oka's ' Companion to Sanskrit Grammar,' p. 23. समेतसाहसं—Analyse सहसा बले भवं साहसम् । समेतं साहसं यस्मिन् स समेतसाहसः तं तादृशं, 'Full of adventures.' *Cf.* Pàṇi. IV. 3. 53. चकार—'Then that pair of the deities left the discus and other weapons and made a war, full of adventures, with two mighty bows, for thousands of years, obstructing even the ten quarters with their arrows.'

St. 40. अथो—Construe अथो यद् मृदुभूतं चापं त्वया विकृष्टं अभेदि च तद् ईश्वरः ससर्ज । यच्च अक्षतं वैष्णवं धनुः ऋचीकाय वितीर्णं तत् क्रमेण मम हस्तं अगात्. ऋचीक *m.*—A *Rishi* descended from भृगु and husband of सत्यवती, son of ऊर्व and father of जमदग्नि. In the Mahábhàrata and Vishṇu Puráṇa it is related that ऋचीक was an old man when he demanded सत्यवती, the daughter of Gàdhi, king of कान्यकुब्ज. Unwilling to give her to so old a man, Gádhi demanded of him 1000 white

horses, each of them having one black ear. *Richika* obtained these from the god Varuṇa, and so gained his wife. According to the रामायण, he sold his son सुनःशेपम् to be a sacrifice. अक्षतं—Analyse न क्षतं अक्षतं, 'Not impaired.' वैष्णवं, Expl:—विष्णोः इदं वैष्णवं, 'Belonging to Vishṇu.' *Cf.* Pāṇi. IV. 3. 121. "तस्येदम्," 'After a word in the 6th case in construction, an affix (IV. I. 13 &c.) comes in the sense of 'this is his.' The five universal अण् &c. (IV 1. 83) and the affixes घ &c. (IV. 2. 93.) come in this sense. Thus उपगोरिदम्= औपगवम्, 'of Upagu.' कापटवम्, राष्ट्रियम्, अवारपारीणम् ॥ The affixes, however, do not come when the word governed by the possessive case is अनन्तर &c. thus देवदत्तस्यानन्तरम् ॥ In short the thing possessed must be property, village, kingdom or men. अथो—Then the god शिव abandoned that flaccid bow which you had exceedingly drawn and broken; but that unimpaired bow of विष्णु, which was given to the sage ऋचीक, came to my hand in due course (of time).'

St. 41. गुणौ--Construe अस्य [विष्णोर्धनुषः] उभौ गुणौ [स्तः] । दृढता इति विश्रुतः तयोरेकः जगच्छ्रुतिं न जहाति । ज्या इति निरूढिमागतः [प्रसिद्धिं गतः] परः गुणः असंशयं ममैव श्रवणान्तगोचरः [अस्ति]. जगच्छ्रुतिं—Analyse जगतां श्रुतिः जगच्छ्रुतिः तां तादृशीं, 'Universal ear.' 'Hearing of the universe.' असंशयं—Analyse संशयस्याभावोऽसंशयं, 'Undoubtedly.' 'Without any doubt.' निरूढिमागतः—'Has become celebrated.' 'Has attained fame.' *Cf.* Kir. II. 6. "चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता." श्रवणान्त°—Analyse श्रवणस्य अन्तः श्रवणान्तः तस्य गोचरः श्रवणान्तगोचरः, 'Accessible to (or visible at) the end of my ears.' 'Come into the range of my hearing.' गुणौ—'This bow of विष्णु has two Guṇas—a merit and the string. One of which viz. the merit known by the name of firmness (or strength) does not leave the universal ear. But the other Guṇa celebrated by the name of 'string' has, without any doubt, come only into the range of my ears (i. e. within my hearing).'

St. 42. अपाङ्ग°—Construe अपाङ्गभागावधि चापपूरणं सुदुष्करं [तद्] विष्णुगोचरं तिष्ठतु । यदि त्वं इह गुणं जिह्मतां प्रापयसि ततः बलोपपन्नेषु अग्रणीः. अपाङ्ग°—Analyse अपाङ्गस्य भागः अपाङ्गभागः स एव अवधिर्यस्य तद् अपाङ्गभागावधि, 'Reaching as far as the hollow of the outer corner of an eye.' अपाङ्गः, Expl:—अपाङ्गतीति अपाङ्गः, 'An outer corner of the eye.' Or अपकृष्टोऽङ्गाद्वा । अपकृष्टान्यङ्गान्यस्माद्वा । Derived from अग् *vt.* I. P. (सेट) 'To move tortuously.' 'To go.' *Cf.* Vis'va. "अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते

तिलकेऽपि च "। चापपूरणं—Analyse चापस्य पूरणं चापपूरणं, 'Drawing in of the bow.' Stretching of the bow.' सुदुष्करं—Analyse सुष्ठु दुष्करं सुदुष्करं 'Very difficult to accomplish.' विष्णुगोचरं—Analyse विष्णोः गोचरं विष्णुगोचरं, 'Within the power of विष्णु.' 'Can be accomplished by विष्णु ' जिह्मता *f.*—' Act of bending down.' बलोपपन्नेषु—Analyse बलेन उपपन्नाः बलोपपन्नाः तेषु तादृशेषु, 'Of those endowed with strength.' 'Of the powerful.' अग्रणीः—Analyse अग्रं नयतीति अग्रणीः, 'A leader.' *Cf.* Páṇi. III. 2. 61. "सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्," 'The affix क्विप comes after the following verbs when in composition with a word ending in an affix, though it may be an उपसर्ग, viz. सत् 'to sit;' सू 'to bring forth;' द्विष् 'to hate;' द्रुह् 'to bear malice;' दुह् to milk;' युज् 'to join;' 'to concentrate the mind;' विद् 'to know,' to become,' 'to consider;' भिद् 'to divide;' छिद् 'to cut';' जि 'to conquer;' नी 'to lead;' and राज् to shine.' And the वार्तिक thereto, "अग्रग्रामाभ्यां नयतेणा वाच्यः," 'The ending न of the root नी is changed to ण when preceded by अग्र and ग्राम.' अपाङ्ग°—'The bending (or drawing in) of the bow as far as the end of the outer-corner of an eye is very difficult and can (easily) be accomplished by विष्णु (*lit.* let it rest in the power of विष्णु). If you only bend the string of this bow, you will be (acknowledged to be) the leader of the powerful.'

St. 43. निधाय—Construe इह धनुषि बाणं निधाय [त्वया] पूरिते [सति] स्वहस्तेन एष वधः तव सत्क्रिया। इति ईरयित्वा भूपतेः तनयस्य हस्ते सशरं शरासनं मुमोच. स्वहस्तेन—Analyse स्वस्य हस्तः स्वहस्तः तेन तादृशेन, 'At my own hand.' सत्क्रिया—Analyse सती चासौ क्रिया च सत्क्रिया, 'A mark of homage or honor.' 'A reverential mark or sign of homage.' भूपतेः—Analyse भुवः पतिः भूपतिः तस्य तादृशस्य, 'Of the lord of the earth.' सशरं—Analyse शरेण सह सशरं, 'Equipped with an arrow.' शरासनं—Analyse शराः अस्यन्ते क्षिप्यन्ते अनेनेति शरासनं, 'A bow.' निधाय—'The arrow being placed on this bow, if it be fully drawn by you, you will get the (rare) honour of death at my hands. Having said so he passed the bow equipped with an arrow into the hand of the son of the lord of the earth.'

St. 44. ततः—Construe ततः स दशकण्ठसूदनः शून्यां मुष्टिमिव अपाङ्गदेशं आनयन् अविज्ञातविकर्षणश्रमः [सन्] गुञ्जद्गुणबन्धनं धनुः बलात् चकर्ष. अपाङ्गदेशं–Analyse अपाङ्गस्य देशः अपाङ्गदेशः तं तादृशं, 'To the region of the outer corner of an eye.' दशकण्ठसूदनः Analyse—सूदयतीति सूदनः। दशकण्ठस्य सूदनः दशकण्ठसूदनः, 'The killer of the ten-necked demon' (i. e.

Râvaṇa). अविज्ञात°—Analyse अविज्ञातः विकर्षणस्य श्रमो यस्मै स अविज्ञात-विकर्षणश्रमः, 'Feeling no efforts of stretching.' 'Felt no efforts of drawing in.' गुञ्जद्गुण°-Analyse गुञ्जन् यो गुणः गुञ्जद्गुणः तस्य बन्धनं यस्य तत्, 'The tying of the string of which was making a twanging noise.' ततः—'The killer of the ten-necked demon taking, as it were, an empty fist to the region of the corner of his eye, feeling no efforts of stretching, stretched forcibly the bow, the tying of the string of which made a twanging noise.'

St. 45. सं—Construe अथ तेन मुक्तः स सायकः दिवः पदं वाञ्छतः तपस्य-द्वृषभस्य द्वितीयवर्णस्य आत्मनः निहन्तुः नीशारं विधाय व्यतिष्ठत किल. *Cf.* R. XI. 88. "प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् । भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः." तपस्यद्वृषभस्य—Analyse तपः चरन्तीति तपस्यन्तः तेषु वृषभः तपस्यद्वृषभः तस्य तादृशस्य, 'To the best of those who practise (or intend to practise) religions austerities.' *Cf.* Pâṇi. III. 1. 15. "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः," 'The affix क्यङ् is employed after the words, रोमन्थ 'ruminating,' and तपस् 'austerity, when they are used as the objects of the action of repeating and performing respectively.' *Vide* वार्तिक "तपसः परस्मैपदं च." द्वितीय°—Analyse द्वितीयः वर्णो यस्य स द्वितीयवर्णः तस्य तादृशस्य, 'Of one belonging to the second order (or caste).' नीशारः, Expl:—नितरां शीर्यते हिमानिलावत्र अनेन वा इति नीशारः, 'A curtain.' 'An outer tent (or screen).' 'A blanket.' 'A warm cloth or outer garment.' Derived from शॄ *vt.* 9. P. (सेट्) 'To tear asunder.' 'To kill.' *Cf.* Pâṇi. III. 3. 21. and the Vârtika thereto, "शॄ वायुवर्णनिवृत्तेषु," 'The affix घञ् comes after the root शॄ when the word so formed means 'wind,' 'colour,' or 'cessation.' As शारः 'wind,' 'green colour &c.' *Cf.* also Pâṇi. VI. 3. 122. "उपसर्गस्य घञ्यमनुष्ये बहुलम्," 'The final vowel of a preposition is diversely lengthened before a word formed by the कृत् affix घञ्, but not when the compound denotes a human being.' As नीशारः. स—'Then it is said that the arrow discharged by him became a screen to the best of ascetics, desirous of a place in heaven, who wanted to kill him who belonged to the second order, and stood apart.'

St. 46. रिपोः—Construe अजय्यस्य रिपोः जयेन मानवैः बहुमानमन्त्रणैः सभाज्यमानः स मैथिलीसखः पथि मनोज्ञवासे कतिचिद्दिनानि सुखेन नीत्वा [तां पुरीं विवेशेति उत्तरेणान्वयः]. अजय्यस्य—Analyse जेतुमशक्यः अजय्यः तस्य तादृशस्य, 'Of one difficult to be conquered.' *Cf.* Pâṇi. VI. 1. 81. "क्षय्य-जय्यौ शक्यार्थे," 'In क्षय्य and जय्य there is the substitution of अय्

for ए only then when the sense is that of "to be possible to do." सभाज्यमानः *Pres. Parti.*—'One who is congratulated upon.' 'Being respected (or lauded).' Derived from सभाज् *vt.* 10. U. (सेट्) 'To congratulate.' 'To honor.' बहु°—Analyse बहुश्चासौ मानश्च बहुमानः तस्य मन्त्रणानि तैः तादृशैः, 'With many congratulatory addresses.' 'With many addresses of honour.' मनोज्ञ°—Analyse मनोज्ञश्चासौ वासश्च मनोज्ञवासः तस्मिन् तादृशे, 'In a charming place.' मैथिलीसखः—Analyse मिथिलस्य गोत्रापत्यं स्त्री मैथिली तस्याः सखा मैथिलीसखः, 'The lord of the daughter of मिथिल king.' *Cf.* Pàṇi. V. 4. 91. "राजाहस्सखिभ्यष्टच्," 'The affix टच् is added to the words राजन् अहन् and सखि, when they stand at the end of तत्पुरुष compound.' This and the next five verses form a कुलक. For the definition &c. see our notes on II. 2. रिपोः—'The lord (*lit.* the loving-friend) of the daughter of the Mithila king, congratulated by the people with many addresses of honour, upon his victory over an unconquerable foe, spent some days happily on the road, where it was pleasant to stay.'

St. 47. व्यपावृत°—Construe व्यपावृतद्वारमुखेन भूम्ना बलेन सन्ततं विशता कुम्भजन्मनः तनुमिव उदग्रनिस्वनं उदन्वन्तं पिबन्तीं कृतध्वनिं पुरीं [विवेशेत्युत्तरेणान्वयः]. व्यपा°—Analyse व्यपावृतं उद्घाटितं यद्वारं तदेव मुखं यस्य तत् तेन तादृशेन, 'Having an entrance of the door which was flung open.' कृत°—Analyse कृतो ध्वनिः यस्यां सा कृतध्वनिः तां तादृशीं, 'The noise in which was made.' उदन्वन्तं—'To the ocean.' *Cf.* Pàṇi. VIII. 2. 13. "उदन्वानुदधौ च," 'The word उदन्वान् is irregularly formed, in the sense of "a sea." It is derived from उदक 'water' with the affix मत् ॥ उदन्वान् is the name of a *Rishi*, because he controlled the rains; it rained at his command. It also means ocean or that in which water is held, like तटाक &c. उदग्रनिस्वनं—Analyse उदग्रः निस्वनः यस्य स उदग्रनिस्वनः तं तादृशं, 'Of a terrible roar.' कुम्भजन्मनः=अगस्त्यस्य, 'Of the sage अगस्त्य (*lit.* of the pitcher-born sage). व्यपावृत°—'(He entered) the city which was noisy on account of the innumerable troops that were seeking entrance constantly through the opened doors, as if it were the body of the sage Agastya which drank up the ocean which was terribly roaring.'

St. 48. नरेन्द्र°—Construe नरेन्द्ररथ्योभयभागचारितप्रसारिकालागुरुधूपवासितां अनन्तैः सपङ्कजाष्टापदकुम्भमण्डलैः उपरत्नतोरणं ततां [तां पुरीं विवेशेत्युत्तरेणान्वयः]. नरेन्द्र°—Analyse नराणां इन्द्रः नरेन्द्रः तस्य रथ्यायाः उभयभागयोः चारितः अत एव प्रसारी कालागुरोः धूपः तेन वासिता तां तादृशीं, 'Perfumed with the incense of the black aloe-wood which was spreading

having been moved on both the sides of the king's high-road.' उपरत्नतोरणं *adv.*—Analyse रमन्ते एष्विति रत्नानि । रत्नानां तोरणानि रत्नतोरणानि । रत्नतोरणानां समीपे उपरत्नतोरणं, 'In the vicinity of jewelled-arches.' सपङ्क°—Analyse अष्टापदस्य सुवर्णस्य कुम्भाः तेषां मण्डलानि अष्टापदकुम्भमण्डलानि । पङ्कजैः कमलैः सहितानि अष्टापदकुम्भमण्डलानि सपङ्कजाष्टापदकुम्भमण्डलानि तैः तादृशैः, 'With groups of golden-pitchers having lotuses in them.' नरेन्द्र°—'(He entered the city) which was perfumed with the incense of the black agallochum, which was spreading, having been moved on both the sides of king's high road and which was packed in the vicinity of jewelled-arches, with numberless groups of golden pitchers having lotuses in them.'

St. 49. परिक्वणत्°—Construe सुगन्धिना गन्धवहेन ताडितैः परिक्वणत्काञ्चनकिङ्किणीगुणः भ्रमत्पताकानिकरैः उदर्चिषः उष्णघृणेः करच्छिदां वितन्वतीं [तां पुरीं विवेशेत्युत्तरेण संबन्धः]. परिक्वणत्°—Analyse परिक्वणन्त्यः काञ्चनस्य किङ्किण्यः तासां गुणाः येषु ते तैः तादृशैः, 'Having strings of sounding golden-bells.' सुगन्धिना—Analyse शोभनः गन्धो यस्य स सुगन्धिः तेन तादृशेन, 'Possessing sweet smell (or scent).' गन्धवहेन—Analyse वहतीति वहः । गन्धस्य वहः गन्धवहः तेन गन्धवहेन, 'By the wind.' 'By a breeze.' *Cf.* Vis'va, "गन्धवहा तु नासायां वायौ गन्धवहो मतः." Also Hema. "गन्धवहो मृगेऽनिले । गन्धवहा तु नासायां." And Medi. "स्याद्गन्धवहा नासायां पुंल्लिङ्गो मातरिश्वनि." भ्रमत्°—Analyse भ्रमन्त्यः याः पताकाः तासां निकराः समूहाः तैः तादृशैः, 'With numbers of fluttering flags.' उदर्चिषः, Expl :—उद्गतानि अर्चींषि यस्य स तस्य तादृशस्य, 'Blazing.' 'Up-flaring.' 'Luminous.' उष्णघृणेः—Analyse उष्णाः घृणयः किरणाः यस्य स उष्णघृणिः रविः तस्य तादृशस्य, 'Of the hot-rayed luminary.' 'Of the sun.' करच्छिदां—Analyse कराणां छिदा करच्छिदा तां तादृशीं, 'Cutting or dividing the rays.' परिक्वणत्°—"(He entered the city) which cut short the rays of the blazing sun, with numbers of its fluttering flags, flapped by the fragrant breeze and having strings of sounding golden-bells.'

St. 50. मधु—Construe मधुव्रतव्रातविरावकिङ्किणीरुतेन रम्यं अनिलस्य रंहसा धुतं [अत एव] पताकाङ्कुतानि बिभ्रतं मणितोरणस्रजां चयं दधानां [तां पुरीं विवेशेत्युत्तरेणान्वयः]. मधु°—Analyse मधु व्रतं भक्ष्यं येषां ते मधुव्रताः तेषां व्राताः समूहाः मधुव्रतव्राताः । किङ्किणीनां रुतं किङ्किणीरुतम् । मधुव्रतव्रातानां विरावः एव किङ्किणीरुतं मधुव्रतव्रातविरावकिङ्किणीरुतं तेन तादृशेन, 'By reason of (or on account of) the sound of bells consisting of the humming of the rows (or clusters) of bees.' मणि°—Analyse मणीनां तोरणानि मणितोरणानि तेषां स्रजः तासां, 'Of the garlands (hanging) on the jewelled-arches.' रंहसा=तरसा, Expl :—रमते अनेनेति रंहः तेन रंहसा,

' By the force. ' Derived from रम् *vi.* I. A. (अनिट्) ' To remain.' ' To stay. ' ' To pause. ' ' To sport. ' *Cf.* Uṇâdisûtra " रमेश्च " इत्युन् हुगागमश्च. Or रंहत्यनेन वा रंहः. Dhâtupradîpa derives it from the root रह् (रंह्) *vt.* 1. P. (सेट्) ' To go. ' ' To move, ' with असुन्. *Cf.* Uṇâdisûtra "सर्वधातुभ्योऽसुन्." पताकानुकृतानि—Analyse पताकानां अनुकृतानि पताकानुकृतानि तानि, 'The resemblance of flags.' 'Imitations of flags. ' मधु°—(' He entered the city) having a row of garlands on the jewelled-arches, charming on account of the sound of bells consisting of the humming of the clusters of bees and bearing the resemblance of flags being shaken by the force of the wind.'

St. 51. विवेश—Construe स नरेन्द्रसूनुः मुहुः अञ्जलिबद्धसंपदा मुखेन्दोरुदयेन सर्वतः जनस्य हस्तारुणपङ्कजानि मुकुलानि कल्पयन् तां [पुरीं] विवेश. अञ्जलि°—Analyse अञ्जलिभिः बद्धा संपद् शोभा यस्मिन् स तेन तादृशेन, 'Which had its beauty formed by the folded hands.' ' Which had its beauty composed of the folds of hands.' मुखेन्दोः—Analyse मुखं इन्दुरिव मुखेन्दुः तस्य तादृशस्य, 'Of the face-moon.' नरेन्द्रसूनुः—Analyse नराणां इन्द्रः नरेन्द्रः तस्य सूनुः नरेन्द्रसूनुः, 'The scion of the lord of people.' हस्तारुणपङ्कजानि—Analyse पङ्के जातानि पङ्कजानि । अरुणानि रक्तानि च पङ्कजानि च अरुणपङ्कजानि । हस्ताः एव अरुणपङ्कजानि हस्तारुणपङ्कजानि, ' The red-lotuses consisting of the hands of the citizens.' Translate:— ' That scion of the lord of people entered the city making everywhere the buds of the red-lotuses consisting of the hands of the citizens by the rise of his moon-like face, which had, for a moment (मुहुः), its beauty formed by the folded-hands.'

St. 52. गुरून्—Construe अङ्गनाः गुरून् अपृष्ट्वैव कुमारं ईक्षितुं वातायनं जवेन ईयुः । ताः सत्यो न इति न । न च मूढवृत्तयः । हि [यस्मात् कारणात्] रघोः वंशस्य विनीतता तथा. *Cf.* R. VII. 5. " ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु । बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि." Also *Cf.* Buddha-Charita III. 13. " ततः कुमारः खलु गच्छतीति श्रुत्वा स्त्रियः प्रेष्यजनात्प्रवृत्तिम् । दिदृक्षया हर्म्यतलानि जग्मुः जनेन मान्येन कृताभ्यनुज्ञाः." कुमारं— ' To the prince.' Derived from कुमार *vi.* 10. U. (सेट्) ' To play.' मूढवृत्तयः—Analyse मूढा वृत्तिर्यासां ताः मूढवृत्तयः, ' Of silly-mind.' ' Silly-minded.' Translate:—' The ladies sped to the windows to have a look at the prince, without asking the permission of their elders.' ' It in not that they were neither virtuous nor silly but such was modesty of the race of the Raghus.'

St. 53. रराज—Construe विलोलनेत्रैः वनितामुखाम्बुजैर्वृता वातायनसन्ततिः विनीलोत्पलपत्रसम्पदा तता तिर्यग् व्यवस्थिता सरोजिनीव रराज. *Cf.* R.

VII. 11. and Ku. VII. 62. " तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् । विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्." Also Buddha-Charita III. 19. वातायनेभ्यस्तु विनिःसृतानि परस्परोपासितकुण्डलानि । स्त्रीणां विरेजुर्मुखपङ्कजानि सक्तानि हर्म्येष्विव पङ्कजानि." वातायन°—Analyse वातायनानां सन्ततिः वातायनसन्ततिः, ' A line of windows.' विलोल°—Analyse विलोलानि नेत्राणि येषां तानि तैः तादृशैः, ' Having unsteady (or rolling) eyes.' ' With swimming eyes.' वनिता°—Analyse मुखान्येव अम्बुजानि कमलानि मुखाम्बुजानि । वनितानां मुखाम्बुजानि वनितामुखाम्बुजानि तैः तादृशैः, 'By lotus-like faces of the ladies.' 'With face-lotuses of ladies.' विनीलोत्पल°—Analyse विशेषेण नीलानि विनीलानि । विनीलानि च तानि उत्पलानि च विनीलोत्पलानि तेषां पत्राणां सम्पद् तया तादृश्या, ' With an exuberance of dark (or blue) lotus-leaves.' सरोजिनी *f.* Expl:—प्रशस्तानि सरोजानि सन्त्यस्याम्, ' A pond abounding in lotuses.' ' A multitude of lotuses.' रराज—' The line of windows, covered with (or full of) the lotus-like faces of the ladies, having unsteady eyes, shone like a bed of lotuses, laid down horizontally, marked with an exuberance of dark lotus-leaves.'

St. 54. दधौ—Construe नितम्बिनीनां जालगवाक्षसङ्गिनी चलदृष्टिसन्ततिः पङ्केरुहनालजालके तता परिस्फुरन्ती शफरीपरम्परा इव द्युतिं दधौ. *Cf.* Megh. I. 44. " चटुलशफरोद्वर्तनप्रेक्षितानि." Also Kir. VI. 16. " शफरीपरिस्फुरितचारुदृशः." जाल°—Analyse जालैर्युताः गवाक्षाः जालगवाक्षाः तेषु सङ्गिनी जालगवाक्षसङ्गिनी, ' Fixed in the lattice-windows.' नितम्बिनीनां, Expl:—प्रशस्ताः । अतिशयिताः वा । नितम्बाः सन्ति यासां ताः नितम्बिन्यः तासां नितम्बिनीनां, ' Ladies with large and handsome hips.' चल°—Analyse चलाश्च ताः दृष्टयश्च चलदृष्टयः तासां सन्ततिः चलदृष्टिसन्ततिः, ' A row of the swimming eyes.' पङ्के°—Analyse पङ्के रोहन्तीति पङ्केरुहः तेषां नालानां जालकं तस्मिन् तादृशे, ' On the not of the lotus-stalks.' ' On the cluster of lotus-stalks.' शफरी°—Analyse शफं रान्तीति शफर्यः । तासां परम्परा शफरीपरम्परा, ' A multitude of fish.' ' A line of fish.' शफरी (शफरः)—' A kind of small glittering fish.' The शफर is described, observes Wilson, as a small white glistening fish; which darting rapidly through the water, is not unaptly compared to the twinkling glances of a sparkling eye. Derived from शफ *m. n.* ' A scale of a fish.' ' A hoof of a horse.' खवला in Maráthi. And रा *vt.* 2. P. (अनिट्) ' To give.' ' To bestow.' *Cf.* Hema. " शफं खुरे गवादीनां मूले विटपिनामपि." Translate:—' The row of the swimming eyes of the ladies, fixed in the lattice-windows, had the beauty of a line of fish moving quickly and crowding near the net of lotus-stalks.'

St. 55. पदं—Construe अविशुष्कयावकं अविलम्बितविक्रमं पदं समर्पयन्त्यां पुरन्ध्र्यां [सत्यां] सोपानविमर्दसंभवः स्वरागः एव अंघ्रितलस्य यावको बभूव. पुरन्ध्री, Expl:—पुरं गेहं धारयतीति पुरन्ध्री (पुरन्ध्रि), 'An elderly married woman.' *Cf.* Medi. "पुरं नपुंसकं गेहे." अविशुष्क°—Analyse न विशुष्कः अविशुष्कः । अविशुष्कः यावकः यस्मिन् तत् । अविशुष्कयावकं, 'The lac (or dye) on which had not yet dried up.' अविलम्बि°—Analyse अविलम्बिनः विक्रमाः यस्मिन् तत्, 'The steps whereof had been quick.' सोपान°—Analyse सह विद्यमानः उप उपरि आनो गमनं एभिः सोपानानि । तेषु यो विमर्दः तस्मात् संभवो यस्य स सोपानविमर्दसंभवः, 'Produced by contact with (or pressure on) the steps.' स्वरागः—Analyse स्वस्य रागः स्वरागः, 'One's own dye.' 'One's own hue.' अंघ्रितलस्य—Analyse अंघ्रेः तलः अंघ्रितलः तस्य तादृशस्य, 'To the soles of feet.' पदं—'When the lady took a few quick steps on which the dye had not yet dried up, her own hue (or complexion) itself produced by the pressure on the stair-case became the lac to the soles of her feet.' The poet means to say that her hastily running over the steps of the stair imparted her own red complexion to the soles of her feet.

St. 56. कयाचित्—Construe मुखाकुलं आलोकपथं समेत्य घर्मप्लुतपत्रलेखया सखीकपोलाहितगण्डभागया कयाचित् तदीये मुखेऽपि विशेषकः कृतः. *Cf.* R. VII. 6. "आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः । बद्धुं न संभावित एव तावत्करेण रुद्धोऽपि च केशपाशः." आलोकपथं—Analyse आलोकस्य पंथाः आलोकपथः तं तादृशं, 'To the passage to look through.' 'To a window.' 'To a place of observation.' यतोऽवलोकनं भवति तत्र स्थले । Hemádri and Mallinátha render it by "गवाक्षपथं." मुखाकुलं—Analyse मुखैः आकुलः मुखाकुलः तं मुखाकुलं, 'Crowded with faces (of the ladies).' घर्म°—Analyse घर्मेण प्लुता पत्रलेखा यस्याः सा तया तादृश्या, 'By her having ornamental lines (on her cheeks) dropping down through sweat (or perspiration)'. सखी°—Analyse सख्याः कपोले आहितः गण्डस्य भागो यया सा तया तादृश्या, 'With (or having) one side of her face placed on her friend's cheeks.' विशेषकः, Expl:—विशिनष्टीति विशेषकः, 'Strokes or lines drawn on the face with pigments.' Derived from शिष् with वि *vt.* 7. P. (अनिट्) 'To distinguish.' *Cf.* Páṇi. III. 1. 133. "ण्वुल्तृचौ," 'The affixes ण्वुल् (अक) and तृच् (तृ) are placed after all verbal roots, expressing the agent.' *Cf.* Medi. "विशेषकोऽस्त्री तिलके विशेषयितरि त्रिषु." कयाचित्—'A certain lady approached the window, (*lit.* a passage to look through) already crowded with faces, and, with one side of her face placed on her friend's cheeks, impressed (*lit.* made) the painting of विशेषक

even on her face, with the ornamental lines (on her cheeks trickling down through perspiration.'

St. 57. प्रसाधन°—Construe प्रसाधनव्यापृतयापि प्रदेशिनीपर्वविकृष्टकर्णया अन्यया रामया वामकरस्थपत्रया रयेण वातायनजालं उपाययै. प्रसाधन°—Analyse प्रसाधने व्यापृता प्रसाधनव्यापृता तया तादृश्या, 'By her engaged in toilet (or self decoration).' प्रदेश°—Analyse प्रदेशिन्याः पर्वणः विकृष्टः कर्णः यया सा तया प्रदेशिनीपर्वविकृष्टकर्णया, 'Snatched her ear from the joint of the fore-fingers.' वाम°—Analyse वामकरे तिष्ठतीति वामकरस्थम् । वामकरस्थं पत्रं यस्याः सा वामकरस्थपत्रा तया तादृश्या, 'With the leaf in her left hand.' 'By her having the leaf in her left hand.' वातायनजालं—Analyse वातायनस्य जालं वातायनजालं, 'To the lattice of the window.' प्रसाधन°—'Another lady, though engaged in toilet, snatched her ear from the joint of the fore-finger and flew to the lattice of the window, with the leaf in her left hand.'

St. 58. द्रुत°—Construe द्रुतप्रयाणश्लथकेशबन्धना सघर्मवारिस्रुति मुखं बिभ्रती श्रमातुरोरुद्वयमन्थरा अपरा सपत्न्याः परिशंकनीयतां ययौ. द्रुत°—Analyse द्रुतं च तत् प्रयाणं च द्रुतप्रयाणं तेन श्लथानि केशानां बन्धनानि यस्याः सा, 'Having the tie of her hair loosened by her quick walking.' सघर्म°—Analyse घर्मेण सहितं यद्वारि तस्य स्रुतिर्विद्यते यस्य तत् सघर्मवारिस्रुति, 'Trickling with water of perspiration.' श्रमा°—Analyse ऊर्वोः द्वयं ऊरुद्वयम् । श्रमेण आतुरं यदूरुद्वयं तेन मंथरा, 'Moving slowly on account of her thighs being weakened by the efforts (or fatigue)'. Translate:—'A third lady had the tie of her hair loosened by her quick walking, had a face trickling with water of perspiration and was slowly moving as her thighs were weakened by the fatigue and so became an object of suspicion to her rival (co-wife).'

St. 59. नितान्तं—Construe भृशाल्पवातायनयातं एकमेव विभासुरं कुण्डलं नितान्तमेकीकृतगण्डभागयोः अन्ययोः रामयोः तद् मुखद्वयं मण्डयति स्म. एकीकृत°—Analyse एकीकृतौ गण्डयोः भागौ ययोः ते एकीकृतगण्डभागे तयोः तादृश्योः, 'Of those who had one side of their respective faces combined (or brought) together.' भृशाल्प°—Analyse अल्पं च तद् वातायनं च अल्पवातायनम् । भृशं च अल्पवातायनं च भृशाल्पवातायनं तत्र यातं भृशाल्पवातायनयातं, 'Gone to a very small window.' 'Came to a very small window.' विभासुरं, Expl:—विशेषेण भासुरं विभासुरं, 'Exceedingly brilliant.' 'Very brilliant.' कुण्डलं, Expl:—कुण्डते कुण्ड्यते वा इति कुण्डलं, 'An ear-ring.' Derived from कुड् (कुण्ड्) *vt.* I. A. (सेट्) 'To burn.' Or from कुड् (कुण्ड) *vt.* 10. U. (सेट्) 'To protect.' *Cf.* Uṇādi-sútra, "वृषादिभ्यश्चित्" इति कलच्. It may also be explained as:—कुण्डं

कुण्डलाकारं लाति वा ॥ *Cf.* Hema. "कुण्डलं वलये पाशे तटाङ्के कुण्डली पुनः। काञ्चनाद्रौ गडूच्यां च." मुखद्वयं—Analyse मुखयोर्द्वयं मुखद्वयं, 'A pair of faces.' नितान्तं—'Only one ear-ring, which was shining brilliantly, and was to be seen in a very small window, decorated the pair of faces of other two sweet ladies, who had one side of their (respective) faces wholly combined.'

St. 60. विधाय—Construe काचिद् लज्जया प्रियोपभुक्ताधरं आननं प्रथमं अर्धलक्षितं विधाय नृपतौ दूरं प्रयाति [सति तस्य] दिदृक्षया वातायनबाह्यं चकार. प्रियोप°—Analyse प्रियेण उपभुक्तः अधरः यस्य तत् तादृशं, 'The lower-lip of which was bit (*lit.* enjoyed) by her loving husband.' अर्ध°—Analyse अर्धं लक्षितं अर्धलक्षितं, 'Partially observed (or marked).' 'Partially concealed.' नृपतौ—Analyse नृणां पतिः नृपतिः तस्मिन् नृपतौ, 'The lord of people.' 'The king.' दिदृक्षया, Expl :—द्रष्टुमिच्छा दिदृक्षा तया दिदृक्षया, 'With a desire to have a look.' वातायनबाह्यं—Analyse वातायनस्य बाह्यं वातायनबाह्यं, 'Outside the window.' विधाय—'A certain lady first partially concealed through shame her face, the nether lip of which was bit by her loving husband, and, when the king proceeded forward, exposed it wholly outside the window, with a desire to see (him).'

St. 61. अतिष्ठत्—Construe उन्नतस्तनी एका कुचयुग्मसंपदा वातायनं निरुध्य अतिष्ठत् । सखीजनः यत् कृशमध्यभागतः पताकिनीं वीक्षितुं अन्तरं आप [प्राप]. कुच°—Analyse कुचयोर्युग्मं कुचयुग्मं तदेव संपद् तया कुचयुग्मसंपदा, 'With the excellence of the beautiful pair of her breasts.' उन्नतस्तनी—Analyse उन्नतौ स्तनौ यस्याः सा उन्नतस्तनी, 'Having very high breasts.' सखीजनः—Analyse सख्यः एव जनः सखीजन, 'Female friends.' यत्कृश°—Analyse कृशः मध्यस्य भागः कृशमध्यभागः । यस्य कृशमध्यभागः यत्कृशमध्यभागः तस्मात् तादृशात्, 'From the small opening left between them.' पताकिनीं, Expl:—पताकाः अस्याः सन्तीति पताकिनी ताम् पताकिनीं, 'To the army.' *Cf.* Pāṇi. V. 2. 116. "व्रीह्यादिभ्यश्च," 'The affixes इनि and ठन् come in the sense of मतुप् after the words व्रीहि &c; as well as the affix मतुप्.' उन्नतस्तनी एका कुचयुग्मसंपदा वातायनं निरुध्य अतिष्ठत्—'One lady, having very high breasts, stood covering the window with the beautiful pair of her breasts.' सखीजनः यत् कृशमध्यभागतः पताकिनीं वीक्षितु अन्तरं आप [प्राप]—'From the small opening left between them, her friends had a good view of the army.'

St. 62. निधाय—Construe काचित् तनूदरी विशालवातायनदेहलीतले बालकं तनयं निधाय महीभुजे पङ्कजकोशकोमलं अञ्जलिं बलादकारयत्. *Cf.* R. IX. 14. "सचित्रकारितबालसुताञ्जलीन्." तनूदरी—Analyse तनु उदरं यस्याः सा तनूदरी

'Having a very thin belly.' विशाल°—Analyse विशालं च तद् वातायनं च विशालवातायनं तस्य देहल्याः तल तस्मिन् तादृशे, 'On the surface of the window-sill.' पङ्कज°—Analyse पङ्कजस्य कमलस्य कोशमिव कोमलः तं तादृशं, 'Tender like the interior of a lotus-fold (or cup).' महीभुजे—Analyse महीं भुनक्तीति महीभुक्-ग् तस्मै महीभुजे, 'To the ruler of the earth.' 'To the king.' Translate:—'A certain lady, having a very thin belly, placed her infant son on the sarface of the spacious window-sill and made him fold his hands, tender like the interior of a lotus-cup, to the king by force.'

St. 63. नृपः—Construe [असौ] नृपः [अयमपरः] सुमित्रातनयः [इयं] वधूः इति प्रियाजने स्वयं करैः निर्दिशति [सति] तलप्रभापाटलभागभागिनो नखांशुजालाः अपि अम्बरे चेरुः. सुमित्रातनयः—Analyse सुमित्रायाः तनयः सुमित्रातनयः, 'The son of Sumitrá (i. e. Lakshmaṇa).' प्रिया°—Analyse प्रियाः एव जनः प्रियाजनः तस्मिन् तादृशे, 'The dear ladies.' तल°—Analyse तलानां प्रभाः तासां पाटलाः ये भागाः तान् भजन्ति तच्छीलाः तलप्रभापाटलभागभागिनः, 'Sharing the red portion of the lustre of the palms (of the hands).' नखांशुजालाः—Analyse नखानां अंशवः नखांशवः तेषां जालाः नखांशुजालाः, 'The collection of rays shooting forth (or proceeding) from the nails.' The poet seems to have used जाल 'a *Collection*' in the masculine gender. But the masculine use of this word denotes a Nípa tree, a variety of As'oka. *Cf.* Rabhasa, " जालं वृन्दगवाक्षयोः । क्षारकानायदम्भेषु, नीपे ना, स्त्री तु घोपके. " Also Vis'va, "जालं गवाक्ष आनाये कोरके दम्भवृन्दयोः । जालो नीपद्रुमे जाली कोशातक्यामुदाहृता. " नृपः—'While the dear ladies were pointing with their own hands 'this is the king,' 'that is son of सुमित्रा' and 'that is the (new) daughter in-law,' the collection of rays proceeding from the nails, sharing the red portion of the lustre of the palms (of their hands), moved in the sky.'

St. 64. अशक्नुवन्—Construe अधृष्टतया तं नृपात्मजं जयेन वर्धयितुं अशक्नुवन् वधूजनः अविधवाजनोचिते पथि [त्वं] पदं विधत्स्व इति [तस्य] पत्न्यै आशिषं गिरं जगौ. अशक्नुवन्—Analyse न शक्नुवन् अशक्नुवन्, 'Not able.' 'Unable.' This *pres. parti.* is to be construed with वधूजनः. नृपात्मजं—Analyse नृपस्य आत्मजः तं तादृशं, 'To the son of the king.' 'To the prince.' वधूजनः—Analyse वध्वः एव जनः वधूजनः,' 'The ladies.' 'The young women of the citizens.' अधृष्टतया—Analyse न धृष्टता अधृष्टता तया अधृष्टतया, 'On account of (or overcome by) modesty.' 'By reason of the absence of natural boldness.' अविधवाजनोचिते—Analyse न विधवाः अविधवाः सौभाग्यवत्यः ताः एव जनः तस्य उचितः तस्मिन्, 'Proper for (or worthy of) ladies with husbands.' 'Worthy of

married or unwidowed ladies.' अशक्नुवन् —' The ladies, unable to hail that scion of the king (prince) with victory on account of modesty, gave (*lit.* sang) a blessing to his queen saying 'mayest thou walk in (*lit.* set thy feet on) the path for ladies with husbands.'

St. 65. नरेन्द्र°—Construe नरेन्द्रसेनाः विवृद्धतोयाः समुद्रगाः इव समन्ततः [सर्वतः] यत् [पुरं] विविशुः । महार्णवस्य इव तस्य तत्कृतः पूरो न बभूव । न च अतिरिक्तता [बभूव]. नरेन्द्रसेनाः—Analyse नरेद्रस्य सेनाः नरेन्द्रसेनाः, 'The armies of the lord of people.' समुद्रगाः—Analyse समुद्रं गच्छन्तीति समुद्रगाः, 'Ocean-going.' 'Flowing towards the ocean.' विवृद्धतोयाः—Analyse विवृद्धानि तोयानि यासु ताः, 'With swollen waters.' महार्णवस्य—Analyse—महांश्चासौ अर्णवश्च महार्णवः तस्य तादृशस्य, 'Of the great ocean.' तत्कृतः–Analyse ताभिः कृतः तत्कृतः, 'Caused by them.' 'Consequent on them.' अतिरिक्तता–Analyse अतिशयिता रिक्तता अतिरिक्तता, 'Redundancy.' नरेन्द्रसेनाः विवृद्धतोयाः समुद्रगाः इव समन्ततः [सर्वतः] यत् [पुरं] विविशुः—'The armies of the king entered the city, from all sides, like rivers bound for the sea, with swollen waters.' महार्णवस्य इव तस्य तत्कृतः पूरो न बभूव । न च अतिरिक्तता [बभूव]—' The city was neither flooded nor did it overflow with them like the great occan.'

St. 66. द्विधागतं—Construe भुवः शासिता स नृपाङ्गनस्य द्वारमुपेत्य उभयभागसंश्रितं निबध्यमानाञ्जलि द्विधागतं तद्बलं दृशा अनुगृह्णन् मन्दिरं विवेश. द्विधागतं—Analyse द्विधा गतं द्विधागतं, 'Divided in twain.' 'Formed into two squadrons.' तद्बलं—Analyse तस्य बलं तद्बलं, 'His army.' नृपाङ्गनस्य—Analyse नृपस्य अङ्गनं नृपाङ्गनं तस्य तादृशस्य, 'To the quadrangle of the king's (palace).' उभय°—Analyse उभौ च तौ भागौ च उभयभागौ तयोः संश्रितं, 'Standing on both sides.' निबध्य°—Analyse निबध्यमानोऽञ्जलिर्येन तत् तादृशं, 'The soldiers in which had formed the cavity of their hands.' 'With folded hands.' द्विधागतं—' The ruler of the earth favoured with a glance his army, which had divided in twain, the soldiers in which had folded their hands, and which was standing on both sides of the royal quadrangle, and then entered the palace.'

St. 67. देशं—Construe अथ तनुजे युधाजिति जितं देशं विन्यस्य वपोऽर्थी विपिनं विविक्षुः केकयपतिः दुहितुः तनयं दिदृक्षुः [सन्] कस्यचित् कालस्य [अनन्तरं] तेन दूतेन [पुत्रेण] इन्द्रसखं ययाचे. युधाजित् *m.*—Name of the prince of the lord of the Kekayas named As'vapati. He was sent to Ayodhya' to fetch Bharata his sister's son. The Ra'ma'yaṇa says, 'And once on a time that descendant of Raghu, king Das'aratha addressed Bharata, saying,—" O son, this son of the

king of the Kekayas, thy uncle, Yudha'jit stayeth here, that hero, having come to take thee over." And hearing these words of दशरथ, Kaikeyî's son, Bharata, prepared for the journey, together with शत्रुघ्न. And having greeted his father, and Ra'ma of unflagging energy, and his mothers, that foremost of men, the heroic (Bharata) departed with शत्रुघ्न. And having Bharata as well as शत्रुघ्न, the heroic Yudha'jit, with a delighted heart, entered his own city; and his father rejoiced exceedingly.' तपोऽर्थी— Analyse तपः एव अथा यस्य स तपोऽर्थी, 'Wishing to practise religious austerities.' केकयपतिः—Analyse केकयानां पतिः केकयपतिः, 'The lord of the Kekayas.' विविक्षुः, Expl:—वेष्टुमिच्छुः विविक्षुः, 'Wishing to enter in.' दिदृक्षुः, Expl:—द्रष्टुमिच्छुः दिदृक्षुः, 'Wishing to see.' इन्द्रसखं— Analyse इन्द्रस्य सखा इन्द्रसखः तं तादृशं, 'To the friend of Indra (*i. e.* to Das'aratha).' The metre of this verse is वसन्ततिलकं. For the definition and its Gaṇas see our notes on V. 55. Translate:— 'Once the lord of the Kekayas, wishing to enter a forest to practise asceticism, transferred the country he had conquered to his son Yudha'jit and desirous of seeing, after a long time, the son of his daughter, requested Das'aratha, the friend of Indra, through him as his messenger.'

St. 68. अथ—Construe अथ प्रथितगुणे युधाजिति गुणप्रचयलाभरतं भरतं स्वविषयं नीतवति [सति] नयशुचिः स नृपतिः इतरसुताहितप्रियशताहततद्विरहप्रभवशुचः दिवसान् अनयत्. स्वविषयं—Analyse स्वस्य विषयः स्वविषयः तं तादृशं, 'To his own country.' प्रथितगुणे—Analyse प्रथिताः गुणाः यस्य स प्रथितगुणः तस्मिन् तादृशे, 'Having his merits well-known.' 'Of well-known merits.' गुण°—Analyse गुणानां प्रचयः गुणप्रचयः तस्य लाभः तस्मिन् रतः तं तादृशं, 'Devoted to the acquisition of the group (or number) of merits.' इतर°—Analyse इतरे ये सुताः तैः आहितं यत्प्रियशतं तेन आहता तस्य विरहात् प्रभवा शुक् येषु ते तान् तादृशान्, 'In which the sorrow due to his separation (*lit.* sprung from his separation) was nullified by hundreds of pleasing things done by his other sons.' नयशुचिः— Analyse नयेषु शुचिः नयशुचिः, 'Chaste in politics.' नृपतिः—Analyse नृणां पतिः नृपतिः, 'The lord of people.' The metre of this verse is नर्दटक, for the definition and its Gaṇas see our notes on IV. 70. Translate :—'When Yudha'jit, of well known merits, carried Bharata, who was devoted to the acquisition of the group of merits, to his country, the king (दशरथ), chaste in politics, spent some days, in which the sorrow due to his separation was nullified by hundreds of pleasing things done by his other sons.'

---

x अत्र बिम्बाधर इतिवन्मध्यमपदलोपी समासः आश्रयणीयः, राजीवसदृशं चक्षुरिति राजीवचक्षुः। बहुव्रीहौ तु यथा टिप्पणेषु विगृहीतं तथैव साधु।

CANTO X.

St. 1. ततः—Construe ततो नयेन राज्यं नयतः राजीवचक्षुषः तस्य शक्रसमानस्य समानामयुतं ययौ. *Cf.* R. X. 1. "पृथिवीं शासतस्तस्य पाकशासनतेजसः। किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ." राज्यं, Expl:—राज्ञो भावः कर्म प्रजापरिपालनात्मकं वा राज्यं, 'Kingdom.' *Cf.* Pàṇi. V. I. 128. "पत्यन्तपुरोहितादिभ्यो यक्," 'The affix यक् comes in the sense of 'nature or action thereof,' after a compound ending with पति, and after पुरोहित &c." राजीवचक्षुषः—Analyse राजीवमिव नीलोत्पलमिव चक्षुर्यस्य स राजीवचक्षुः तस्य राजीवचक्षुषः, 'Of one having lotus-eyes.' 'Lotus-eyed.' राजीवं Expl:—(केसरस्य) राजिरस्यास्तीति राजीवं, 'A lotus.' *Cf.* Pàṇi. V. 2. 109. and Vàrtika thereto, "वप्रकरणेऽन्येभ्योपि दृश्यत इति वक्तव्यम्," 'The affix व is seen after other words also.' As मणिवः 'a kind o serpent,' हिरण्यवः 'a kind of jem,' कररावः, कुमारवः, राजीवम्, कुञ्जावः, इष्टकावः. शक्रसमानस्य—Analys शक्नोतीति शक्रः तेन शक्रेण। शक्रेण or शक्रस्य समानः शक्रसमानः तस्य, 'Of one equal in power (or prowess) with Indra.' *Cf.* Uṇádisûtra, "स्फायितञ्चिवञ्चि°—इत्यादिना रक्. As शक्रः. *Cf.* Medi. "शक्रपुमान्देवराजे कुटजार्जुनभूरुहोः." समानामयुतं—'A myriad of years.' The metre of this canto is अनुष्टुप्. For the definition &c. see our notes on II. 1. ततः—'While the lotus-eyed king, whose prowess was like that of Indra, was conducting the affairs of his kingdom with regal policy (or political wisdom), a myriad of years passed away.'

St. 2. अथ—Construe अथ काठिन्यरहितत्वचि तद्देहे विस्रसावल्लीपुष्पहास इव क्वचित् पलितं अलक्ष्यत. तद्देहे—Analyse तस्य देहः तद्देहः तस्मिन् तादृशे, 'On his body.' काठिन्य°—Analyse कठिनस्य भावः काठिन्यं तेन रहिता त्वग् यस्मिन् स तस्मिन् काठिन्यरहितत्वचि, 'The skin on which was destitute of tensity or firmness (of youth).' पलितं, Expl:—फलतीति पलितं 'grey-hair.' Derived from फल् *vt.* 1. P. (सेट्) 'To burst open.' 'To split.' (Also *vi.* 1. P. सेट् To result, to bear fruit, to be useful). *Cf.* Uṇa'disûtra, "लोष्टपलितौ." Or it may be explained as, पलतीति पलितं. Derived from पल् *vt.* or *vi.* 1. P. (सेट्) 'To go.' 'To move.' *Cf.* Pàṇi. III. 4. 72. गत्यर्थकर्म°—'The affix क्त is employed in denoting the agent as well as the act and the object, after verbs implying motion, after transitive roots and after the verbs श्लिष्

(to embrace), शी (to lie down), स्था (to stand), आस् (to sit), वस् (to dwell), जन् (to produce), रुह् (to mount), and जॄ (to grow old), *Vide* Medi. " पलितं शैलजे तापे केशपाशे च कर्दमे. " Also Hema. " पलितं पंकतापयोः । पक्वकेशे केशपाके. " विस्रसा°—Analyse विस्रसैव वल्ली विस्रसावल्ली तस्याः पुष्पाणां हासः विस्रसावल्लीपुष्पहासः ' ' Blossoming of flowers of the creeper of old age. ' अथ—' In course of time were seen grey hair in some parts of his body, the skin on which was destitute of tensity or firmness (of youth), as if it were the blossoming of flowers of the creeper of old age. '

St. 3. पलित°—Construe महारथः सर्वकालसमुन्नते शिरसि जरसा पलितच्छद्मना दोषा स्पृष्टे [सति] न विषेहे. *Cf.* R. XII. 2. " कैकेयीशङ्कयेवाह पलितच्छद्मना जरा. " पलित°—Analyse पलितस्य केशादिशौक्ल्यस्य छद्मना मिषेण पलितच्छद्मना, ' Under the plea of grey hair. ' सर्वकालसमुन्नते—Analyse सर्वेषु कालेषु समुन्नतं सर्वकालसमुन्नतं तस्मिन् तादृशे, ' Exalted or erect in all times. ' Kálidása almost invariably construes समुन्नति or समुन्नत with मनस्. *Cf.* Ku. VI. 66. " मनसः शिखराणां च सदृशी ते समुन्नतिः." Also R. III. 10. " प्रियानुरागस्य मनःसमुन्नतेः " महारथः—' A great warror. ' ' A car warrior. ' For definition *vide* notes on IX. 14. पलित°—' The mighty warrior did not brook (the insult) of touching by the old age with hands, under the plea of grey hair, his head, exalted in all times. '

St. 4. आरोप्य—Construe समज्यायां समासीनः कृती भुवो नाथः ज्यायांसं सुतं स्वमङ्कमारोप्य अब्रवीत्. *Cf.* R. III. 26. " तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि. " अन्यतरेद्युः *ind.*—' On one day. ' *Vide* our notes on IV. 65. समासीनः—*Pre. parti.* from आस् *vi.* 2. A. (सेट्) ' To sit. ' समज्यायां, Expl :—समज्यन्त्यस्यां इति समज्या तस्यां समज्यायां, 'In the audience hall. ' Derived from अज् *vt.* or *vi.* 1. P. सेट्) ' To go. ' ' To drive. ' *Cf.* Páṇi. III. 3. 99. " संज्ञायां समज°—" ' The affix क्यप् comes after the following verbs in forming a word in the feminine, denoting an appellative and is accutely accented viz.—समज्, निषद्, निपत्, मन्, विद्, षुञ्, शीङ्, भृञ्, and इण्. " And the Vártika " अजेः क्यपि वीभावो नेति वाच्यम्. " आरोप्य—' Once seated in the audience hall (of his court) that lord of the earth, who had full enjoyment (of his desire), took his eldest son on his lap and addressed him the following words. '

St. 5. माम्—Construe इयं प्राणनिर्याणवैजयन्ती पुरःसरी रक्ताक्षवाहनादेशदूती जरा मां संसेवते. *Cf.* " कृतान्तकटकामलध्वजजरा स्फुटं लक्ष्यते पुरःसरगदैर्भृशं प्रमथिता तनूः क्लाम्यति । सहाय इह मे कुतस्त्वदपरः प्रभावाधिको न तारयसि चे-

द्रुतोऽस्मि खलु कालपाशावशः ॥" प्राणनिर्याणवैजयन्ती–Analyse प्राणानां निर्याणं तस्य वैजयन्ती प्राणनिर्याणवैजयन्ती, 'A flag of the departing of vital breaths.' पुरःसरी—Analyse पुरः सरतीति पुरःसरी, 'A forerunner.' 'Precursor.' 'An attendant.' 'A harbinger.' *Cf.* Pàṇi. III. 2. 18. "पुरोऽग्रतोऽग्रेषु सर्तेः," 'The affix ट comes, after the verb सृ 'to move' when the words in composition with it, are पुरः, अग्रतः and अग्रे all meaning 'in front of or before.' रक्ताक्ष°—Analyse रक्ते अक्षिणी यस्य स रक्ताक्षः महिषः । रक्ताक्षो वाहनं यस्य स रक्ताक्षवाहनः यमः तस्य आदेशः तस्य दूती रक्ताक्षवाहनादेशदूती, 'An obedient female messenger (or servant) of the god of death, who has for his vehicle a red-eyed buffalo.' माम्—'This Old Age, the precursor of the banner of departing vital breaths, and an obedient female servant of the god of death, who has a red-eyed buffalo for a vehicle, (now) assiduously waits on me.'

St. 6. जरसा—Construe हे तात जरसा नः अङ्गानि निर्विदा च कामेषु स्पृहा तुल्यमेव शनैः शनैः शैथिल्यमुपनीतानि. तात, Expl:—तनोतीति तातः तत्संबुद्धिः तात, 'O child.' A term of affection or endearment. *Cf.* Uṇàdisûtra "दुतनिभ्यां दीर्घश्च." Also *Cf.* Pàṇi. VI. 4. 37. "अनुदात्त°—" 'The final nasal of those roots which in the धातुपाठ have an accented root-vowel, as well as of वन् and तन् &c., is elided before an affix, beginning with a consonant (except a semi-vowel or nasal), when these have an indicatory क् or ङ्.' *Cf.* Vis'va, "तातोऽनुकम्प्ये पितरि." *Vide* our notes on IV. 10. निर्विदा—Analyse निर्गता विद् निर्विद् तया निर्विदा, 'By feeling disgust for.' 'By the feeling of despondency.' 'By complete indifference (or disregard) of worldly objects.' 'By the feeling of shame.' शैथिल्यं, Expl:—शिथिलस्य भावः शैथिल्यं, 'Looseness.' 'Laxity.' 'Slackness.' तुल्यं, Expl:—तुलया संमितं तुल्यं, 'Equal,' (*lit.* meted by the balance). *Cf.* Pàṇi. IV. 4. 91. "नौवयो°—'The affix यत् comes after the words नौ 'a boat,' वयस् 'age,' धर्म 'merit,' विष 'poison,' मूल 'a root,' मूल 'capital,' सीता 'a furrow,' and तुला 'a balance,' in the senses respectively of "to be crossed," "like," "attainable," "to be put to death," "to be bent down," "equivalent to," "united with," and "equally measured." Translate:—'Our limbs, on account of the effects of old age, and in consequence of the feeling of supreme disgust, and our hearty attachment (or longing) for the objects of love, have been, O child, in course of time (शनैः शनैः), equally brought to looseness (or infirmity).'

St. 7. कालेन—Construe भद्राः राघवदन्तिनः कालेन शिरसि न्यस्तैः श्वेतकेशशिताङ्कुशैः कामेभ्यो निवर्तन्ते हि. *Cf.* R. VIII. 11. "पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे." Also R. XIX. 1. "शिश्रिये श्रुतवतामपश्चिमः पश्चिमे वयसि नैमिषं वशी." R. I. 8. "वार्धके मुनीवृत्तीनां." R. III. 70. श्वेत°—Analyse श्वेताश्च ते केशाश्च श्वेतकेशाः। शिताश्च ते अङ्कुशाश्च शिताङ्कुशाः। श्वेतकेशाः एव शिताङ्कुशाः श्वेतकेशशिताङ्कुशाः तैः तादृशैः, 'By the sharp goads in the form of white hair.' राघवदन्तिनः—Analyse राघवाः एव दन्तिनः राघवदन्तिनः, 'The elephants in the form of the descendants of the Raghus.' *Cf.* Páṇi. II. 1. 72. "मयूरव्यंसकादयश्च:" 'The words मयूरव्यंसक 'cunning like a peacock' &c., are तत्पुरुष compounds;' these are irregularly formed तत्पुरुष compounds. The force of the word च in the Sûtra is that of restriction. For though the compound like मयूरव्यंसक is allowable we cannot form a compound like परममयूरव्यंसक. Or राघवाणां दन्तिनः राघवदन्तिनः = रघुश्रेष्ठाः, 'The best of the descendants of the Raghus.' *Cf.* Páṇi. II. 1. 62. "वृन्दारकनागकुञ्जरैः पूज्यमानम्," 'A case-inflected word, denoting object, deserving of respect, is compounded with the words वृन्दारक, 'eminent;' नाग, 'serpent or elephant;' कुञ्जर, 'elephants;' and the compound is तत्पुरुष.' *Cf.* Amara, "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः." कालेन—'For the illustrious elephants in the form of the descendants of the Raghus generally retire from the objects of sense, when pricked, on the head, by sharp goads of white hair, from the effects of time (or in course of time).'

St. 8. उभे—Construe नः वंश्यानां वक्षसि रक्तकर्कशे उभे तिष्ठतः यौवने वनिता वार्धके वल्कसन्ततिश्च. *Cf.* R. I. 8. "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्। वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्." यौवने, Expl :—यूनां भावः यौवनं तस्मिन् यौवने, 'In youth.' 'In the prime of age.' वल्कसन्ततिः—Analyse वल्कानां सन्ततिः वल्कसन्ततिः, 'A multitude of bark garments.' 'A heap of bark-dress.' वल्क *n.* Expl :—वलतीति वल्कं, 'A bark garment.' Derived from वल् *vi.* or *vt.* 1. P. also Âtm. (सेट्) 'To cover.' *Cf.* Uṇádisûtra, "शुल्कवल्कोकाः" इति कन्. Thus वल्+कन् = वल्क. Or from वल्क् *vt.* 10. P. (सेट्) 'To speak.' *Cf.* Medi. "वल्कं वल्कलशल्कयोः". वंशानां, Expl :—वंशे जाताः वंश्याः तेषां वंश्यानां, 'Of those who are born in the family.' *Cf.* Páṇi. IV. 3. 25. "तत्र जातः," 'The affixes ordained above or here after, come after a word in the 7th case in construction, in the sense of 'born or grown or originated there or then.' रक्तकर्कशे—Analyse रक्ते च ते कर्कशे च रक्तकर्कशे, 'Passionately fond of (or attached to) and rough (or

hard). ' कर्कशः, Expl :—कर् चासौ कशश्च कर्कशः, 'Hard.' 'Rough.' derived from कृ *vt.* 9. U. (सेट्) 'To kill.' 'To injure.' And कश् *vt.* or *vi.* 2. A. (सेट्) 'To go.' 'To command.' *Cf.* Vis'va, "कर्कशः परुषे क्रूरे कृपणे निर्दये दृढे। इक्षौ साहसिके कासमर्दकाम्पिल्लयोरपि." वार्धके, Expl:—वृद्धस्य भावः कर्म वा वार्धकम् तस्मिन् वार्धके, 'In old age.' *Cf.* Páṇi. IV. 2. 39. and the Vártika thereto, "वृद्धाच्चेति वक्तव्यम्," 'The affix ऊञ् comes after the word वृद्ध as वार्धकम् ' a collection of old men.' 'Old age.' Also *Cf.* Paṇi. V. 1. 133. "द्वन्द्वमनोज्ञादिभ्यश्च," 'The affix वुञ् comes in the sense of 'nature or actions thereof,' 'after a द्वन्द्व compound and after the words मनोज्ञ &.' Also Páṇi. VII. 3. 31. and the Vártika thereto, "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्." As वार्धक्यम्. *Cf.* Vis'va, "वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि." उभे—' A wife, passionately devoted to in youth and the collections of bark garments, hard to wear, in old age,—these two, O child, occupy the breast of our descendants.'

St. 9. न—Construe यः कृतशस्त्रः [अपि] जिष्णुर्न। यश्च आढ्यः [अपि] यज्ञनिस्पृहः। यश्च जरन् अपि कामी । एते क्षत्त्रवंशेषु कत्त्रयः. जिष्णुः = जयशीलः, 'Victorious.' 'Conquering.' *Cf.* Páṇi. III. 2. 139. "ग्लाजिस्थश्च ग्स्नुः," 'The affix ग्स्नु comes after the following verbs in the sense of 'the agent having such a habit &c.' viz—ग्ला, 'to be weary,' जि 'to conquer,' and स्था 'to stand,' as well as भू 'to be.' As ग्लास्नुः 'languid;' जिष्णुः 'victorious;' स्थास्नुः 'disposed to stand firm,, 'immoveable;' भूष्णुः 'being.' कृतशस्त्रः—Analyse कृतं शस्त्रं येन स कृतशस्त्रः, 'Wielding a weapon.' यज्ञनिस्पृहः—Analyse यज्ञेषु निस्पृहः यज्ञनिस्पृहः, 'Indifferent to the (performance of) sacrifices.' क्षत्रवंशेषु—Analyse क्षत्राणां वंशाः क्षत्रवंशाः तेषु क्षत्रवंशेषु, 'In the race of the Kshatriyas.' कत्त्रयः, Expl:—कुत्सितः त्रयः कत्त्रयः, 'Three vile ones.' 'A bain.' *Cf.* Páṇi. VI. 3. 101. and the Vártika thereto, "कद्भावे त्रावुपसंख्यानम्," 'कत् is substituted before त्रय.' As कत्त्रयः. Translate:—' Wielding weapons, he who has no ambition for conquest; possessing (immense) wealth he who is indifferent to (the performance of) sacrifices and advanced in years, he who is cupidious; these are the three vile ones in the क्षत्रिय race.'

St. 10. पादशेषे—Construe पुरुषायुषे पादशेषेऽपि यस्य वैराग्यं न [जायते] तस्य जनस्य हृदयालुता कीदृशी दृश्यते. पादशेषे—Analyse पादः शेषो यस्य तत् पादशेषं तस्मिन् पादशेषे, 'Having for its residue a fourth part.' 'Having a fourth part for its remainder.' वैराग्यं, Expl:—विरागस्य भावः वैराग्यं, 'Dispassion.' 'Absence of all worldly desires and appetites.' पुरुषा-

युषे—Analyse पुरुषस्य आयुः पुरुषायुषम् तस्मिन् पुरुषायुषे, 'The full extent of man's life.' वर्षशतामित्यर्थः । "शतायुर्वै पुरुषः" इति श्रुतेः ॥ *Cf.* Pàṇi. V. 4. 77. "अचतुर°—" 'The following words are irregularly formed by the affix अच्:—अचतुरः, विचतुरः, सुचतुरः, त्रिचतुराः, उपचतुराः, स्त्रीपुंसौ, धेन्वनडुहौ, ऋक्सामे, वाङ्मनसे, अक्षिभ्रुवं, दारगवं, उर्वष्ठीवं, पदष्ठीवं, नक्तंदिवं, रात्रिन्दिवं, अहर्दिवं, सरजसं, निश्श्रेयसं, पुरुषायुषं, द्व्यायुषं, त्र्यायुषं, ऋग्यजुषं, जातोक्षः, महोक्षः, वृद्धोक्षः, उपशुनं and गोष्ठश्वः.' *Vide* विजयगणिः, "कृते लक्षं सहस्राणां त्रेतायामयुतं तथा द्वापरे तु सहस्रैकं कलौ वर्षशतं मतम् ॥" हृदयालुता—Analyse प्रशस्तं हृदयं अस्य स हृदयालुः तस्य भावः हृदयालुता, 'Good heartedness.' 'Tender heartedness.' *Cf.* Pàṇi. V. 2. 122. and the Vártika thereto "हृदयाच्चालुरन्यतरस्याम्," 'So also after हृदय; the affix चालु comes optionally.' As हृदयालुः ॥ The च is इत् by I. 3. 7. Translate:—'What sort of tender feeling is to be seen in the heart of that man, who even, in the fourth period (or part) of the full extent of his life, does not entertain (or value) the feeling of dispassion?'

St. 11. न—Construe अतिविस्रसया देहे न भिन्ने [सति] ना तपस्तप्यते । इतरत्र [अन्यथा] चिरं जीर्णे तपस्यायां गतिर्हता. अतिविस्रसया—Analyse अतिशयिता विस्रसा अतिविस्रसा तया तादृश्या, 'From extreme old age.' इतरत्र=अन्यथा *adv.*—'In other respects.' 'In a manner different from this.' 'Otherwise.' तपस्यायां, Expl:—तपसि साधु तपस्या तस्यां तपस्यायां, 'In devout austerity.' 'In religious penance.' 'In asceticism.' *Cf.* Hema. "तपस्यः फाल्गुने पार्थे तपस्या नियमस्थितौ." *Cf.* Pàṇi. IV. 4. 128. Translate:—'A man practises religious austerities when his body is not shattered by extreme old age. When otherwise, it being worn out for a long time, the course of asceticism becomes (totally) barred.'

St. 12. मन्द°—Construe मन्दशक्तीन्द्रियः च्योतल्लालाविच्छुरिताधरः अस्फुटस्मृतिचेष्टाभिः बालव्रतं आचरन्निव [स तपः कीदृग्विधास्यतीत्युत्तरेणान्वयः]. मन्द°—Analyse मन्दशक्तीनि इन्द्रियाणि यस्य स मन्दशक्तीन्द्रियः, 'Possessing (or having) organs of little power.' च्योत°—Analyse च्योतन्त्यो लालाः च्योतल्लालाः ताभिः विच्छुरितः अधरः यस्य स तादृशः, 'Having the nether lip coated (or besmeared) with trickling spittle.' अस्फुट°—Analyse अस्फुटा या स्मृतिः तस्याः चेष्टाः ताभिस्तादृशीभिः, 'By the play of indistinct memory.' बालव्रतं—Analyse बालानां व्रतं बालव्रतं, 'Pranks of children.' This and the next seven verses form a कुलक. For the definition see our nots on II. 2. Translate:—'Possessing organs of little power, with the nether lip coated with oozing spittle, he acts the part of a child by play of indistinct memory.'

St. 13. मृणाल°—Construe मृणालवलयच्छेदतन्तुजालसमत्विषः पलितच्छटाः यौवनोद्दाहभस्मेव दधानः [स तपः कीदृग्विधास्यतीत्युत्तरेणान्वयः]. मृणाल°—Analyse मृणालस्य वलयानि मृणालवलयानि तेषां छेदानां तन्तवः तेषां जालैः समा त्विड् यासां ताः तादृशीः, 'Bearing the splendour resembling the net of fibres of the pieces of the coils of lotus-stalks.' यौवन°—Analyse यौवनस्य उद्दाहः यौवनोद्दाहः तस्य भस्म यौवनोद्दाहभस्म, 'The ashes of the burning of youth.' पलितच्छटाः—Analyse पलितस्य छटाः पलितच्छटाः, 'The clots formed of grey hair.' मृणाल°—'(He) wears the clots, formed of grey hair, having the splendour resembling the nets of fibres of the pieces of the coils of lotus-stalks, which look like the ashes of the burning of youth.'

St. 14. जीविते—Construe जीर्णवयसः मुमूर्षतः मे जीविते प्रत्याशा नास्तीति मूर्ध्नः तिर्यग्विकम्पितैः प्रथयन्निव [सोऽयं मादृशः जनः तपः कीदृग्विधास्यतीत्युत्तरेणान्वयः]. जीर्णवयसः—Analyse जीर्णं वयो यस्य स जीर्णवयाः तस्य तादृशस्य, 'Of one whose health of life is worn out.' प्रत्याशा—Analyse प्रतिगता आशा प्रत्याशा, 'Hope.' 'Expectation.' मुमूर्षतः, *Desi. pre. parti.* 'Of him verging on death.' 'Of him who is on the point of death.' तिर्यग्विकम्पितैः—Analyse तिर्यञ्चि च तानि विकम्पितानि च तिर्यग्विकम्पितानि तैः तादृशैः, 'By means of nodding obliquely.' 'With sidewise noddings.' Translate:—'That there is no hope of life for him, whose health of ife is worn out, and who is verging on death is loudly proclaimed, as it were, by the sidewise noddings of his head.'

St. 15. दन्त°—Construe उग्रैः दन्तकुन्तशतैः मृत्योः संकटं आननं प्रवेष्टुमिव कायसंकोचखर्वतां बिभ्राणः. *Cf.* Mahávír. I. 8. "संकटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता." दन्त°—Analyse दन्ताः एव कुन्ताः तेषां शतानि दन्तकुन्तशतानि तैः तादृशैः, 'By hundreds of spears consisting of (sharp) teeth. कायसंकोचखर्वतां—Analyse कायस्य संकोचः कायसंकोचः तेन खर्वता तां तादृशीं, 'Lowness (or shortness) consequent on the stooping of the body.' खर्वतां—Analyse खर्वतीति खर्वः तस्य भावः खर्वता तां तादृशीं, 'Lowness (or shortness) in stature.' Derived from खर्व् *vt.* 1. P. (सेट्) 'To go.' 'To move.' आननम्, Expl:—अनन्त्यनेन इति आननम्, 'Mouth.' Derived from अन् *vi.* 2. P. (सेट्) 'To breathe.' *Cf.* Páṇi. III. 3. 117. "करणाधिकरण्ययोश्च," 'The affix ल्युट् comes after a root, when the relation of the word to be formed to the verb is that of an instrument or location.' Translate:—'(He) displays shortness, resulting from the stooping of the body, as if with a view to enter into the mouth of the god of death, terrible on account of the fierce hundreds of spears, consisting of (his sharp) teeth.'

St. 16. बिभ्रत्—Construe आतङ्कनिर्मांसव्यक्तलक्ष्यसमुद्गमाः जरानद्याः वीचीरिव पर्शुकास्थिपरम्पराः बिभ्रत् [स तपः कीदृग्विधास्यतीत्युत्तरेणान्वयः]. *Cf.* Buddha-Charita I. 75–76. " दुःखार्णवाद्व्याधिविकीर्णफेनाज्जरातरंगान्मरणोग्रवेगात् । उत्तारयिष्यत्ययमुह्यमानमार्त्तं जगज्ज्ञानमहाप्लवेन " ॥ ७५ ॥ " प्रज्ञाम्बुवेगां स्थिरशीलवप्रां समाधिशीतां व्रतचक्रवाकां । अस्योत्तमां धर्मनदीं प्रवृत्तां तृष्णार्दितः पास्यति जीवलोकः" ॥ ७६ ॥ आतङ्क°—Analyse आतङ्काद् निर्मांसेन व्यक्ताः अत एव लक्ष्याः समुद्गमाः यासां ताः तादृशीः, 'The rising up (or issuing forth) of which is perceptible from the distinct emaciation (*lit.* fleshlessness) from a disease.' आतङ्कः, Expl:—आतङ्कतीति आतङ्कः, 'A disease.' Derived from तङ्क् *vi.* 1. P. (सेट्) 'To live in distress.' *Cf.* Páṇi. III. 3. 18. and III. 3. 121. " हलश्च " ' After a verb ending in a consonant, comes the affix ' घञ् ' (when the word to be formed is masculine, and related to the verb as an instrument or a location, and thereby the palatal is changed into a guttural). ' *Cf.* Medi. " आतङ्को रोगसन्तापशङ्कासु मुरजध्वनौ. " जरानद्याः—Analyse जरा एव नदी जरानदी तस्याः जरानद्याः, ' Of the river of old age. ' पर्शुकास्थिपरम्पराः—Analyse पर्शुकानां अस्थ्नां परम्पराः पर्शुकास्थिपरम्पराः, ' The rows (or lines) of the bones of ribs. ' *Vide* notes on IX. 29. बिभ्रत्—' (He) bears the rows of the bones of ribs, the rising up of which is perceptible by the distinct emaciation from a disease, like the waves of the river of old age (or decrepitude). '

St. 17. निर्दन्त°—Construe मुष्टिन्धयः यथा निर्दन्तत्वाद् असंस्कारं मोहान्मिथः अशंसितं अस्पष्टं अम्बूकृतं वचो वदन् [स तपो कीदृग्विधास्यतीत्युत्तरेणान्वयः]. निर्दन्त°—Analyse निर्गताः दन्ताः यस्य स निर्दन्तः तस्य भावः निर्दन्तत्वं तस्मात् तादृशात्, ' On account of toothlessness. ' असंस्कारं—Analyse अविद्यमानः संस्कारः यस्य तद् असंस्कारं, ' Having no refinement. ' ' Unpolished. ' ' Uttering lispingly. ' मुष्टिन्धयः, Expl:—मुष्टिं धयतीति मुष्टिन्धयः, ' A fist-sucker. ' ' A baby. ' *Cf.* Páṇi. III. 2. 30. " नाडिमुष्ट्योश्च, " ' And when the words नाडी ' a tube ' and मुष्टि ' fist, ' are objects in composition with the verbs ध्मा and धे the affix खश् is employed. ' अशंसितं—Analyse न शंसितं अशंसितं, ' Without being told. ' ' Without being asked. ' अस्पष्टं—Analyse न स्पष्टं अस्पष्टं, ' Indistinct.' अम्बूकृतं *adj.* Expl:—अनम्बु अम्बु अकारि अम्बूकृतं, ' Pronounced indistinctly, so that the words remain too much in the mouth.' 'Sputtered as speech, accompanied with emission of saliva. ' *Cf.* Páṇi. V. 4. 50. and VII. 4. 26. Translate:—' On account of toothlessness, he speaks to himself from infatuation, like a fist-sucking baby, words uttered lispingly, which are indistinct, have not been asked and are sputtered with saliva.'

St. 18. भिन्न°—Construe भिन्नभ्रुवं उदस्ताश्रां किञ्चित्कम्पितमस्तकां गद्गदितालापां जरां अनुनेतुं इव नम्रः [स तपः कीदृग्विधास्यतीत्युत्तरेणान्वयः]. भिन्नभ्रुवं—Analyse भिन्ना भ्रूः यया सा भिन्नभ्रूः तां भिन्नभ्रुवं, 'Having wrinkles of eye-brows.' उदस्ताश्रां—Analyse उदस्तानि अश्राणि यया सा तां तादृशीम्, 'Having tears cast out.' किञ्चित्कम्पित°—Analyse किञ्चित् कम्पितं मस्तकं यया सा तां तादृशीम्, 'Wearing a head shaking a little.' गद्गदितालापां—Analyse गद्गदिताः आलापाः यया सा गद्गदितालापा तां तादृशीं, 'The words in which were stammering.' 'Having a throbbing utterance.' भिन्न°—'(He) makes obeisance as if to persuade (or supplicate) old age, giving out stammering words, wearing a head shaking a little and having tears cast out with wrinkles of eyebrows.'

St. 19. वार्धक्ये—Construe वार्धक्ये धर्मतः मूढः स्वदेहवहनेऽपि अशक्तिष्ठः स तपो विधित्सन् अपि कीदृग्विधास्यति. वार्धक्ये, Expl :—वृद्धस्य भावः कर्म वा ॥ वार्धक्यम् तस्मिन् तादृशे, 'In old age.' स्वदेहवहने—Analyse स्वस्य देहः स्वदेहः तस्य वहनं तस्मिन्, 'Conveying (or carrying) one's own body.' अशक्तिष्ठः *adj*. Expl :—न शक्तिष्ठः अशक्तिष्ठः, 'Utterly incapable.' 'Quite unable.' *Cf*. Pāṇi. V. 3. 65. "विन्मतोर्लुक्" 'The affixes विन् and मत् are Luk-elided, when इष्ठन् and ईयसुन् follow.' Translate :—'Naturally bewildered (or confounded) in old age, and quite incapable of carrying even his own body, how can he, though ardently wshing to practise asceticism, effect it ?'

St. 20. यतः—Construe यतः तपस्यायां अरण्ये वसतिं यातुमें विरागिणः त्वया अश्रुप्रवर्षेण प्रत्यूहो मा जनि. तपस्यायां—'For practising asceticism.' Here the locative in used in the sense of the dative. See our notes on IV. 44. अश्रुप्रवर्षेण—Analyse अश्रूणां प्रवर्षः अश्रुप्रवर्षः तेन तादृशेन, 'By the shower of tears.' 'By the flow of tears.' प्रत्यूहः, Expl:—प्रत्यूहते इति प्रत्यूहः' 'An obstacle.' 'An impediment.' Derived from प्रत्यूह् *vt*. I. U. (सेट्) 'To interrupt.' 'To push back.' 'To keep off.' *Cf*. Pāṇi. III. 3. 18. विरागिणः—Analyse विरज्यते इति विरागी तस्य विरागिणः 'Of one who is changed in feeling.' 'Of one who is void of passion (or desire). यतः—'For this reason, do not, O child, create, with your flow of tears, any obstacle to me, devoid of passion and about to depart to (stay in) a forest abode inorder to practise asceticism.'

St. 21. अनुशिष्टिः—Construe प्रकृत्या एव भद्रे भवति अनुशिष्टिः कीदृशी । [केवलं] स्नेहकातरस्य मनसः प्रीतये निगद्यते. अनुशिष्टिः—'Instructions.' 'Ordering. 'Teaching.' Derived from अनुशास् *vt*. 2. P. (सेट्) 'To

advise.' To teach.' 'To rule.' स्नेहकातरस्य—Analyse स्नेहेन कातरं स्नेहकातरं तस्य तादृशस्य, 'Perplexed by (the influence of) affection.' Translate :—'What instructions are worth giving you, who are simply noble by nature? I give utterance to them only for the satisfaction of my mind, perplexed by (the influence of) affection.'

St. 22. औदासीन्यं—Construe यतः शत्रुः औदासीन्यं ताटस्थ्यं याति यतः उदासीनश्च तटस्थश्च मित्रतां याति यतः मित्रं च भक्तौ दृढत्वं याति तद् वक्तुमर्हसि. *Cf.* Buddha-Charita II. 6. "मध्यस्थतां तस्य रिपुर्जगाम मध्यस्वभावः प्रययौ सुहृत्वं। विशेषतो दार्ढ्यमियाय मित्रं द्वावस्य पक्षावपरस्तु नाशं." औदासीन्यं, Expl :—उदास्ते इति उदासीनः तस्य भावः औदासीन्यं, 'Indifference.' Derived from उदास् *vi.* 2. A. (सेट्) 'To sit.' 'To be.' आसीन is a *pres. parti.* of the root आस्. *Cf.* Pàṇi. VII. 2. 83. "ईदासः," 'ई is substituted for the आ of आन, after आस्.' मित्रतां, Expl :—मित्रस्य भावः मित्रता तां तादृशीम्, 'Friendship.' औदासीन्यं—'I hope you will tell me that principle which makes the enemies indifferent; the indifferent to become friends and the friends to become firmly devoted (i. e. faithful to loving loyalty).'

St. 23. यः—Construe यो येन ख्यातिं वाञ्छति लोकसंग्रहकामिना शत्रुतामप्यनिच्छता तस्य तद् न निन्दनीयं. लोकसंग्रहकामिना—Analyse लोकानां संग्रहः लोकसंग्रहः स एव कामोऽस्ति यस्य स लोकसंग्रहकामी तेन तादृशेन, 'By him desiring intercourse with the world.' 'By him who wishes to have worldy experience.' 'By him desiring the propitiation (or conciliation) of men and their welfare.' शत्रुतां, Expl:—शत्रोः भावः कर्म वा शत्रुता तां शत्रुतां, 'Enmity.' अनिच्छता—Analyse न इच्छन् अनिच्छन् तेन अनिच्छता, 'By him not intending.' 'Undesirous.' 'Unwilling.' 'Averse'. Translate:—'One, desiring the propitiation (or conciliation) of mankind, wilhout intending to incur their enmity, should not try to contemn even those actions of theirs wherewith they intend to make themselves known (to the world).'

St. 24. वृत्तिः—Construe स्वपररञ्जनी साम्नः वृत्तिः नये शुभकरी। निष्णातहृदयः तां आयःशूलिकतेति माहुः. वृत्तिः, Expl:—वर्तते अनयेति वृत्तिः, 'Course,' 'conduct.' Derived from वृत् *vi.* 1. A. (सेट्) 'To be.' 'To subsist.' *Cf.* Pàṇi. III. 3. 94. "स्त्रियां क्तिन्," To express an action &c, by a word in the feminine gender, the affix 'क्तिन्' is added to the root.' *Cf.* Medi. "वृत्तिर्विवरणाजीवकौशिक्यादिप्रवर्तने." शुभकरी—Analyse शुभं करोतीति शुभकरी, 'Causing welfare.' 'Producing good.' सामन् *n.*— 'Negotiation.' 'Peace-making.' One of the four Upàyas or means

of success against an enemy. The other three being दान, भेद and दण्ड. According to some authorities these expedients are seven in number; they add माया, उपेक्षा, and इन्द्रजाल to the four already mentioned. *Vide* Ka'mandaki's Nîtisàra, Chapter II. and XV. 3. " सामदानं च दण्डश्च भेदश्चेति चतुष्टयम्। मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः।" *Cf.* Manu. VII. 107 and 109. " तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः." " सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये." *Cf.* also Ka'mandaka Nîtisàra, Chap. XVII. 4-5. स्वपररञ्जनी—Analyse स्वा च परा च स्वपरे ते रञ्जयितुं शीलमस्याः सा तादृशी, 'Giving pleasure to himself and others.' 'Delighting the mind of himself and that of others.' आयःशूलिकता, Expl :—अयःशूलेन अयःशूलसदृशेन क्रूरेणाचारेण अन्विच्छति व्यवहरतीति आयःशूलिकः तस्य भावः आयःशूलिकता=साहसिकता, 'Violent proceeding.' 'Cruelty.' 'Impetuousity.' *Cf.* Páṇi. V. 2. 6. " अयःशूलदण्डाजिनाभ्यां ठक्ठञौ," 'The affixes ठक् and ठञ् come respectively after अयःशूल and दण्डाजिन, in the same sense of " who strives to get something by that. " The word अन्विच्छति is understood here also. The word अयःशूलम् means 'a violent proceeding.' Who seeks to obtain any thing by violent means is called आयःशूलिकः=साहसिकः॥ The word दण्डाजिन means 'staff (दण्ड) and hide (अजिन)' i. e. outer badges of devotion or hypocrisy. Who seeks to gain something by hypocrisy and deceit is called दण्डाजिनिकः = दाम्भिकः. *Vide* notes on X. 76. निष्णात°—Analyse निष्णाता बुद्धिर्येषां ते तादृशाः, 'Highly intelligent.' 'Profound scholars.' 'The erudite.' वृत्तिः—'In politics (or political science), the course of peace-making (or negotiations), giving pleasure to himself and the opposite party, becomes beneficial; and the astute politicians do not think it to be a violent proceeding.'

St. 25 जिघांसु°—Construe जिघांसुभिरपि प्राज्ञैः साम प्रयोक्तुं साम्प्रतं [युक्तमुचितं वा]। विभित्सन्तो मृगाविधो मृगान् गीतैः रञ्जयन्ति. *Cf.* Kámandaki's Nîtisàra XVII. 4. 5. " परस्परोपकाराणां कीर्तनं गुणकर्मसु। सम्बन्धस्य समाख्यानमायत्याः संप्रकाशनम् ॥ " " वाचा पेशलया साधु तवाहमिति चार्पणम्। इति सामप्रयोगज्ञैः साम पञ्चविधं स्मृतम्॥" *Cf.* Panch. I. 379-380. " आदौ साम प्रयोक्तव्यं पुरुषेण विजानता। सामसाध्यानि कार्याणि विक्रियां यान्ति न क्वचित् ॥ न चन्द्रेण न चौषध्या न सूर्येण न वह्निना। साम्नैव विलयं याति विद्वेषिप्रभवं तमः ॥ " जिघांसुभिः, Expl :—हन्तुमिच्छवः जिघांसवः तैः जिघांसुभिः, 'By those who are desirous of killing.' 'By the enemies.' प्राज्ञैः, Expl :—प्रज्ञा येषां अस्तीति प्राज्ञाः तैः प्राज्ञैः, 'By wise politicians.' 'By clever (or skilful) politicians.' *Cf.*

Hema. " प्रज्ञः प्राज्ञः प्रज्ञा तु शेमुषी. " Also Medi. " प्रज्ञस्तु पण्डिते वाच्यलिङ्गो बुद्धौ च योषिति. " साम्प्रतम् = युक्तं, ' Fit. ' 'Proper.' 'Opportune.' Derived from तन् *vt.* 8. U. (सेट्) To stretch with सम्प्र. The preposition सं being changed to सां by Páṇi. VI. 3. 109. " पृषोदरादीनि यथोपदिष्टं, " ' The elision, augment and mutation of letters to be seen in पृषोदर &c, though not found taught in the treatise of Grammar, are valid, to that extent and in the mode, as taught by the usage of the sages. ' *Cf.* Medi. " साम्प्रतं चाधुनार्थे स्यादुचितार्थे च दृश्यते. " Also Trikáṇḍa, " युक्तार्थे साधनार्थे च साम्प्रतं तद्विदो विदुः. " विभित्सन्तः—'Wishing to break (or kill). ' ' Wishing to set at variance. ' *Desi. pre. parti.* of भिद् *vt.* 7. U. (अनिट्) ' To divide.' ' To open. ' ' To set at variance. ' मृगाविधः—Analyse मृगान् विध्यन्तीति मृगाविधः, ' Those who wound (or stab) the animals (or antelopes). ' ' The hunters. ' Derived from विध् *vt.* 6. P. (सेट्) or व्यध् *vt.* 4. P. (अनिट्) ' To wound. ' ' To pierce. ' ' To stab. ' For the lengthening of the vowel *Cf.* Páṇi. VI 3. 116. See our notes on VIII. 63. Translate :—' It is but meet to employ the principle of Sáman (peace-making) by those political adepts who are desirous of killing. Hunters, bent on killing antelopes, entice them by charming songs (or notes). '

St. 26. साम°—Construe जनो दानाद् अत्यन्तवर्जितं साम शाक्यं वेत्ति। दानस्य मात्रया [लेशेन] युक्तं तद् औशनसं साम साधु. अत्यन्त°—Analyse अतिशयितं वर्जितं अत्यन्तवर्जितं, ' Strictly forbidden. ' ' Exceedingly excluded. ' औशनसं, Expl :—उशनसः इदं औशनसं, ' Sanctioned (or permitted) by Us'anas. ' उशनस् (or शुक्राचार्य) *m.*—Was a son of Bhrigu and the priest of Bali and the Daityas (Daitya-guru). He is also called the son of Kavi. His wife's name was S'us'umà or S'ataparvá. His daughter Devayáni married Yayàti of the Lunar race, and her husband's infidelity induced S'ukra to curse him. S'ukra is identified with उशनस्, and is the author of a code of law. The Harivans'a relates that he went to S'iva and asked for the means of protecting the Asuras against the gods, and for obtaining his object he performed " a painful rite, imbibing the smoke of chaff with his head downwards for a thousand years. " In his absence the gods attacked the Asuras and Vishṇu killed his mother, for which deed S'ukra cursed him " to be born seven times in the world of men. " S'ukra restored his mother to life, and the gods being alarmed lest S'ukra's penance should be accomplished, Indra sent his daughter Jayantî to lure him from it. She waited

upon him and soothed him, but he accomplished his penance and afterwards married her. साम°—'People know such policy of peace-making, as is wholly (or totally) excluded from giving presents (or bribes), to be perfidy (or dishonesty). That peace-making principle, which is joined with a small quantity of presents (bribe) and is sanctioned by Us'anas, is thought proper (on all hands).'

St. 27. मा—Construe रहितसंमानं मा दाः । कृतिनो नीतौ सत्कारसामनी त्यक्त्वा विश्राणितं वित्तं दूषितं विदुः. रहितसंमानं *adv.*—Analyse रहितः संमानः यस्मिन्कर्मणि यथा स्यात्तथा, 'In a manner bereft (or destitute) of self respect (or great honour).' सत्कारसामनी—Analyse सत्कारश्च साम च सत्कारसामनी, 'Hospitable treatment and peace.' वित्तं, Expl :—विद्यते स्म इति वित्तं, 'Wealth.' Derived from विद् (विन्द्) *vt.* 6. U. (अनिट्) 'To get.' 'To obtain.' *Cf.* Pāṇi. VIII. 2. 58. "वित्तो भोगप्रत्यययोः," 'The irregularly formed participle वित्त denotes 'possessions' and 'renown.' विश्राणितं = दत्तं, 'Given.' *Past. parti.* of श्रण् *vt.* 10. U. (सेट्) 'To give.' 'To bestow.' Translate :—'Do not give (presents) in a manner devoid of honour (or self respect). Keeping aside the sense of honour and the principle of peace-making, the present (वित्तं) given with a view to attain the political object, is declared (or thought) by the wise to be a disgrace.'

St. 28. शत्रु°—Construe अथ नेता दुर्धर्षं शत्रुं शत्रुगृह्येण घनेन स्फुलिंगार्चिःप्रावृतं आयसं पिण्डं इव निहन्ति. शत्रुगृह्येण—Analyse शत्रुणा गृह्यः शत्रुगृह्यः तेन तादृशेन, '(Seemingly) siding with (or being the partisan of) an enemy.' '(Outwardly) belonging to the party of an enemy.' (i. e. 'a friend,' 'an intimate)'. *Cf.* Pāṇi. III. 1. 119. *Vide* notes on IX. 18. दुर्धर्षं, Expl :—धर्षितुं दुष्करः दुर्धर्षस्तं तादृशं, 'Difficult to be overpowered.' घन *m.*—'A sledge-hammer.' स्फुलिंग°—Analyse स्फुलिंगमयानि अर्चींषि तैः प्रावृतं स्फुलिंगार्चिःप्रावृतं, 'Enveloped in the flames of sparks.' आयसं, Expl :—अयसो विकारः आयसं, 'Made of iron.' शत्रु°—'The leader of the people entirely destroys an enemy, difficult to be overpowered, with the help of a friend, (seemingly) siding with him, like an iron clod, enveloped in the flames of sparks, by means of a sledge-hammer.'

St. 29. उप°—Construe उपजापहृतस्वामिस्नेहसीत्रिमौले सचिवे पराश्रयं वाञ्छति [सति] मेदिन्याः पत्युः पातो न संशयः. *Cf.* Kàmandaki's Nitisàra XVII. 25. 26. "भेदं कुर्वीत यत्नेन मन्त्र्यामात्यपुरोधसाम्। तेषु भिन्नेषु भेदो हि युव-

राजे तथोर्जिते." "अमात्यो युवराजश्च भुजावेतौ महीपतेः। मन्त्री नेत्रं हि भिन्नेस्मिन्नेकस्मिन्नपि तद्विधः." *Cf.* Panch. I. 273. "येन यस्य कृतो भेदः सचिवेन महीपतेः। तेनाशस्त्रवधस्तस्त कृत इत्याह नारदः॥" उप°—Analyse उपजापेन भेदेन हृता स्वामिनः स्नेहस्य सीमा येन स तस्मिन् तादृशे, 'The limit of the good-will of his lord has been won by his secret whispering into his ears.' उपजाप *m.*, Expl:—उपांशु जपनं उपजापः, 'Whispering into the ear.' 'Treachery.' *Cf.* Medi. and Vis'va. "भेदो द्वैधे विशेषे स्यादुपजापे विदारणे." पराश्रयं—Analyse परेषां आश्रयः पराश्रयः तं तादृशं, 'Refuge with an enemy.' Dependence on an enemy.' 'Protection from an enemy.' मौले, Expl :—मूले भवो मूलादागतो वा मौलः आप्तः इत्यर्थः तस्मिन् मौले, 'A hereditary minister.' Translate :—'When a hereditary minister, who has attained the limit of the good-will of his lord, won over to his side, by his secret whispering into his ears, seeks protection of an enemy, there would be a fall of the lord of the earth, without any doubt.'

St. 30. इतर°—Construe इतरोपायदुःसाध्ये चण्डदण्डोऽसौ महीपतिः नतिरदुष्टायति विपुलं फलं अश्नाति. *Cf.* Kámandaki's Nítisára. XVII. 41—42. "उत्साहदेशकालैस्तु संयुक्तः सुसहायवान्। युधिष्ठिर इवात्यर्थं दण्डेनास्तं नयेदरीन्॥ आत्मनः शक्तिमुद्वीक्ष्य दण्डमभ्यधिकं नयेत्। एकाकी सत्त्वसंपन्नो रामः क्षत्रं पुरावधीत्॥" इतर°—Analyse इतरे च ते उपायाश्च इतरोपायाः तेषां दुःसाध्यं इतरोपायदुःसाध्यं तस्मिन् तादृशे, 'When all other political expedients become unmanageable.' 'When all other political expedients fail to accomplish.' चण्डदण्डः—Analyse चण्डः दण्डो यस्य स चण्डदण्डः, 'Waging a fierce war.' 'Making a terrible assault.' 'Of a severe punishment.' महीपतिः—Analyse मह्याः पतिः महीपतिः, 'The lord of the earth.' अदुष्टायति—Analyse अदुष्टः आयतिः उत्तरः कालः यस्य तद् अदुष्टायति, 'The future of which is not attended with evil.' 'The future whereof is peaceful (or innocent).' आयतिः, Expl :—आयंस्यन्तेऽत्र। आयस्यति वा। इति आयतिः उत्तर कालः, 'The fututre.' 'The future time.' *Cf.* Páṇi. III. 3. 94. "स्त्रियां क्तिन्," 'To express an action &c. by a word in the feminine gender, the affix क्तिन् is added to the root.' *Cf.* Medi. "आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः." Translate :—'When all other political expedients fail (*lit.* become difficult to be accomplished) the lord of the earth wages fierce war, and takes the full advantage (*lit.* enjoys the fruit) of polity the future whereof is peaceful.'

St. 31. अव्याहति—Construe मुग्धोपि वल्लवः दण्डेन विना अव्याहति गौः रक्षितुं न शक्या इति प्रत्येति किमु राजकं. अव्याहति *adv.*—Analyse न व्याहति यथा भवति तथा अव्याहति, 'Without any interruption.' 'Uninterrupt-

